अथायुष्मान् महामौद्गल्यायनो[s]ऽभीक्ष्णं[t] निरयचारिकां[u] गच्छति[v]। तत्र[w] सत्वां पश्यति[x] अष्टसु महानरकेषु[y] प्रत्येकषोडशोत्सदेषु[a] अनेकविधानि[b] नैरयिकानि[c] दुःखसहस्राणि[d] Sen. 5 समनुभोन्तो[e]। अयं च आयुष्मान् कोलितस्थविरो चरन्तो नरकचारिकां[f] आद्राक्षीत्[g] सत्वा

नरकेषु अनुभवन्ता[a] बहू दुःखा संजीवे[b] निरये ऊर्ध्वपादा[c] अधोशिरा वासीहि च परशूहि च क्षीयन्ता[d]। अपरे पि परस्परं प्रदुष्टमनसंकल्पा[e] आयसेहि नखेहि पाटेन्ति तीक्ष्णानि च असिपत्राणि[f] हस्तेषु प्रादुर्भवन्ति[g] येहि परस्परं गात्राणिच्छिन्दन्ति[h] न च[i] कालं[j] करोन्ति यावत् सानं पापका[k] कर्मा न परिक्षीणा[l]। कालसूत्रे[m] महानरके अद्राक्षीत्[n] सत्वां कालसूत्रेण[o] सूत्रिताङ्गा निहतक्षीयन्तां[p] परशूहि[q] पि विपाटीयन्तां करपत्रेहि[r] विपाटीयन्तान्[s]। तक्षितपटितो[t] च सानं[u] कायो[v] पुनरुहृयति[w] असाता[x] वेदना वेदयन्ति न चैवं[y] कालं करोन्ति[z] कर्मोपस्तब्धत्वात्। संघाते[a] पि महानरके अद्राक्षीत्[b] सत्वसहस्राणि पर्वतेहि पीडियन्ता आदीप्त[c]संप्रज्वलित[d]सज्योतिभूतेहि[e] शोणितनद्यो च प्रसवन्ति[f] भूयो[g] च,तानि पर्वतानि ते च संक्रमन्ति[h] न चैवं[i] तावत् कालं करोन्ति[j] कर्मोपस्तब्धत्वात्। आद्राक्षी[k]देकान्तरौरवे[l] सत्वसहस्रियो[m] ताम्रमयघनेषु[n] आदीप्तसंप्रज्वलित[o]सज्योतिभूतेषु[p] धूमसमाकुलेषु प्रक्षिप्ता

Sen. 6 दुःखसहस्राणि अनुभोन्ता। महारौरवे[q] आदीप्तसंप्रज्वलिते[r] सज्योतिभूते[s] अग्निस्मिं संप्रक्षिप्तानां[t] महारावं[u] रवन्तानां[v] च शब्दो चक्रवाडमहाचक्रवाडेहि[w] पर्वतेहि प्रतिहन्यते[x] येहि चतुर्हि[y] महाद्वीपेहि जम्बुद्वीपपूर्वविदेह[z]अपरगोदानीय[a]उत्तरकुरुषु[b] मनुष्याणां श्रोता-भासमागच्छति[c]। अद्राक्षीत्तपने[d] अनेका सत्वसहस्रियो[e] एकान्तकदुःखवेदना वेदयन्तां[f] पार्ष्णि उपादाय यावदधिक्ककाटिका[g] अयोकुट्टनेहि[h] कुट्टीयन्ता[i] अपराणि च दुःखसहस्राणि समनुभवन्ता[j] न चैवं ताव कालं करोन्ति[k] कर्मो[l]पस्तब्धत्वात्[m]। तस्मिं[n] महानरके[o] आदिप्तसंप्रज्वलिते सज्योतिभूते[p] अनेकायो सत्वसहस्रियो[q] उपपन्ना[r] दुःखा[s] वेदनां[t] वेदेन्ता[u]। तस्मिं[v] महानरके समन्ता[w]योजनशतिके[x] पूर्वाय[y] भित्तीय अर्चिसहस्राणि उत्पत्तित्वा पश्चिमाये[z] भित्तीये प्रत्यहन्यन्ति[a]। पश्चिमाये भित्तीये अर्चिसहस्राणि उत्पत्तित्वा पूर्वाये भित्तीये प्रत्यहन्यन्ति। दक्षिणाये[b] उत्पत्तित्वा उत्तराये प्रत्यहन्यन्ति। उत्तराये उत्पत्तित्वा दक्षिणायं[c] प्रत्यहन्यन्ति। भूमीये[d] उत्पत्तित्वा तले प्रत्यहन्यन्ति[e]। तलातो उत्पत्तित्वा भूमौ प्रत्यहन्यन्ति। तायो[f] सत्वसह[g]स्रियो[h] समन्ततो परिपतन्ति

न चैवं तावत्[a] कालं करोन्ति कर्मोपस्तब्धत्वात्[b][c]। प्रतापस्मिं महानरके पर्वता[d] प्रज्वलिता
आदीप्ता[e] सज्योतिभूता[f]। नैरयिकेहि[g] सत्वेहि शूलोपेतेहि[h] तानि पर्वतानि परिचारितानि[i]।
एदृशानि दुःखानि समनुभवन्ति न चैवं ताव कालं करोन्ति कर्मोपस्तब्धत्वात्।
अतो महानरके मुक्ताः कुक्कुलन्ते वगाहन्ति। ते च तत्र कुक्कुले दह्यमानायो जना
प्रधावन्ति न चैवं[k] कालं करोन्ति कर्मोपस्तब्धत्वात्। कुक्कुलातो मुक्ताः[l] कुणपं Sen. 7
अवगाहन्ति[m]। तत्र कृष्णेहि[n] प्राणकेहि[o] अयोमुखेहि खज्जन्ति[p] न चैवं[q] कालं करोन्ति[r] कर्मो-
पस्तब्धत्वात्। कुणपातो[s] मुक्ता[t] नरकोत्सदा[u] द्रुमाणि रमणीयानि च वनप्रान्तानि[v] पश्यन्ति
तेन सुखार्थिनो[w] तानि वनप्रान्तानि धावन्ति। तत्रापि[x] सानं कुलला च गृध्रा[y] च काकोलूका[z]
च अयोमुखा आर्द्र[a] वृक्षे वा वर्जयित्वा[b] मान्सानि खादन्ति। यं[c] तेषामस्थीनि[d] अवशेषाणि
भूयो[e] पि मान्सच्छवि[f] मान्सशोणितमुपजायति[g] न चैवं[h] कालं[i] कुर्वन्ति कर्मोपस्तब्धत्वात्।
ते[j] तेषां पक्षिणां[k] भीता अलेने[l] लेनसंज्ञिनो असिपत्रवनं[m] नरककुम्भं[n] च प्रविशन्ति।
तत्रापि संप्रविष्टानां वातानि उपवायन्ति[o] यैस्तानि[p] असिपत्राणि[q] पतन्ति[r] तीक्ष्णानि। तेषां
सत्वानां गात्राणि प्रत्याहन्यन्ति[s] नैवं[t] सानं कश्चित्काये प्रदेशो यो अक्षतो भवति[u]
अन्तमसतो[v] बालाग्रकोटिनिष्क्रममात्रोऽपि[w][x], न चैवं[y] कालं[z] करोन्ति कर्मोपस्तब्धत्वात्। ते
क्षता च शयाना[a] रुधिरम्रक्षितशरीरा[b][c] वैतरणीं[d] नदीं अवगाहन्ति[e] सत्वा कठिनां क्षारनदीं[f][g]
याव सानं श्लक्ष्णितानि अंगानि प्रतिविध्यन्ति[h], न चैवं[i] कालं[j] करोन्ति कर्मोपस्तब्धत्वात्।
ततोऽपि सानं नरकपाला[k] आयसेहि अङ्कुशेहि उद्धरेत्वा[l] नदीतीरे[m] आदीप्ताये भूमिये[n]
संप्रज्वलितसतेजोभूताये[o] आविद्धानां[p] एवमाह[q]। अहह[r] भो पुरुषाः किमिच्छथ[s]। ते Sen. 8
एवमाहन्सुः[t]। परिबुभुक्षिता[u] स्म संपिपासिता स्म[v]। ततो[w] सानं नरकपालाः[x]
अयोविष्कंभनेभि मुखं विष्कंभयित्वा आदीप्तसंप्रज्वलितसतेजोभूतेहि[y][z] अयोषण्डं धमेन्ति
मुखं[a] स्वकं विवरयित्वा आदीप्तानि संप्रज्वलितानि[b] सतेजोभूतानि अयोगुडानि मुखे[c]
संप्रक्षिपन्ति। तं[d] भुंजन्तां भवन्तो[e]। ताम्रलोहं[f] च सानं विलीनकं पाययन्ति[g]।

पिबन्तां[a] भवन्तो[b]। यो[c] सानं धममान एव ओष्ठं[d] दहति ओष्ठं दहित्वा[e] जिह्वां दहति जिह्वां दहित्वा तालुकं दहति तालुकं दहित्वा कण्ठं दहति कण्ठं[f] दहित्वा अन्त्रं[g] दहति अन्त्रं[h] दहित्वा अन्त्रगुणमादाय अधोभागेन[i] गच्छति न चैवं[j] तावत्[k] कालं करोन्ति[l] कर्मोपस्तब्धत्वा[m]।

एवं स्थविरो महामौद्गल्यायनो[n] अष्टसु महानरकेषु सत्वा दुःखसहस्राण्यनुभवन्ता[o] दृष्ट्वानहो[p] कृच्छ्रन्ति[q] जेतवनमागत्वा चतुर्णां[r] परिषदां विस्तरेणारोचयति[s]। एवं सत्वा अष्टसु महानरकेषु षोडशोत्सदेषु[t] विविधानि दुःखसहस्राणि[u] प्रत्यनुभवन्ति। तस्माज्ज्ञातव्यं[v] प्राप्तव्यं बोद्धव्यं अभिसंबोद्धव्यं[w] कर्तव्यं कुशलं कर्तव्यं[x] ब्रह्मचर्यं[y] न च वा[z] लोके किञ्चित्पापं कर्म करणीयं[a] ति वदेमि। एवं स्थविरस्य महामौद्गल्यायनस्य[b] श्रुत्वा बहूनि[c] प्राणिसहस्राणि देवमनुष्याणां[d] अद्भुतं प्राप्नुवन्ति।

Sen. 9 एवं समासंतो नरकवर्णः[e]। विस्तरतो प्युपवर्णयिष्यामि।

इमं[f] लोकं पारलोकं सत्वानामागतिं[g] गतिं।
च्युतिउपपत्तिसंसारं[h] संबुद्धो स्वयमद्दसा[i] ॥१॥
आवज्जन्तो[j] सफलतां कर्मणां[k] प्राणसंश्रितां[l]।
यथास्थानं[m] विपाकं च स्वयमवबुध्ये[n] मुनिः[o] ॥२॥
सो अभिज्ञाय[p] आख्यासि नरकानष्ट गौतमः[q]।
प्रत्यक्षधर्मा[r] भगवां[s] सर्वधर्मेषु चक्षुमां ॥३॥
संजीवं कालसूत्रं च संघातं[t] च द्वौ च रौरवौ।
अथापरा[u] महावीची तपनो[v] च प्रतापनो ॥४॥
इत्येते अष्टौ निरया आख्याता दुरतिक्रमा[w]।
आकीर्णा[x] रौद्रकर्मेभिः प्रत्येकषोडशोत्सदा[y][z] ॥५॥

चतुःकला[a] चतुर्द्वारा[b] विभक्ता[c] भागशो मिता ।
उद्गता योजनशतं[d] समन्ताच्छतयोजनं[e] ॥६॥
अयः[f]प्राकारपरिक्षिप्ता[g] अयसा[h] प्रतिकुब्जिताः[i] ।
तेषामयोमयी[j] भूमिः[k] प्रज्वलिता तेजसायुता ॥७॥
सदायस[l]फालास्फारा[m] आवसथा दुरासदा ।
रोमहर्षणरूपा[n] च भीष्मा प्रतिभया[o] दुःखा ॥८॥
महद्भयंकरा[p] सर्वे अर्चिशतसमाकुला । Sen. 10
एकैको योजनशतं[q] आदाये संप्रभासति[r] ॥९॥
यत्र सत्वा[s] बहू[t] रौद्रा[u] महाकिल्विषकारका ।
चिरं[v] कालं पतप्पन्ति[w] अपि च वर्षशतान्यपि[x] ॥१०॥
अयोमयेहि[y] दण्डेहि[z] स्थूलनरकपालकाः[a] ।
हनन्ति प्रत्यमित्राणि[b] ये[c] भोन्ति कृतकिल्विषा[d] ॥११॥
तेषामहं[e] कीर्तयिष्यामि गिरायमनुपूर्वशः ।
श्रोतुमादाय सत्कृत्य शृणोथ[f] मम भाषतः[g] ॥१२॥
संजीवे[h] सत्वा निरये[i] ऊर्धपादा अधोशिराः ।
प्रलंबयित्वा[j] तक्ष्यन्ति वासीहि[k] परशूहि च ॥१३॥
ततो नखेहि तीक्ष्णेहि आयसेहि स्वयंभुहि[l] ।
अन्यमन्यं[m] विवादेन्ति[n] क्रुद्धा[o] क्रोधवशानुगाः[p] ॥१४॥
असिनो[q] चापरा तेषां तीक्ष्णा[r] हस्तेषु जायिथ[s] ।
येहिच्छिन्दन्ति[t] अन्योन्यं प्रदुष्टमनसारका[u] ॥१५॥
तेषां सीदन्ति गात्राणि[v] शीतलवातऊहता ।
सर्वाङ्गज्वलनस्तेषां[w] पूर्वकर्मविपाकतः ॥१६॥

एवं शास्ता यथाभूत[a]मभि[b]ज्ञाय तथागतो[c] ।
संजीव[d]मिति आख्यासि आवासं पापकर्मणां[e] ॥१७॥
Sen. 11 संजीवातो[f] च निर्मुक्ता[g] कुक्कुलमवगाहिषु[h] ।
हन्यमाना समागम्य दीर्घमायत[i]विस्तरं ॥१८॥
ते[j] खु तत्र प्रधावन्ति[k] योजनानि अनेकशो[l] ।
दह्यमाना कुक्कुलेन[m] वेदेन्ता[n] बहुदुःखकं[o] ॥१९॥
कुक्कुलातो च निर्मुक्ताः कुणपम[p]वगाहिथं ।
दीर्घपदा[q]तिविस्तीर्णं[r] ते विध्वंसित[s]पौरुषा ॥२०॥
तमेनं[t] कृष्णप्राणका अग्नितीक्ष्णमुखा खरा[u] ।
छविं[v] भित्त्वान[w] खादन्ति[x] मान्स[y]शोणितभोजनाः ॥२१॥
कुणपातो[z] च[a] उत्तीर्णा द्रुमा[b] पश्यन्ति शोभना[c] ।
हरितान्[d]पत्रसंछन्नास्तानायान्ति[e] सुखार्थिनः[f] ॥२२॥
तमेनं[g] कुलला[h] गृध्रा काकोला च अयोमुखा[i] ।
आर्द्र[j] वृक्षे च वर्जित्वा[k] खादन्ति रुधिरक्षतां[l] ॥२३॥
यदा च खादिता भोन्ति अस्थीनि अवशेषिता[m] ।
पुनस्तेषां छवि[n]मान्सं[o] रुधिरं चोपजायते ॥२४॥
ते[p] भीता[q] उत्पतित्वान[r] अलेना लेनसंज्ञिनो[s] ।
असिपत्रवनं[t] घोरं हन्यमाना[u] उपागमि ॥२५॥
Sen. 12 ततो क्षता[v] च आर्ता च बहु[w]रुधिरम्रक्षिता ।
असिपत्रवना मुक्ताः यान्ति[x] वैतरणीं[y] नदीं ॥२६॥
तेन ता[z]मवगाहन्ति तप्तां[a] क्षारोदकां[b] नदीं ।
तेषां[c] च अङ्गमङ्गानि[d] क्षतानि प्रतिविध्यत[e] ॥२७॥

ततोऽङ्कुशेहि[a] विद्धित्वा[b] आयसैः यमपौरुषाः[c] ।
उत्क्षिपित्वा[d] नदीतीरे भुंजावेन्ति अयोगुडां ॥२८॥
ताम्रलोहं च[e] शुल्वं च आपायेन्ति विलीनकं ।
तमेषामन्त्रमादाय[f] अधोभागेन गच्छति ॥२९॥
एतानि पापकर्मान्ता[g] नरकां प्रतिपद्यिथ[h] ।
अकृत्वान कुशलं कर्म वाममार्गानुसारिणः[i] ॥३०॥
ये च पापानि कर्माणि परिवर्जन्ति[j] योनिशः ।
एकान्तकुशलाचारा[k] न ते गच्छन्ति[l] दुर्गतिं ॥३१॥
तस्मा[m] द्विरूपपर्याया कर्मा[n] कल्याणपापका[o] ।
पापानि[p] परिवर्जित्वा कल्याणं आचरे[q] शुभं ॥३२॥
कालसूत्रस्मिं[r] नरके आर्द्रवृक्षे[s] व वर्जिताः ।
सूत्रयित्वान तेषाङ्गा[t] वासीहि परशूहि[u] च ॥३३॥
ततो अयोमया[v] पत्रा[w] दीर्घकालसुतापिता[x] ।
दहन्ता पीडयन्ता[y] च गात्रेषु परिवेष्टिता[z] ॥३४॥
दहित्वा पीडयित्वा[a] च अयोपत्रा[b] विघट्टिता । Sen. 13
आवृंहितं[c] छविमान्सं[d] रुधिरं च प्रसारये ॥३५॥
ततो[e] पार्ष्णीहि पाटेत्वा याव अधिक्ककाटिकां[f] ।
कालसूत्रस्मिं[g] नरके बहू[h] अपि संघट्टति ॥३६॥
भैरवे[i] अन्धकारस्मि[j] वार्ता[k] यत्र न दृश्यति ।
धूमसंघातस्मि[l] तस्मिं नरके ओसरन्ति[m] च ॥३७॥
ते च तत्र[n] प्रधावन्ति योजनानि अनेकशः[o] ।
अन्यमन्यं आक्रमन्ता बध्रेषु[p] परमन्त्रशः[q] ॥३८॥

एवं शास्ता यथाभूतं[a] अभिज्ञाय तथागतः ।
कालसूत्रं इदं वक्षे[b] आवासं पापकर्मिणां ॥३९॥
संघातस्मि[c] च नरके महता[d] पर्वता अधो ।
तेषामन्तरिकं[e][f] सत्वा मृगवशो[g] प्रवेशिता ॥४०॥
ते पि शैला समागम्य[h] सत्वानां कर्मप्रत्यया ।
पीडयन्ति बहु 'प्राणां अग्निस्कन्धनिभानिव[i][j] ॥४१॥
पीडितानां[k] च गात्राणां बहुं स्रवति[l] शोणितं ।
शरीरसंभ्रमे[m] चापि पूयनद्यो प्रवर्तिथ ॥४२॥
Sen. 14 आयसासु[n] च[o] द्रोणीषु अयोमुशलकोटिषु ।
सुभन्ति[p] प्रत्यमित्राणि[q] अपि वर्षशतं[r] बहुं ॥४३॥
एवं शास्ता यथाभूतं[s] अभिज्ञाय तथागतः ।
संघातमिदमाख्यासि[t][u] आवासं पापकर्मिणां[v] ॥४४॥
रौरवस्मि[w] च नरके ओरुद्धा[x] जनता[y] बहु ।
अग्निस्मि प्रज्वलितस्मिं[z] शब्दं कुर्वन्ति भैरवं ॥४५॥
यदा च अग्निर्निर्वाति[a] अथ[b] तूष्णीभवन्ति ते ।
पुनरग्निस्मि[c] प्रज्वलिते निर्नादन्ति[d] महत्स्वरं[e] ॥४६॥
द्वितीयो[f] पि च आख्यातो रौरवो रोमहर्षणः ।
निरन्तकूलनरको[g] गम्भीरो नसमुत्तरो[h] ॥४७॥
तत्र दण्डं गृहीत्वान[i] स्थूलनरकपालका[j] ।
सुभन्ति[k] प्रत्यमित्राणि[l] अपि वर्षशतं[m] बहुं ॥४८॥
एवं[n] शास्ता यथाभूतं[o] अभिज्ञाय तथागतो[p] ।
रौरवं इति आख्यासि आवासं पापकर्मिणां[q] ॥४९॥

तपर्नस्मि[a] च नरके तप्तलोहो[b] समुद्यतः ।
निःस्वनन्ते[c] च संतप्ता[d] अग्निस्कन्धसमा[e] दुःखा ॥५०॥
तत्र[f] पापसमाचारा[g] ओरुद्धा जनता[h] बहु ।
पच्यन्ति पापकर्मान्ता[i] ये भोन्ति कृतकिल्विषाः ॥५१॥
तां पक्वमात्रा संखिन्ना[j] खादेन्ति[k] सुनखा बहु । Sen. 15
प्रवृद्धकाया[l] बलिनो मान्सशोणितभोजना[m] ॥५२॥
यदा च खादिता भोन्ति अस्थीनि[n] अवशेषिता[o] ।
अथ तेषां छविमान्सं[p] रुधिरं चोपजायति[q] ॥५३॥
एवं शास्ता[r] यथाभूतमभिज्ञाय, तथागतः ।
तपनमिदमाख्यासि[s][t] आवासं पापकर्मणां[u] ॥५४॥
प्रतापर्नस्मि[v] नरके तीक्ष्णशूला[w] अयोमुखा ।
महतो[y] अग्निस्कन्धस्य[z] पर्वतो[a] भयभैरवः ॥५५॥
तत्र पापसमाचारा[b] आवृता जनता[c] बहु[d] ।
अर्ण्वन्ति[e] पापकर्मान्ता[f] मच्छा कठल्लगता[g] यथा ॥५६॥
एवं[h] शास्ता यथाभूतं[i] अभिज्ञाय तथागतः[j] ।
प्रतापनन्ति[k] आख्यासि आवासं पापकर्मिणां[l] ॥५७॥
ततो अवीची[m] नरको[n] एकान्तकटुको[o] दुःखो[p] ।
महन्तो[q] तपोसंतप्तो[r] अर्चिसंघगणावृतः[s] ॥५८॥
अयोगुडा हि[t] अग्निस्मि यथरिव[u] संतापिता ।
एवं[v] अवीची नरको हेष्टा उपरि पार्श्वतो[w] ॥५९॥
जातवेदोसमा[x] कायाः[y] तेषां नरकवासिनां ।
पश्यन्ति[z] कर्मदढतां[a] न तस्माद्भोति[b] नो गतिः ॥६०॥ Sen. 16

ते च तत्र प्रधावन्ति[a] दृष्ट्वा द्वारमपावृतं ।
अपि निष्क्रमणं यस्मा[b] अस्ति मोक्षगवेषिणां ॥६१॥
येषां च पापकं कर्म[c] अविपक्वं[d] पुरा कृतं ।
न ते लभन्ति निर्गन्तुं निरयात् कर्मप्रत्यया[e] ॥६२॥
एवं[f] शास्ता यथाभूतं[g] अभिज्ञाय तथागतः[h] ।
अवीचिमिति[i] आख्यासि आवासं पापकर्मिणां ॥६३॥

संजीवं[j] नाम । कस्य कर्मस्य विपाकेन[k] तत्र सत्वा उपपद्यन्ति । इह सपत्ना[l] ये वा भोन्ति[m] सापत्नका[n] वा वैरिणः[o] क्षेत्रवैरिका[p] वा वस्तुवैरिका[q] वा वप्रवैरिका[r] वा प्रतिराजानो[s] वा चौरा[t] वा संग्रामगता[u] अन्यमन्यस्मिं[v] सापत्नानि चित्तानि उपस्थापयित्वा[w] कालं[x] कुर्वन्ति तस्य कर्मस्य विपाकतो तत्र सत्वा उपपद्यन्ति । एवं खलु पुनः[y] आधिपतेयमात्रमेतं तत्रोपपत्तेः । तत्रोपपन्ना अन्येषां पि पापकानाम-कुशलानां कर्माणां विपाकं प्रत्यनुभवन्ति । कस्य[z] कर्मस्य विपाकेन तक्षीयन्ति[a] । येहि इह जीवन्तो[b] प्राणका तच्छिता[c] भवन्ति वासीहि परशूहि कुठारीहि[d] तस्य कर्मस्य विपाकेन तक्षीयन्ति[e] । कस्य कर्मस्य विपाकतो[f] तेषां शीतको वायु[g] Sen. 17 उपवायति[h] । येहि इह निवापकभोजनानि[i] दत्तानि भोन्ति शृगाल[j]-महिषाण[k] शूकराण कुक्कुटान पोषितानि[l] मांसार्थाय[m] वधिष्यामि[n] त्ति तस्य कर्मस्य विपाकतो[o] तेषां ...... हस्तेषु नखा जायन्ति[p] दण्डा वा आयसा । यथा इह आयुधयानानि[q] दत्तानि भोन्ति[r] एवं यूयं[s] इमेहि आयुधेहि इत्थंनामं[t] ग्रामं वा नगरं वा निगमं वा हनध्वं[u] मनुष्यां[v] वा तिरच्छानगतां वा तस्य[w] कर्मस्य विपाकतो[x] तेषां हस्तेषु दण्डा[y] वायसा[z] जायन्ति असिनो[a] च । केनैष संजीवो[b] । तत्र तेषां नैरयिकानां[c] एवं भवति[d] संजीवं[e] कालसूत्रभूतिकं[f] तेनैष संजीवनिरयो[g] ।

कालसूत्रं[a] नाम। सो नरको याव[b] आयुधहस्ता[c] याव[d] सज्ज्योतिभूतो[e]। तत्र तां नैरयिका निरयपाला[g] आर्द्रवृक्षे वा वर्जेत्वा कालसूत्रवशेन[h] तक्षन्ति[i] अष्टांशे[j] पि षडंशे[k] पि चतुरंशे[l] पि[m]। अन्येषां दानि[n] पार्ष्णि[o] उपादाय यावत्[p]कृकाटिकातो[q] यथा इक्षुगण्डिका[r] एवं छिन्दन्ता[s] गच्छन्ति[t] अन्येषां[u] पुनः कृकाटिकादुपादाय यावत्पार्ष्णि[v] यथा इक्षुगण्डिका एवं छिन्दन्ता गच्छन्ति[w]। ते तथाभूता[x] अतिमात्रं[y] दुःखा वेदना वेदेन्ति[z] न च पुनः कालं करोन्ति यावं[a] न तत्पापकं[b] कर्म क्षीणं[c] भवति। कस्य[d] कर्मस्य विपाकेन तत्र सत्वा उपपद्यन्ति[e]। येहि इह बद्धा भवन्ति[f] Sen. 18
हस्तिनिगडादिभिः[g] कर्मका[h]रापिता[i] वा भवन्ति[j] एत्ताकानां[k] हस्तानि छिन्दथ[l] पादानि छिन्दथ एत्ताकानां नासा[m] एत्ताकानां[n] स्नायुमान्सं उत्पाटेथ[o] एत्तकानां बाहु[p] एत्ताकानां[q] पृष्ठिमान्सं[r] उत्पाटेथ पंचवारं[s] वा दशवारकं[t] वा तस्य कर्मस्य[u] विपाकेन तत्र सत्वा उपपद्यन्ति। एवं खलु पुनः[v] आधिपतेयमात्रमेतं[w] तत्रोपपत्तेः[x]। तत्रोपपन्ना[y] अन्येषां[z] पि पापकानामकुशलानां[a] कर्मणां[b] विपाकं प्रत्यनुभवन्ति। तत्र ते नैरयिका निरयपालैस्ताड्यमाना[c] परिभाष्यमाणाः[d] सुभस्सू ति आहंसु[e]। ते[f] संभीता[g] बहूनि प्राणसहस्राणि[h] यथा[i] नैवजीवानि एवन्तिष्ठन्ति[j]। अथ[k] यमपालानां[l] पट्टानां तप्तानां संप्रज्वलितानां सज्ज्योतिभूतानां[m] बहूनि पट्टसहस्राणि पुरतो[n] वैहायसा गच्छन्ति[o]। तेषां दानि आगच्छतां[p] शब्दं करोन्ति। एतानि[q] आगच्छन्तीति[r]। तानि तेषां आगत्वा प्रत्येकं गात्राणि परिवेष्टन्ति[s]। तत्र तेषां छविं[t] निर्दहन्ति चर्म[u] पि मान्सं[v] पि स्नायुं[w] पि निर्दहन्ति यथा[x] सर्वं[y] पि निर्दग्धं[z] भवति[a]। अथ तेषां आवृंहितं[b] तच्छविमान्स[c]लोहितं[d] व्यवदह्यति[e]। ते तथाभूता अधिमात्रं दुःखा वेदनां वेदयन्ति, न च पुनः कालं करोन्ति[f] याव[g] सानं[h] तं पापकं[i] कर्म व्यन्तीकृतं न भवति[j]। एवं खलु पुनः आधिपतेयमात्रमेतं[k] तत्रोपपत्तेः[l]। तत्रोपपन्ना[m] अन्येषां[n] पि पापकानामकुशलानां[o] कर्मणां[p][q] विपाकं प्रत्यनुभवन्ति[r]। कस्य Sen. 19

कर्मस्य विपाकेन[a] तत्र सत्वा उपपद्यन्ति[b]। येहि[c] इह जीवन्ता[d] प्राणा[e] अनेकशो घाताविता[f] भवन्ति[g] येहि इह याचनकेहि वा पण्डकेहि वा सर्वदण्डेहि[h] वा दुःशीलेहि वा प्रव्रजितेहि[i] चीवराणि[j] वा कायबन्धनानि वा परिभुंजितानि भवन्ति,[k] तस्य कर्मस्य[l] विपाकेन तत्र सत्वा उपपद्यन्ति। एवं खलु पुनः आधिपतेयमात्रमेतं[m][n] तत्रोपपत्तेः[o]। तत्रोपपन्ना[p] अन्येषां[q] पि[r] पापकानामकुशलानां कर्मणां[s] विपाकं प्रत्यनुभवन्ति। अन्येषां दानि[t] पार्ष्णि[u] उपादाय यावत्कृकाटिकातो[v] वध्री विदारेन्ति। अन्येषां दानि कृकाटिकातो उपादाय यावपार्ष्णि वध्री[x] विदारेन्ति। अन्येषां[y] दानि[z] कृकाटिका उपादाय[a] यावकटीयो चीरकवध्रानि[b][c] करोन्ति[d]। ते तथाभूताधिमात्रां[e][f] वेदना[g] वेदयन्ति[h]। कस्य[i] कर्मस्य विपाकेनात्र[j] सत्वा[k] उपपद्यन्ति। येहि इध[l] एरकवार्षिका[m] वा कारापिता[n] चीरकवार्षिका[o] कारापिता[p] वा[q] तस्य कर्मस्य विपाकेन तत्र सत्वा उपपद्यन्ति[r]। यो[s]
Sen: 20 निरये[t] अन्धकारधूमसंघो[u] परितो[v] सो धूमो[w] तीक्ष्णो कटुको भयानको छविं[x] भित्त्वा चर्मं[y] भित्त्वा मान्सं भित्त्वा स्नायुं भित्त्वा अस्थि भित्त्वा अस्थिमजं मान्साद्यतिनिर्याति[z][a]। सर्वे[b] काया[c] मूर्छन्ता[d] तत्र संप्रक्षियन्ति[e]। ते तत्र[f] अनेकानि योजनशतानि[g] अन्वाहिण्डन्ता[h] अन्यमन्यं आक्रमन्ता[i] पटिसुभन्ति[j]। ते तथाभूता अधिमात्रा[k] वेदनां[l] वेदेन्ति[m] न च पुनः कालं[n] करोन्ति याव[o] सानं तं पापकं कर्म[p] व्यन्तीकृतं[q] न भवति[r]। कस्य[s] कर्मस्य विपाकतो[t] तत्र सत्वा उपपद्यन्ति[u]। येहि इध[v] रन्ध्रेषु वा गुत्तीषु वा कारासु[w] वा बन्धेषु वा साहिकानां[x] वा किंपुरुषकानां[y] वा उन्दुरूणां[z] वा विडालानां[a] वा अजगराणां[b] वा विले धूपं कृत्वा द्वारा[c] रक्षिता भवन्ति[d] मधुकरा वा धूमेन[e] बाधिता भवन्ति तस्य कर्मस्य विपाकतो तत्र सत्वा उपपद्यन्ति। एवं खलु पुनः[f] विविधानां पापकानां[g] अकुशलानां कर्माणां[h] विपाकतो तत्र सत्वा उपपद्यन्ति। एवं खलु पुनः आधिपतेय-मात्रमेतं[i] तत्रोपपत्तेः[j]। तत्रोपपन्नाः[k] अन्येषां[l] पि विस्तरः[m]। केनेदं कालसूत्रं[n]। तत्र

[a]नैरयिकान्निरयपाला[b] आर्द्रं[c] वृक्षे वा वर्जेत्वा[d] कालसूत्रवशेन[e] तक्षन्ति[f] तेनैष[g] कालसूत्र[h]-
निरयो यथाकर्तव्यो[i] ।

संघातो[j] नाम । सो नरको पर्वतान्तरिक[k]संस्थितो[l] आयसो आदीप्तसंप्रज्वलितो Sen. 21
सज्योतिभूतो[m] अनेकानि योजनशतानि आयतो[n] । तत्र तेषां [o]नैरयिकानां[p] निरयपाला
आयुधहस्ता[q] उद्देशेन्ति[r] । ते दानि[s] भीताः[t] तं पर्वतान्तरिकं[u] प्रविशन्ति । तेषां[v] दानि
पुरतोऽग्नि प्रादुर्भूतो[w] । ते[x] दानि भीताः प्रतिनिवर्तन्ति[y] । तेषां दानि पृष्ठतोऽग्नि[z]
प्रादुर्भवति[a] । ते दानि शैलाः परस्परं[b] समागच्छन्ति[c] । तेषु दानि आगच्छन्तेषु शब्दं[d]
करोन्ति[e] एतागच्छन्ति[f] एतागच्छन्तीति । ते समागता यथा इक्षु एवं पीडयन्ति[g] ।
ते दानि शैला वैहायसमभ्युद्गच्छन्ति[h] । ते तेषां[i] हेष्टा अनुप्रविशन्ति[j] । यदा[k] अनुप्रविष्टा
भवन्ति बहूनि प्राणिसहस्राणि[l] ते दानि[m] शैला सन्निविशन्ति यथा इक्षुगण्डा एवं
पीडेन्ति[n] लोहितनदीयो प्रस्यन्दन्ति[o] । अस्थिसंकलिकाः[p] परिवर्ज्यन्ति[q] निर्मान्सा[r]
स्नायुसंयुक्ताः[s] । तथाभूता[t] वेदना[u] वेदेन्ति न च पुनः[v] कालं करोन्ति[w] यावसानं[x] न[y] तं
पापकं कर्मं व्यन्तीकृतं भवति । कस्य कर्मस्य विपाकेन[z] तत्र सत्वा उपपद्यन्ति[a] ।
येहि इह कीटकमर्दनानि[b] वा कारापितानि भवन्ति तलमर्दनानि[c] वा असिपत्रे वा
देवानां[d] तथैवा जीवन्तका[e] एवं प्राणका पत्रयष्टीहि[f] पीडिता[g] भवन्ति[h] लिक्षा वा यूका[i] वा
सांकुशा वा नखेहि[j] पिच्चिता भवन्ति[k] तस्य कर्मस्य विपाकेन तत्र सत्वा उपपद्यन्ति ।
एवं खलु पुनः[l] आधिपतेयमात्रमेतं[m] तत्रोपपत्तेः[n] । तत्रोपपन्नाः अन्येषां[o] पि पापकानाम्[p]- Sen. 22
कुशलानां कर्माणां[q] विपाकं प्रत्यनुभवन्ति । ता[r] अस्थिसंकलिकायो[s] आयसाहि[t] द्रोणीहि
आदीप्ताहि संप्रज्वलिताहि सज्योतिभूताहि[u] आयसेहि[v] मुशलेहि आदीप्तेहि संप्रज्वलितेहि
सज्योतिभूतेहि[w][x] अयोपाते यथा पञ्चवर्षशतानि[y] भवन्ति । ते तथाभूता एवं दुःखां[z]
तीव्रां[a] वेदना[b] वेदयन्ति । कस्य कर्मस्य[c] विपाकेन तत्र सत्वा उपपद्यन्ति[d] । येहि इह
जीवन्तका प्राणका[e] शक्तीहि विज्झिता[f] भवन्ति[g] वा गदासिहि[h] बाध्यन्ते वा येहि

संप्रज्वलितेहि[a] सजीवानि प्राणकानि[b] व्यापाद्य उदूखले[c] मुशलेहि[d] संक्लिष्टा भवन्ति[e] तस्य कर्मस्य विपाकतो तत्र सत्वा उपपद्यन्ति[f]। केनैष संघातो[g] ति वुच्चति। तत्र नैरयिका सत्वाः संघातमापद्यन्ते तेनैष[h] निरयो संघातो[i] ति वुच्चति।

......तत्र ते नैरयिका बहूनि प्राणसहस्राणि[j] प्रत्येकप्रत्येकं वा घरकेहि ओरुद्धा[k] छिन्नईर्यापथा[l] गच्छन्ति। तेषां हस्ते[m] अग्नि प्रज्वलति। यथायथा[n] अग्नि प्रज्वलति[o] तथातथा शब्दं करोन्ति[p]। यथायथा[q] अग्निर्निर्वाति[r] तथातथा तुष्णीभवन्ति। ते तथाभूता[s] अधिमात्रां वेदना[t] वेदयन्ति। कस्य[u] कर्मस्य[v] विपाकतो तत्र सत्वा
Sen. 23 उपपद्यन्ति। येहि[w] इह अत्राणा[x] अनभिसरणा[y] कर्मकारापिता[z] भवन्ति[a] गेहदाघा वा कृता भवन्ति[b] वनदाघा कृता भवन्ति[c] रन्ध्रेषु[d] वा गुत्तीषु वा कारासु वा बन्धेषु[e] वा साहिकानां[f] वा किंपुरुषाणां वा उन्दुरूणां[g] वा विडालानां[h] वा अजगराणां[i] वा विलेषु अग्नि दत्वा द्वाराणि रक्षितानि[j] भवन्ति मधूनि[k][l] वा[m] ताम्बूलानि वा अग्निना[n] बाधितानि भवन्ति[o] तस्य कमस्य[p] विपाकेन तत्र सत्वा उपपद्यन्ति। एवं खलु पुनः आधिपतेय-मात्रमेतं[q] तत्रोपपत्तेः[r]। तत्रोपपन्नाः अन्येषां पापकानामकुशलानां कर्माणां[s] विपाकं प्रत्यनुभवन्ति[t]।......

महारौरवो नाम। सो नरको संचितो आयसो आदीप्तो संप्रज्वलितो सज्योति-भूतो अनेकानि योजनशतानि आयतो[u]। तत्र तेषां नैरयिकानां निरयपाला[v] मुद्गर-हस्ता उद्देशेन्ति। ते दानि[w] भीता[x] अप्येकत्या धावन्ति अप्येकत्याः पलायन्ति[y] अप्येकत्या न[z] पलायन्ति[a] अप्येकत्या[b] कुत्रापि[c] अवसक्कन्ति[d] अप्येकत्या[e] न अवसक्कन्ति[f] अप्येकत्या[g] अनुशक्यं[h] संज्ञापयमानाः[i] प्रत्युद्गच्छन्ति। ते दानि नरकपाला[j] कस्य दानि यूयं अत्र संज्ञापयमाना[k] प्रत्युद्गच्छयेति[l] तां प्रहरन्ति यथा दधिघटिका[m] एवं[n] शीर्यन्ति विशीर्यन्ति[o]। ये[p] च धावन्ति ये च न धावन्ति ते[q] तथाभूता दुःखां खरां कटुकां[r] वेदना[s]

वेदेन्ति[a]। कस्य[b] कर्मस्य विपाकेन[c] तत्र[d] सत्वा उपपद्यन्ति। येहि इह चन्द्रमसूर्याणि[e] Sen. 24
आवरित्वान बन्धनानि कृतानि भवन्ति[f] प्रवेशयित्वा[g] ओसिरन्ति[h] एत्थ[i] यूयं[j] मा चन्द्रमासूर्यं[k] पश्यथ[l] तस्य कर्मस्य विपाकेन तत्र सत्वा[m] उपपद्यन्ति[n]। कस्य[o] कर्मस्य[p] विपाकतो तेषां सत्वानां[q] शीर्षाणि पिच्चीयन्ति[r]। येहि इह जीवन्तकानां प्राणकानां[s] शीर्षाणि पिच्चितानि[t] भवन्ति[u] अहीनां वृश्चिकानां[v] शतघ्नीनां तस्य कमस्य विपाकेन तेषां शीर्षाणि[w] पिच्चीयन्ति। केन[x] तं रौरवं। तत्र ते नैरयिका[y] रोदन्ता न शक्नोन्ति[z] अंवेति[a] वा तातेति वा बान्धवानुपेतुं[b]। तेनेदं[c] रौरवन्ति[d] संज्ञितं।

तपनो निरयो[e]। तत्र ते नैरयिका ओरुद्धा बहूनि प्राणिसहस्राणि तिष्ठन्ति[f]। ते दानि आर्द्र[g] वृक्षे वा वर्जेत्वा[h] खादन्ति। यदा दानि भवन्ति निर्मान्सा अस्थि-संकलिका[i] ओरुद्धा स्नायुयुक्ता[j] ते दानि संमूर्च्छित्वा[k] सहवेदना प्रपतन्ति। अथ तेषां कर्मविपाकतो[l] शीतलको वातो उपवायति[m]। तेन तेषां छविमान्सलोहितं[n] उपजायति[o]। अथ[p] ते पुरतो प्रवेशेन्ति[q] ते तथाभूता। कस्य कर्मस्य विपाकेन[r] तत्र सत्वा उपपद्यन्ति। येहि इह[s] अद्वारका घरा प्रतियत्ता भवन्ति तेषां भित्तियो[t] लिस्तापत्तियायं[u] (?) भवन्ति जीवन्तका[v] प्राणका तत्रापि[w] वा कर्तरिकाहि[x] प्रशस्ता[y] भवन्ति, तस्य[z] कर्मस्य[a] विपाकेन तत्र सत्वा उपपद्यन्ति। तत्र कस्य कर्मस्य विपाकेन खज्जन्ति[b]। येहि इह जीवन्तका प्राणका खादापिता[c] भवन्ति[d] सिंहेहि व्याघ्रेहि[e] द्वीपिहि ऋक्षेहि[f] तरक्षुहि[g] तस्य कर्मस्य Sen. 25
विपाकेन खज्जन्ति[h]। कस्य कर्मस्य विपाकतो[i] तेषां शीतको[j] वातो[k] उपवायति[l]। येहि इध[m] निवापकभोजनानि[n] दत्तानि[o] भवन्ति[p] मृगाणां महिषाणां[q] सूकराणां[r] कुक्कुटानां स्थूलमान्सार्थाय[s] वधिष्यामि[t] त्ति[u] तस्य कर्मस्य विपाकतो तेषां शीतको[v] वातो उपवायति[w]। केनैष[x] तपनो[y]। नैरयिका दह्यन्ति[z] तेनैषो[a][b] तपनो[c] नाम नरको आयसेहि[d] शूलेहि सन्तप्तेहि[e] समन्ततो हि अनुप्रवारितो[f]। तत्र ते[g] नैरयिका केचि[h] एकशूलेनायुता[i] पच्चन्ति[j] केचि[k] द्विहि केचि यावद्दशहि[l] शूलेहि[m] आयुता[n] पच्यन्ति। यदा दानि एकं पार्श्वं[o] पक्वं

भवति[a] विस्तीर्णमथ[b] द्वितीयेन[c] पार्श्वेन[d]। अप्येकत्या[e] नैरयिका[f] अधिमात्रत्वात्पापकानाम[g]-कुशलानां कर्मणां विपाकतो स्वयमेव[h] अनुपरिवर्तयन्ति। ते[i] तथाभूता[j] अधिमात्रां[k] वेदना[l] वेदयन्ति। कस्य[m] कर्मस्य विपाकतो तत्र सत्वा उपपद्यन्ति। येहि इह जीव-शूलिका कारिता[n] भवन्ति एडकायो[o] ते[p] तस्य कर्मस्य विपाकतो तत्र सत्वा उपपद्यन्ति। एवं खलु पुनः आधिपतेयमात्रमेतं[q] तत्रोपपत्तेः[r]। तत्रोपपन्नाः[s] अन्येषां[t] पि पापकानाम-कुशलानां कर्मणां विपाकं प्रत्यनुभवन्ति।......

...केनैष[u] अवीचि नाम[v]। तस्य[w] पुरस्तिमातो कुड्डातो अर्चियो[x] पश्चिमे[y] कुड्डे
Sen. 26 प्रतिहन्यन्ति[z] पश्चिमातो कुड्डातो[a] अर्चियो[b] पुरस्तिमे कुड्डे[c] प्रतिहन्यन्ति दक्षिणातो कुड्डातो अर्चियो[d] उत्तरे कुड्डे प्रतिहन्यन्ति[e] उत्तरातो कुड्डातो अर्चियो दक्षिणे कुड्डे प्रतिहन्यन्ति। भूमिये[f] उत्पत्तिता[g] अर्चियो तले प्रतिहन्यन्ति[h] तला निपतितायो अर्चियो भूमिये[i] प्रति-हन्यन्ति सर्वोर्ध्वीहि[j] सो नरको प्रतिबद्धो[k]। तत्र ते नैरयिका बहूनि प्राणसहस्राणि यथा[l] काष्ठानि एवं विचित्रं[m] पच्यन्ति[n]। ते तथाभूता[o] दुःखां तीव्रां खरां कटुकां[p] वेदना[q] वेदयन्ति न चैवं[r] तावत्[s] कालं करोन्ति यावत्[t] सानं[u] न तत्पापकं[v] कर्म[w] व्यन्तीकृतं[x] भवति। एवन्तं[y] पूर्वे[z] मनुष्यभूतेहि[a] अभिसंस्कृतं[b] अभिसमादियित्वा[c] नियतं[d] वेदनीयं[e]। एवं खलु पुन[f] आधिपतेय-मात्रमेतन्तत्रोपपत्तेः[g][h]। तत्रोपपन्ना[i] अन्येषां पि पापकानामकुशलानां कर्माणां विपाकं प्रत्यनुभवन्ति। कस्य कर्मस्य विपाकेन[j] तत्र सत्वा उपपद्यन्ति। ये इह मातृघातका[k] वा भवन्ति पितृघातका[l] वा[m] अर्हन्तघातका[n] वा[o] तथागतस्य वा दुष्टचित्ता[p] रुधिरोत्पादका[q] वा सर्वेषामपि[r] ईदृशानामकुशलानां कर्मपथानां[s] विपाकेन तत्र सत्वा उपपद्यन्ति। एवं खलु पुनर्विविधानां[t] पापकानामकुशलानां[u] कर्माणां[v] विपाकेन तत्र सत्वा उपपद्यन्ति। तेनैष अवीचि[w] इति वुच्चति[x]। तत्र[y] ते नैरयिका अवीचिं[z] कटुकां तीव्रां[a] खरां वेदना[b] वेदयन्ति[c] नो यथान्येषु नरकेषु नरकपाला भीता[d] कर्माणि[e] कारापेन्ति शीतको वातो[f]

उपवायति[a] यथा[b] अन्यत्र न[c] एवं तत्र। अत्र खलु अवीचि[d] महानरके[e] दुःखां[f] तीव्रां खरां कटुकां वेदना[g] वेदयन्ति तेनैषो[h] अवीची[i] नाम महानरको[j]।

इति श्रीमहावस्तुअवदाने नरकपरिवर्तं नाम सूत्रं समाप्तं। Sen. 27

आयुष्मान्[k] महामौद्गल्यायनो[l] अभीक्ष्णं[m] तिरच्छानचारिकां[n] गच्छति[o]। सो पश्यति[p] तिरच्छानयोनिषु[q] सत्वा[r] उपपन्ना विविधा[s] दुःखानि प्रत्यनुभवन्तो[t]। आयुष्मां[u] कोलितो[v] स्थविरो[w] चरन्तो तिरच्छानचारिकां अद्राक्षीत्तिर्यग्योनिषु[x] सत्वां परमदुःखिता[y] शुष्कार्द्राणि[z] तृणानि मुखुल्लोचकं[a] परिभुजन्तां[b] शीतोष्णानि च पानीयानि[c] पिबन्तां न च सानं माता प्रज्ञायति न पिता न भ्राता न भगिनी न गुरु न गुरुस्थानीयो न मित्रज्ञाति[d]-सालोहितं[e]। अन्यमन्यं[f] खादन्ति[g] अन्यमन्यस्य शोणितं पिबन्ति[h] अन्यमन्यं घातेन्ति[i] अन्यमन्यं[j] विसुभन्ति। ते[k] तमातो तमं गच्छन्ति[l] अपायातो[m] अपायं गच्छन्ति[n] दुर्गतिहि[o] दुर्गतिं[p] गच्छन्ति विनिपातातो[q] विनिपातं गच्छन्ति[r] विविधान्यपि[s] दुःखसहस्राणि प्रत्यनुभवन्ति[t] कृच्छ्रेण तिर्यग्योनिषु उच्छहन्ति[u]। सो तं तिर्यग्योनिषु[v] महन्तं आदीनवं[w] दृष्ट्वा जेतवनं गत्वा चतूर्णां[x] पर्षाणां[y] विस्तरेणारोचयसि[z]। एवं ये ते सत्वा तिर्यग्योनिषु[a] उपपन्ना विविधानि दुःखानि दुःखसहस्राणि प्रत्यनुभवन्ति[b] कृच्छ्रेण[c] तिर्यग्योनिषु[d] उच्छहन्ति। तस्मा[e] ज्ञातव्यं प्राप्तव्यं[f] बोद्धव्यं अभिसंबोद्धव्यं[g] कर्तव्यं ब्रह्मचर्यं[h] न च Sen. 28 वा लोके[i] किञ्चित्पापं[j] करणीयन्ति वदामि।

आयुष्मान् महामौद्गल्यायनो अभीक्ष्णं प्रेतचारिकां गच्छति[k]। सो पश्यति सत्वां[l] प्रेतलोके[m] उपपन्ना विविधानि दुःखसहस्राणि[n] प्रत्यनुभवन्तो[o]। आयुष्मान्[p] कोलितो स्थविरो चरन्तो[q] प्रेतचारिकां[r] अद्राक्षीत्प्रेतलोकस्मिं[s] प्रेतां[t] परमदुःखितां महाकायां[u] सूचीमुखां[v] सन्निरुद्धकण्ठां सततमभ्यवहरन्तां[w] तृप्तिं[x] नाधिगच्छन्तां[y]। किं पुनः[z] अकृत-पुण्यातो येन किञ्चित् न लभन्ति दुर्वर्णा[a] दुर्दर्शना[b][c] दुर्गन्धा[d] दुरुपेता[e] अल्पेशाख्या प्रतिकूल-[f]

दर्शना[a] नग्नका अप्रतिच्छन्ना क्षुत्पिपासा[b]समर्पिता उच्चार[c]प्रस्राव[d]खेटसिंहाणिका[e]पुब्वरुधिरं[f] संपिपासन्ति। तेषां कर्मविपाकतो[g] वातो[h] वायति अस्ति पानीयन्ति[i] अस्ति पानीयन्ति[j] अस्ति कूरं, अस्ति य्वागू ति ते तं घोषं श्रुत्वा नदीयो च पर्वतां[k] च लङ्घयित्वा गच्छन्ति[l] एत्थ[m] वयं खादिष्यामः, एत्थ वयं[n] भुंजिष्यामः[o] एत्थ वयं पिबिष्यामो[p] ति। तथा[q] ते पूर्वं[r] आशां[s] कृत्वा निराशा[t] भवन्ति[u]। तेषां नास्ति नास्तीति[v] वातो वायति ते तं शब्दं श्रुत्वा निराशा[w] तेनैव[x] अवकुब्जा प्रपतन्ति[y]। प्रेती गाथां भाषते[z]—

पंचानां वर्षशतानां[a] अयं घोषो मया श्रुतं[b]।
पानीयं[c] प्रेतलोकस्मि[d] पश्य याव[e] सुदुर्लभं[f] ॥१॥

Sen. 29 अपरा[g] प्रेती गाथां[h] भाषते।

पञ्चानां वर्षशतानामयं[i] घोषो मया श्रुतो[j]।
कूरो[k] ति लोके प्रेतस्मि पश्य याव[l] सुदुर्लभं ॥२॥

अपरा[m] प्रेती गाथां[n] भाषे।

पञ्चानां वर्षशतानामयं[o] घोषो मया श्रुतं[p]।
य्वागूति प्रेतलोकस्मि[q] पश्य याव[r] सुदुर्लभं ॥३॥

अपरा प्रेती गाथां भाषे[s]।

नदीमुपेन्ति[t] तृषिता[u] सिकता परिवर्तति[v]।
छायामुपेन्ति[w] सन्तप्ता आतपो[x] परिवर्तति ॥४॥

अपरा प्रेती[y] गाथां[z] भाषति।

धिग्जीवितं आजीविषु[a] यमन्तस्मि[b] नदामथ।
विद्यमानेषु भोगेषु प्रदीपं[c] न करोथ व ॥५॥

सो तं प्रेतलोके महन्तं[d] आदीनवं[e] दृष्ट्वा जेतवनमागत्वा[f] चतुर्णा[g] पर्षदानामनेक[h]-पर्ययेण विस्तरेणारोचयति[i]। एवं सत्वा प्रेतलोके उपपन्ना[j] विविधानि दुःखसहस्राणि

प्रत्यनुभवन्ति। तस्मात्[a] ज्ञातव्यं प्राप्तव्यं बोद्धव्यं अभिसंबोद्धव्यं[b] कर्तव्यं[c] कुशलञ्च[d] कर्तव्यं ब्रह्मचर्यं[e] न च वा लोके किंचित्पापं कर्म करणीयन्ति[f] वदेमि। स्थविरस्य श्रुत्वा अनेकप्राणसहस्राणि[g] देवमनुष्याणां[h] अमृतं प्रापुणेन्सु।

आयुष्मान् महामौद्गल्यायनो[i] अभीक्ष्णं असुरचारिकां गच्छति। सो पश्यति Sen. 30
असुरपुरे असुरां[j] प्रवृद्धमहाकाया उग्रदर्शना व्यापादबहुला असुरेषु[k] च्यवित्वा विनिपातेन्ता[l]। आयुष्मान्कोलितो[m] स्थविरो चरन्तो असुरचारिकामद्राक्षीत्सुरेषु[n] व्यापादेन सुदुःखितां पंच असुरगणान्[o]। तेषामेवं[p] भवति। वयं हेष्टा उपरि देवा[q]। ततः[r] कुप्यन्ति व्यापद्यन्ति अभिष्यन्दन्ति[s] कोपं च रोषं[t] च अप्रत्ययं च आविष्करोन्ति[u]। ते चतुरङ्गबलकायं[v] सन्नहित्वा हस्तिकायं अश्वकायं रथकायं[w] पत्तिकायं सन्नहित्वा देवगुल्मानि प्रभजन्ति[x] यदिदं करोटपाणयो[y] नाम यक्षा मालाधारा नाम यक्षाः सदामत्ता[z] नाम यक्षाः[a]। एतानि देवगुल्मानि[b] भंजित्वा देवेहि त्रायस्त्रिंशेहि[c] संग्रामेन्ति। ते[d] खु देवानां त्रायस्त्रिशानां[e] कृतपुण्यानां[f] महेशाख्यानामन्तिके[g] चित्तानि[h] प्रदूषयित्वा[i] कायस्य भेदात्परं मरणादपायदुर्गतिविनिपातनरकेषूपपद्यन्ति[j]। सो तं असुराणां महान्तमादीनवं दृष्ट्वा जेतवनमागत्वा चतुर्णां[k] पर्षाणां[l] विस्तरेणमारोचयति[m]। एवं सत्वा महासमुद्रे[n] असुरपुरे विविधानि दुःखानि प्रत्यनुभवन्ति[o]। तस्माज्ज्ञातव्यं[p] बोद्धव्यं[q] प्राप्तव्यं प्रतिसंबोद्धव्यं[r] कर्तव्यं ब्रह्मचर्यं[s] न च किञ्चिल्लोके पापं कर्म करणीयन्ति वदामि। स्थविरस्य श्रुत्वा बहूनि प्राणसहस्राणि[t] देवमनुष्याणाममृतं[u] प्रापयन्ति।

आयुष्मान् महामौद्गल्यायनो अभाक्ष्णं चतुर्महाराजिकेषु देवेषु चारिकां गच्छति। तत्र पश्यति चतुर्महाराजिकदेवां[v] कृतपुण्यां[w] महेशाख्यां[x] दीर्घायुष्कां[y] वर्णवन्तां[z] सुखबहुलां लाभी दिव्यस्यायुषः वर्णस्य सुखस्य ऐश्वर्यस्य परिवारस्य[a] लाभिनो दिव्यानां Sen. 31
रूपाणां शब्दानां गन्धानां रसानां प्रष्टव्यानां दिव्यानां वस्त्राणां[b] दिव्यानां आभरणानां[c]।

अग्रतो[a] आभरणानि आबद्धानि पृष्ठितो[b] दृश्यन्ते पृष्ठितो आबद्धानि अग्रतो दृश्यन्ति छाया[c] पि सानं न[d] दृश्यति स्वयंप्रभा अन्तरीक्षचरा[e] येनकामंगमा प्रभूतभक्षा[f] प्रचुरान्नपाना[g] दिव्येषु रतनामयेषु[h] विमानेषु दिव्येहि[i] पंचहि कामगुणेहि[j] समर्पिता समंगीभूता[k] क्रीडन्ता रमन्ता प्रविचारयन्ता[l]। संपत्ति[m] स्थविरो विपत्तिपर्यवसानं[n] पश्यति[o]। स्वयंप्रभा ततो[p] चातुर्महाराजिकेषु[q] च्यवमाना नरकेषूपपद्यन्ति[r] तिरच्छेषूपपद्यन्ते[s] प्रेतेषु असुरेषु कायेषु[t] उपपद्यन्ति[u]। स्थविरो दानि देवानां चातुर्महाराजिकानां तां विपरिणामदुःखतां[v] दृष्ट्वा[w] अहो कृच्छ्रं[x] ति जेतवनमागत्वा चतुर्णां[y] पर्षाणां विस्तरेणारोचयति[z]। एवं[a] सत्वा कुशलस्य कर्मस्य विपाकेन चातुर्महाराजिकेषु देवेषूपपद्यन्ति[b]। ते तत्र[c] दिव्यानि संपत्ती[d] अनुभवित्वा ततो[e] च्यवमाना नरकतिरिच्छप्रेतासुरेषु[f] कायेषु[g] उपपद्यन्ति। देवा पि अनित्याः अध्रुवाः विपरिणामधर्माणो[h][i]। तस्माज्ज्ञातव्यं[j] प्राप्तव्यं बोद्धव्यं[k] अभिसंबोद्धव्यं[l] कर्तव्यं[m] कुशलं च कर्तव्यं ब्रह्मचर्यं[n] न च वा लोके किञ्चित्पापं[o] कर्म करणीयन्ति वदामि[p]। स्थविरस्य श्रुत्वा बहूनि[q] प्राणसहस्राणि[r] देवमनुष्याणाममृतं[s] प्रापयन्ति[t]।

आयुष्मान्[u] महामौद्गल्यायनो[v] अभीक्ष्णं त्रायस्त्रिंशेषु देवेषु[w] चारिकां गच्छति[x]। तत्र पश्यति[y] त्रायस्त्रिंशां[z] देवां कृतपुण्यां[a] महेशाख्यां दीर्घायुष्कां बलवन्तां[c] सुखबहुलां[d]
Sen. 32 लाभी दिव्यस्यायुषः बलस्य सुखस्य ऐश्वर्यस्य परिवारस्य[e] दिव्यानां रूपाणां[f] शब्दानां गन्धानां रसानां स्पर्शानां वस्त्राभरणानां[g] कामगुणानां स्वयंप्रभा[h] अन्तरीक्षेचरा सुखस्थायिनो येनकामंगमा[i] प्रभूतभक्षा[j] प्रचुरान्नपानाः[k] दिव्येषु रतनामयेषु विमानेषु अष्टसु च महाउद्यानेषु[l] वैजयन्ते नन्दापुष्करिणीपारिपात्रे[m] कोविदारे महावने[n] पारुष्यके[o] चित्ररथे नन्दने मिश्रकावने अपरेषु च रतनामयेषु[p] च विमानेषु दिव्येहि[q] पंचहि कामगुणेहि समर्पिता[r] समङ्गीभूता[s] क्रीडन्ता[t] रमन्ता परिचारयन्ता[u]। शक्रो पि देवानामिन्द्रो वैजयन्ते प्रासादे[v] अशीतिहि अप्सरसहस्रेहि[w] परिवृतः[x] दिव्येहि पंचकामगुणेहि समर्पितो

समंगीभूतो[a] क्रीडन्तो रमन्तो प्रविचारयन्तो[b]। स्थविरो तां देवानां[c] त्रायस्त्रिशानां तादृशीं समृद्धिं दृष्ट्वा दिव्यां[d] संपत्तिं दृष्ट्वा सुदर्शनं च देवनगरं दृष्ट्वा सप्तरतनामयं[e] सुदर्शनस्य देवनगरस्य[f] तं विधानं दृष्ट्वा[g] सुधर्म्मां[h] च देवसभां सर्ववैडूर्यमयीं[i] योजन-साहस्रिकां[j] दृष्ट्वा यत्र देवा[k] त्रायस्त्रिशाः शक्रो[l] च देवानामिन्द्रो सन्निषण्णा[m] सन्निपतिता[n] देवकरणीयेषु वाह्चतो देवसभायां दृश्यन्ति[o] देवा पि त्रायस्त्रिशाः सुधर्मायि[p] देवसभाये निषण्णाः[q] सर्वं[r] सुदर्शनं[s] देवनगरं पश्यन्ति। एवं स्थविरो सर्वां[t] त्रायस्त्रिशानां देवानां समृद्धिं दृष्ट्वा जेतवनमागत्वा चतुर्णां[u] पर्षाणां[v] विस्तरेणारोचेति[w]। एवं सत्वा कुशलस्य कर्मस्य विपाकेन देवेषु त्रायस्त्रिशेषूपपन्ना[x] दिव्यायो संपत्तीयो[y] अनुभवन्ति। तं पि अनित्यमध्रुवं[z] विपरिणामधर्मि[a]। ततो[b] च्यवमाना नरकतिरिच्छप्रेतेषु[c] उपपद्यन्ति[d]। तस्माज्ज्ञातव्यं[e] प्राप्तव्यं बोद्धव्यं[f] अभिसंबोद्धव्यं[g] कर्तव्यं कुशलं[h] कर्तव्यं ब्रह्मचर्यं Sen. 33
न च वा लोके[i] किंचित्पापं[j] कर्म करणीयन्ति[k] वदेमि।

आयुष्मान् महामौद्गल्यायनोऽभीक्ष्णं[l] यामतुषितनिर्माण[m]रतिपरनिर्मित[n]वशवर्ति-ब्रह्मकायिका यावं[o] शुद्धावासां देवां[p] चारिकां गच्छति। सो पश्यति शुद्धावासकायिकां देवा[q] कृतपुण्या[r] महेशाख्यां[s] दीर्घायुष्कां वर्णवन्तां[t] सुखबहुलां[u] स्वयंप्रभा अन्तरीक्षावचरा[v] प्रीतिभक्षा[w] सुखस्थायिनो येनकामंगमा विगतरागा देवाहन्तो[x] अन्तरापरिनिर्वायी अनावर्तिकधर्मा[y] अस्मि लोके अव्यवकीर्णा[z] सर्वबाल[a]पृथग्जनेषु। स्थविरो[b] तान्तादृशीं[c] समृद्धिं देवानां दृष्ट्वा जेतवनमागत्वा चतुर्णां[d] पर्षाणां विस्तरेणारोचयति। एवं सत्वा कुशलस्य[e] कर्मस्य विपाकेन देवेषु[f] देवानां संपत्तीयोऽनुभवन्ति[g]। तं[h] पि अनित्यं[i] दुःख[j]विपरिणामधर्म्मं[k]।

सर्वं[l] आदीनवं लोकं सर्वं लोकं आदीपितं[m]।
सर्वं प्रज्वलितं[n] लोकं सर्वलोकं[o] प्रकम्पितं ॥६॥

अचलं[a] अप्रकम्पितं सपृथग्जनसेवितं[b] ।
बुद्धा धर्मं[c] देशयन्ति[d] उत्तमार्थस्य[e] प्राप्तये ।।७।।

तस्माज्ज्ञातव्यं[f] प्राप्तव्यं बोद्धव्यं[g] कर्तव्यं कुशलं[h] कर्तव्यं[i] ब्रह्मचर्यं न च[j] वा लोके किञ्चित्पापं[k] कर्म करणीयन्ति वदेमि । स्थविरस्य[l] श्रुत्वा अनेकानि प्राणसहस्राणि देवमनुष्याणां[m] अमृतं प्रापयन्ति ।

Sen: 34 भगवान्सम्यक्सम्बुद्धो[n] यदर्थं[o] समुदागतो तदर्थमभिसंभावयित्वा[p] राजगृहे विहरति गृध्रकूटे[q] पर्वते शास्ता देवानाञ्च मनुष्याणां[r] च सत्कृतो गुरुकृतो मानितो[s] पूजितो अपचितो लाभाग्रयशोग्रप्राप्तः[t] लाभी चीवरपिण्डपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्काराणां[u][v] तत्र[w] अनुपलिप्तो पद्ममिव जले पुण्यभागीयां सत्वां पुण्येहि निवेशेन्तो[x] फलभागीयां[y] सत्वां फलेहि प्रतिष्ठापयन्तो[z] वासनाभागीयां[a] सत्वां वासनायामवस्थापयन्तो[b] अमृतवर्षेण[c] देवमनुष्या[d] संविभजन्तो प्राणसहस्राणि अमृतमनुप्रापयन्तो[e] अनवराग्रजातिजरामरण-[f]संसारकान्तारनरकादिदुर्गसंसारकान्तारग्रहणदारुणातो[g] महाप्रपातातो[h] उद्धरित्वा क्षेमे स्थले[i] शमे शिवे अभये निर्वाणे प्रतिष्ठापयन्तो[j] आवर्जयित्वा[k] अङ्गमगधां[l] वज्जिमल्लां[m] काशिकोशलां[n] चेतिवत्समत्स्यां[o] शूरसेनां कुरुपंचालां[p] शिविदशार्णां[q] च अश्वकअवन्तीं[r] ज्ञानेषु[s] पराक्रम्य[t] स्वयंभू दिव्येहि विहारेहि आनिंजेहि[u] विहारेहि सान्तत्येहि[v] विहारेहि बुद्धो[w] बुद्धविहारेहि[x] जिनो जिनविहारेहि जानको जानकविहारेहि सर्वज्ञो सर्वज्ञविहारेहि चेतोवशिप्राप्तो[y] च पुनर्बुद्धो[z] भगवन्तो[a] येहि येहि विहारेहि' आकांक्षति विहरितुं तेहि तेहि विहारेहि विहरति[b] । अथ सो आयुष्मान् महामौद्गल्यायनो[c] काल्यस्यैव[d] निवासयित्वा राजगृहं नगरं पिण्डाय प्रक्रमि[e] । अथ[f] खल्वायुष्मतो महामौद्गल्यायनस्य[g] अचिर-[h]
Sen. 35 प्रक्रान्तस्य एतदभूषीत्[i] । अतिप्रागेव[j] खलु तावदेतर्हि[k] राजगृहे नगरे पिण्डाय चरितुं[l] यन्नूनाहं येन शुद्धावासो देवनिकायो तेनुपसंक्रमेयं । चिरं मे शुद्धावासं देवनिकायं[m] उपसंक्रान्तस्य[n] । अथ खल्वायुष्मान्[o] महामौद्गल्यायन पदवीतिहारेण[p] ऋद्धीये[q] येन[r]

शुद्धावासं देवनिकायं[a] तेन प्रक्रामि[b]। अद्राक्षुः सम्बहुला शुद्धावासकायिका[c] देवपुत्रा आयुष्मन्तं महामौद्गल्यायनं[d] दूरतो[e] येवागच्छन्तं दृष्ट्वा[f] च पुनर्येनायुष्मान्[g] महामौद्गल्यायनो[h] तेन प्रत्युद्गतासुः[i]। एत्थ[j] एत्थ आर्यो[k] महामौद्गल्यायनो[l]। स्वागतमार्यमहामौद्गल्यायनस्य[m] अनुरागमार्यस्य[n] महामौद्गल्यायनस्य[o]। चिरस्य पुनः[p] आर्यो महामौद्गल्यायनो[q] पर्यायमकार्षीत्[r] यदिदं[s] इह आगमनाय[t]। अथ खलु ते[u] संबहुला शुद्धावासकायिका देवपुत्रा आयुष्मतो महामौद्गल्यायनस्य[v] पादौ शिरसा[w] वन्दित्वा एकमन्ते[x] स्थिता। तत्र अन्यतरो[y] शुद्धावासकायिको[z] देवपुत्रो आयुष्मन्तं महामौद्गल्यायनमेतदवोचत्[a]। आश्चर्यमिदमार्य महामौद्गल्यायन[b] अद्भुतमिदमार्य[c] महामौद्गल्यायन[d] यावद्दुःखसमुदानीया[e] अनुत्तरा[f] सम्यक्संबोधिः[g] यदिदं कल्पानां[h] शतसहस्रेण। अथ खलु भगवन्सो[i] शुद्धावासकायिको[j] देवपुत्रो आयुष्मन्तं[k] महामौद्गल्यायनं[l] अध्यभाषि[m]। कल्पान[n] शतसहस्रं[o] अभियो[p] नाम भिक्षु सरागो अभूषि[q] सदोषो[r] समोहो[s]। तेन खलु पुनः[t] मौद्गल्यायन समयेन[u] वसुमतं[v] नाम नगरं अभूषि ऋद्धं च स्फीतं च क्षेमं च Sen. 36
सुभिक्षं[w] च आकीर्णजनमनुष्यं च सुखितजनमनुष्यं[x] च बहुजनमनुष्यं च प्रशान्तदण्डडमरं[y] सुनिगृहीत[z]तस्कर[a]व्यवहार[b]सम्पन्नं। वसुमते[c] खलु पुनर्मौद्गल्यायन[d] महानगरे[e] उत्तियो[f] नाम श्रेष्ठी[g] अभूषि[h] कृतपुण्यो महेशाख्यो[i] आढ्यो महाधनो महाभोगो[j] प्रभूतस्वापतेयो[k] प्रभूतधन[l]धान्यकोशकोष्ठागारो[m] प्रभूतजात[n]रूपरजतवित्तोपकरणो[o] प्रभूतहस्त्यश्वगवेडको[p] प्रभूतदासीदासकर्मकर[q]पौरुषेयो भगवतो सर्वाभिभुस्य[r] शासने श्रद्धाप्रसन्नो[s] बुद्धधर्मसंघमङ्गलो[t] नन्दादीनां[u] भिक्षूणामभिप्रसन्नो[v]। अथ खलु मौद्गल्यायन नन्दो[w] च[x] भिक्षुः अभियो[y] च भिक्षुः उत्तीयस्य[z] श्रेष्ठिस्य[a] गृहमुपसंक्रमेयुः[b]। नन्दो मौद्गल्यायन[c] भिक्षुः[d] तस्मिं श्रेष्ठिकुले[e] सत्कृतो[f] अभूषि गुरुकृतो मानितः[g] पूजितः[h] अपचितः[i] न तथा अभियो[j] भिक्षुः[k]। उत्तियस्य[l] खलु पुनः मौद्गल्यायन[m] श्रेष्ठिस्य[n] धीता वसुमते[o] महानगरे अन्यतरस्य[p] गृहपतिमहाशालस्य[q] भार्या अभूषि। सा[r] मौद्गल्यायन[s] नन्दस्य[t] भिक्षुस्य

अतीवाभिप्रसन्ना अभूषि। अथ खलु[a] महामौद्गल्यायन[b] अभियो[c] भिक्षुः नन्दं भिक्षुं[d] ईर्ष्याप्रकृतेन अभूतेनाब्रह्मचर्यवादेन[e] अनुध्वंसेति[f]। अब्रह्मचारी नन्दो भिक्षुः पापधर्मा असंयतो[g] प्रतिच्छन्नपापकर्मान्तो[h]। उत्तियस्य[i] श्रेष्ठिस्य[j] धीतुः सार्द्धं विप्रदुष्टो[k]। तं
Sen. 37 सेवितं[l] वसुमते महानगरे यं महाजनकायेन श्रोतव्यं[m] श्रद्धातव्यं मन्येन्सुः[n]। अथ[o] खलु महामौद्गल्यायन[p] नन्दं भिक्षुं वसुमते महानगरे ब्राह्मणगृहपतिका[q] उत्तियो[r] च श्रेष्ठी[s] न भूयो[t] तथा सत्करितव्यं[u] गुरुकर्तव्यं मानयितव्यं पूजयितव्यं मन्येन्सुः[v] यथा पूर्वं[w]। लभ्यं सत्पुरुषा प्रत्यागच्छन्ति[x] अकुशलेन[y] कर्मणा[z] विप्रतिसारी[a] भवन्ति। अथ खलु महामौद्गल्यायन[b] अभियस्य[c] भिक्षुस्य[d] एतदभूषि[e]। नन्दो भिक्षु वीतरागो विगतदोषो विगतमोहो अरहो महाभागो[f] सो च मये[g] ईर्ष्याप्रकृतेन[h] अभूतेनाब्रह्मचर्यवादेन[i][j] अनुध्वंसितो[k]। मया[l] बहुं अपुण्यं प्रसूतं[m]। यन्नूनाहं[n] नन्दं[o] भिक्षुं[p] क्षमापेयं[q] भगवतो च सर्वाभिभुस्य[r] अन्तिके अत्ययं[s] देशेयं[t]। अथ खलु महामौद्गल्यायन[u] अभियो[v] भिक्षु[w] नन्दं[x] भिक्षं क्षमापयामास[y] भगवतो[z] च सर्वाभिभूस्य[a] अन्तिके अत्ययं[b] देशेति[c]। अथ खलु[d] महामौद्गल्यायन अभियो[e] भिक्षुः येन उत्तियो[f] श्रेष्ठिस्तेनोपसंक्रमित्वा[g][h] उत्तियं[i] श्रेष्ठिमेतदवोचत्। इच्छेयमहं गृहपति भगवतो सर्वाभिभूस्य[j] सश्रावकसंघस्य अधिकारं[k] कर्तुं देहि मे अर्थमात्रं। अदासि[l] महामौद्गल्यायन[m] उत्तियो श्रेष्ठि[n] अभियस्य
Sen. 38 भिक्षुस्य[o] प्रभूतं[p] हिरण्यं सुवर्णं[q] तदन्ये[r] पि गृहपतिमहाशालाः। अथ खलु महामौद्गल्यायन[s] वसुमते महानगरे दुवे गन्धिकमहत्तरका[t] अभियस्य[u] भिक्षुस्य अभिप्रसन्ना[v] अभूषि। अथ खलु महामौद्गल्यायनोऽभियो[w] भिक्षु शतसहस्रहस्तो[x] येन ते दुवे गन्धिक[y]महत्तरका[z] तेनोपसंक्रमित्वा[a] दुवे गन्धिकमहत्तरकां[b] एतदवोचत्। इच्छामि वासिष्ठाहो[c] इमस्य शतसहस्रस्य[d] केशरं[e]। परिहरियाहं[f] भगवतो सर्वाभिभूस्य[g] सश्रावकसंघस्य अधिकारं करोमि[h]। परिहरेन्सुः[i] महामौद्गल्यायन[j] ते दुवे गन्धिकमहत्तरका शतसहस्र[k]केशरं। अथ खलु[l] महामौद्गल्यायन अभियो भिक्षुः भगवन्तं सर्वाभिभूं[m] सश्रावकसंघं[n]

प्रभूतेन खादनीय[a]भोजनीयआस्वादनीयेन सन्तर्पयित्वा[b] संप्रचारयित्वा[c] भुक्ताविं[d] धौतपाणिं[e]
अपनीतपात्रं विदित्वा तेन शतसहस्त्र[f]केशरेण भगवन्तं सर्वाभिभूं[g] सश्रावकसंघं ओकिरेसि[h]
अध्योकिरेसि प्रकिरेसि ओकिरित्वा[i] अध्योकिरित्वा अभिप्रकिरित्वा[j] एवं चित्तं[k]
उत्पादेसि[l]। अहो[m] पुनरहं पि अनागतमध्वानं भवेयं तथागतो[n] अरहो[o] सम्यक्[p]संबुद्धो[q]
विद्याचरणसम्पन्नो[r] सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां
च यथायं भगवां[s] सर्वाभिभू[t] एतरहेसि[u]। एवं द्वात्रिंशत्[v]महापुरुषलक्षणेहि[w] समन्वागतो[x]
भवेयं अशीतिहि अनुव्यञ्जनेहि अनुविराजित[y]शरीरो अष्टादशावेणिकेहि[z] बुद्धधर्मेहि
समन्वागतो दशहि[a] तथागतबलेहि[b] बलवां[c] चतुर्हि[d] वैशारद्येहि विशारदो यथायं Sen. 39
भगवान् सर्वाभिभू[e] एतरहेसि[f]। एवं[g] च अनुत्तरं धर्मचक्रं[h] प्रवर्तेयं अप्रवर्तितं श्रमणेन[i]
वा ब्राह्मणेन वा देवेन वा मारेण[j] वा[k] ब्रह्मणा वा केनचिद्वा पुनर्लोके[l] सह धर्मेण एवं च
समग्रं[m] श्रावकसंघं[n] परिहरेयं[o] यथायं भगवां[p] सर्वाभिभू[q] एतरहेसि[r]। एवं[s] च देवमनुष्या
श्रोतव्यं[t] श्रद्धातव्यं[u] मन्येन्सुः[v] यथा[w] वेदं भगवतो[x] सर्वाभिभूस्य[y] एतरहि[z]। एवं[a] तीर्णो
तारेयं[b] मुक्तो[c] मोचयेयं आश्वस्तो[d] आश्वासेयं परिनिर्वृतो[e] परिनिर्वापयेयं[f] तं भवेयं
बहुजनहिताय[g] बहुजनसुखाय लोकानुकम्पायै[h] महतो[i] जनकायस्यार्थाय[j] हिताय[k] देवानां च
मनुष्याणां[l] च। अथ खलु[m] महामौद्गल्यायन[n] भगवां[o] सर्वाभिभू[p] अभियस्य[q] भिक्षो
इदमेवरूपं[r] प्रणिधानं[s] विदित्वा एतदवोचत्। भविष्यसि[t] त्वं अभिय अनागतेऽध्वनि
शतसहस्रकल्पे शाक्यमुनि[u] नाम तथागतोऽर्हन्सम्यक्संबुद्धो[v] विद्याचरणसंपन्नो सुगतो
लोकविदनुत्तरः पुरुषदम्य[w]सारथिः[x] शास्ता[y] देवानां च मनुष्याणां[z] च यथाप्य[a]हमेतर्हि[b]
द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतो[c] अशीतिहि अनुव्यञ्जनेहि[d] विराजितशरीरो
अष्टादशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतो दशतथागतबलेहि बलवां चतुर्हि
वैशारद्येहि सुविशारदो यथापि[e] अहं[f] एतरहि[g]। एवं[h] च अनुत्तरं धर्मचक्रं प्रवर्तयिष्यसि
अप्रवर्तितं[i] श्रमणेन[j] वा देवेन वा मारेण वा केनचिद्वा पुनर्लोके[k] सह धर्मेण[l]। एवं च

Sen. 40 समग्र[a] श्रावकसंघं[b] परिहरिष्यसि[c] यथाप्यहमेतर्हि। एवं च ते देवमनुष्या श्रोतव्यं[d] श्रद्धातव्यं मन्येन्सुः[e] यथापि मम[f] एतरहि। एवं तीर्णो[g] तारयिष्यसि मुक्तो मोचयिष्यसि आश्वस्तो आश्वासयिष्यसि परिनिर्वृतो[h] परिनिर्वापयिष्यसि[i] यथापि[j] अहं[k] एतरहिं। तं भविष्यसि बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनकायस्यार्थाय[l] हिताय सुखाय देवानां च मनुष्याणां[m] च। समनन्तरव्याकृतो[n] च पुनः[o] महामौद्गल्यायन[p] अभियो भिक्षुः सर्वाभिभूना[q] सम्यक्[r]संबुद्धेन[s] अनुत्तराये[t] सम्यक्संबुद्धाय[u] अथायं त्रिसाहस्रमहा-साहस्रो[v] लोकधातुः[w] कंपे प्रकंपे अतीव[x] षड्विकारं[y]। पुरस्तिमा दिशा उन्नमति[z] पश्चिमा दिशा ओनमति[a] पुरस्तिमा दिशा ओनमति[b] पश्चिमा दिशा उन्नमति दक्षिणा दिशा उन्नमति उत्तरा[c] दिशा ओनमति[d] दक्षिणा दिशा ओनमति[e] उत्तरा[f] दिशा उन्नमति मध्यातो[g] ओनमति अन्तेषु उन्नमति[h] मध्यातो उन्नमति अन्तेषु[i] ओनमति। भूम्या[j] च देवा घोषमुदीरयेन्सुः[k] शब्दमनुश्रावयेन्सुः[l]। एषोऽभियो[m] भिक्षुः भगवता[n] सर्वाभिभूना[o] सम्यक्संबुद्धेन[p] अनुत्तराये[q] सम्यक्[r]संबोधये[s] व्याकृतो तं भविष्यति[t] बहुजनहिताय बहुजन-सुखाय लोकानुकम्पाय[u] महतो जनकायस्यार्थाय[v] हिताय सुखाय देवानां च मनुष्याणां[w] च। भूम्यानां[x] देवानां घोषं श्रुत्वा अन्तरीक्षेचरा[y] देवा[z] चतुर्महाराजिका देवा त्रायस्त्रिंशा[a] देवा[b] यामा तुषिता निर्माणरतयो[c] परनिर्मितवशवर्तिनो[d] देवा याव ब्रह्मकायिका देवा[e]
Sen. 41 घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सुः[f]। एवं मार्षा[g] अभियो भिक्षु[h] भगवता सर्वाभिभूना[i] अनुत्तराये[j] सम्यक्[k]संबोधये[l] व्याकृतो[m] तं भविष्यति बहुजनहिताय बहुजनसुखाय लोकानु-कम्पाय[n] महतो जनकायस्यार्थाय[o] हिताय[p] सुखाय[q] देवानां च मनुष्याणां च। अप्रमेयस्य उदारस्य च महतो[r] अवभासस्य[s] लोके प्रादुर्भावो[t] अभूषि। या च ता लोके लोकान्तरिका[u] अन्धकारा अन्धकारार्पिता तमिस्रा तमिस्रार्पिता अघा[v] असंविदिता असंविदितपूर्वा[w] यत्र इमे पि चन्द्रमसूर्या[x] एवं[y] महर्द्धिका महानुभावा आभया[z] आभां नाभिसंभुणन्ति[a] आलोकेन वा आलोकं अकाले[b] अपि तेनावभासेन[c] स्फुटा अभुन्सुः। ये[d] पि तत्र सत्वा उपपन्ना[e] ते

पि अन्यमन्यं[a] संजल्पेषु[b]। अन्ये पि किल भो इह सत्वा उपपन्ना[c] अन्ये पि[d] किल भो इह सत्वा उपपन्ना[e] अन्ये पि किल भो इह सत्वा उपपन्ना[f]। एकान्तसुखसमर्पिता च पुनस्तत्क्षणं[g] तत्मुहूर्तं[h] सर्वे[i] सत्वा अभुन्सुः[j] ये पि अवीचिस्मि[k] महानरके[l] उपपन्ना अतिक्रम्य[m] येव[n] देवानां देवानुभावं[o] नागानां[p] नागानुभावं यक्षाणां[q] यक्षानुभावं[r]। ध्यामानि[s] च[t] अभुन्सुः मारभवनानि[u] निस्तेजानि[v] निरभिरम्यानि[w]। क्रोशिकानि[x] पि च खण्डानि[y] Sen. 42
प्रपतेन्सुः[z] द्विक्रोशिकानि[a] पि च त्रिक्रोशिकानि[b] पि च खण्डानि प्रपतेन्सुः[c] योजनिकानि[d] पि च खण्डानि प्रपतेन्सुः[e] द्वे पंचयोजनिकानि[f] पि[g] च खण्डानि प्रपतेन्सुः[h]। मारो च पापीमां[i] दुःखी दुर्मनो विप्रतिसारी अन्तःशल्यपरिदाघजातो[j][k] अभूषि।

अनुगीतगाथा।

सो तं दानं दत्वा प्रणिधेसि[l] लोकनायको अस्य[m]।
देवमनुष्याचार्यो[n] आर्यं[o] धर्मं[p] प्रकाशेयं[q] ॥८॥
धर्मोल्कां[r] विचरेयं पराहणे धर्मभेरीं[s] सपताकां।
उच्छ्रेयं[t] धर्मकेतुं[u] आर्यं[v] शंखं प्रपूरेयं ॥९॥
एवं च मह्यं अस्या प्रकाशना[w] देशना च धर्मस्य[x]।
एवं च बहू[y] सत्वा आर्ये[z] धर्मे[a] निवेशेयं[b] ॥१०॥
एवं[c] च मे श्रुणेन्सुः[d] देवमनुष्या[e] सुभाषितं[f] वाक्यं[g]।
एवं च धर्मचक्रं प्रवर्तये[h] बहुजनहिताय[i] ॥११॥
कृच्छ्रापन्नैः[j] सत्वैः[k] जातिजरापीडितैर्[l]मरणधर्मैः[m]।
भवचक्षुकैः[n] अपाया[o] प्रज्ञास्कन्धं निवेशेयं ॥१२॥
संजीवे[p] कालसूत्रे[q] संघाते[r] रौरवे अवीचिस्मि[s]।
षट्सु गतीहि[t] विकीर्णां भवसंसारात्प्रमोचेयं[u][v] ॥१३॥

Sen. 43 नरके[a] पक्कविपक्का[b] अपायप्रपीडितां[c] मरणधर्मा[d] ।
अल्पसुखदुःखबहुलां भवसंसारात्प्रमोचेयं[e] ॥१४॥

अर्थं[f] चरेयं[g] लोके[h] देवमनुष्याणां[i] देशिय धर्मं[j] ।
एवं विनेय[k] सत्वां यथा[l] अयं लोकप्रद्योतो[m] ॥१५॥

एवं अहं[n] लोकमिमं चरेयं यथा[o] अयं चरति[p] असंगमानसो[q] ।
चक्रं[r] च वर्तेय अनन्यसादृशो[s] सुसत्कृतो[t] देवमनुष्यपूजितो ॥१६॥

प्रणिधिं[u] च ज्ञात्वा[v] सुसमुद्गतो[w] जिनो सर्वेहि[x] हेतूभि[y] उपस्थितेहि ।
अखण्डअच्छिद्रमव्रणं वियाकरे[z] अर्थदर्शी मतिमां ॥१७॥

बुद्धो[a] तुवं होहिसि लोकनायको[b] अनागते[c] कल्पशतसहस्रे ।
कपिलाह्वये[d] ऋषिवदनस्मि[e] शाकियो तदा[f] अयं प्रणिधिविपाकमेष्यति[g] ॥१८॥

अथ[h] सागरावलिमही[i] प्रकम्पते च दिवि देवसंघेषु[j] ।
व्याकरणं[k] तस्य द्युतिमतो[l] अभ्युद्गमि अभ्युद्गतं[m] घोषं ॥१९॥

Sen. 44 एष[n] अभियो भगवता[o] अत्यन्तसुभाषितगीतध्वजेन[p] ।
सर्वाभिभुना[q] मुनिना[r] वियाकृतो[s] होहिसि जिनो त्वं ॥२०॥

तं हितसुखाय[t] होहिसि[u] सब्रह्मसुरासुरस्य लोकस्य[v] ।
हायिष्यति[w] असुरकायं[x] नरमरुसंघो विवर्द्धन्ति[y] ॥२१॥

अथ खलु[z] महामौद्गल्यायन[a] ते दुवे गन्धिकमहत्तरका अभियस्य[b] अनुत्तराये[c] सम्यक्संबोधये[d] व्याकरणं श्रुत्वा हृष्टा[e] तुष्टाः प्रमुदिताः प्रीतिसौमनस्यजाता[f] एवं[g] चित्तमुत्पादेन्सुः[h] । यदा[i] अभियो[j] भिक्षुः[k] अनुत्तरां[l] सम्यक्संबोधिमभिसंबुद्धो[m][n][o] भवेय तदा

वयमेतस्य[a] अग्रश्रावका[b] भवेयाम अग्रयुगो भद्रयुगो यथायं भवति सर्वाभिभूस्य[c] श्रावकयुगो[d] एको अग्रो[e] प्रज्ञाये[f] एको[g] अग्रो ऋद्धीये[h]। अश्रोषीत्[i] महामौद्गल्यायन[j] उत्तियस्य[k] श्रेष्ठिस्य[l] धीता अभियो[m] भिक्षुर्भगवता[n] सर्वाभिभूना[o] अनुत्तरायै[p] सम्यक्संबोधये[q] व्याकृतो। अथ महामौद्गल्यायन[r] उत्तियस्य श्रेष्ठिस्य[s] धीता तं भगवन्तं[t] सश्रावकसंघं सत्कृत्वा गुरुकृत्वा मानयित्वा पूजयित्वा अपचायित्वा एवं प्रणिधि मुत्पादेसि। मम अभियेन भिक्षुणा[u] ईर्ष्याप्रकृतेन[v] अभूतो[w] अभ्याख्यानो[x] दिन्नो[y]। यन्मया भगवतो सर्वाभिभूस्य[z] सश्रावकसंघस्य अधिकारं कृत्वा[a] कुशलमर्जितमहमेतेन[b] कुशलमूलेन[c] यत्र यत्र अभियो[d] भिक्षुरुत्पद्येय[e] तत्र तत्र[f] नं अभूतेन[g] अभ्याख्यानेन[h] अभ्याचिक्षेयं[i] यावत्परमसंबोधिप्राप्तं[j]। सिया ति Sen. 45
पुनर्[k]महामौद्गल्यायन[l] एवमस्य स्यात्[m]। अन्योऽसौ तेन कालेन तेन समयेन भगवतो सर्वाभिभूस्य[n] अभियो नाम श्रावको अभूषि[o]। न एतदेवं[p] द्रष्टव्यं। तत्कस्य हेतोः[q]? अहं[r] महामौद्गल्यायन[s] तेन कालेन तेन समयेन भगवतो सर्वाभिभूस्य[t] अभियो नाम श्रावको अभूषि[u]। सिया ति[v] पुनः[w] महामौद्गल्यायन[x] एवमस्य[y] स्यात्। अन्ये[z] ते तेन कालेन तेन[a] समयेन वसुमते[b] महानगरे दुवे गन्धिकमहत्तरका[c] अभुन्सुः[d]। न खल्वेतदेवं[e] द्रष्टव्यं। तत्कस्य हेतोः? यूयं ते शारिपुत्र[f] महामौद्गल्यायन[g] तेन कालेन तेन समयेन दुवे गन्धिकमहत्तरका[h] अभुन्सु[i]। तं[j] युष्माकं[k] मूलप्रणिधिं[l]। सिया ति पुनर्[m]महामौद्गल्यायन[n] एवमस्य[o] स्यात्। अन्या[p] सा तेन कालेन तेन समयेन उत्तियस्य श्रेष्ठिस्य[q] धीता अभूषि।.........। तेनषा[r] तीर्थिकांगना[s] प्रणिधानेन यत्र[t] यत्र उपपद्यामि[u] तत्र[v] तत्र अभूतं[w] अभ्याख्यानं देति[x] यावत्परमसंबोधिप्राप्तस्य[y][z]। सिया ति खलु पुनर्[a]महामौद्गल्यायन[b] एवमस्य[c] स्यात्। अन्यो[d] सो तेन[e] कालेन तेन समयेन वसुमते महानगरे उत्तियो नाम श्रेष्ठि[f] अभूषि[g]। न खल्वेतदेवं द्रष्टव्यं। एषो[h] सौ महामौद्गल्यायन शुद्धावासकायिको[i] देवपुत्रो[j] तेन कालेन तेन[k] समयेन वसुमते महानगरे उत्तियो नाम श्रेष्ठि[l] अभूषि। एतेषां कल्पानां[m] शतसहस्रं स्मरति धर्मं[n] समनुस्मरति।

इति श्रीमहावस्तुअवदाने अभियवस्तुं सानुगीतं समाप्तं[o]॥

Sen. 46 इतो भो महामौद्गल्यायन अपरिमितासंख्येया कल्पा यं मया बोधाय प्रणिहितं। अप्रमेयास्तथागता अर्हन्तः सम्यक्संबुद्धाः पूजिता नो चाहं व्याकृतो। त्रीणि मौद्गल्यायन पुष्पनामकानां शतानि मया पूजितानि नो चाहन्तेहि व्याकृतो। अप्रमेया असंखेया कल्पा संधाविता संसरिता अप्रमेया च संबुद्धा पूजिता नो चाहं तेहि व्याकृतो।

चतस्रः इह महामौद्गल्यायन बोधिसत्वचर्याः। कतमाश्चतस्रः? तद्यथा प्रकृतिचर्या प्रणिधानचर्या अनुलोमचर्या अनिवर्तनचर्या।

कतमा च महामौद्गल्यायन प्रकृतिचर्या? इह महामौद्गल्यायन बोधिसत्वप्रकृतिरेवं। भवन्ति मातृज्ञाः पितृज्ञा श्रामण्या ब्राह्मण्याः कुलज्येष्ठापचायकाः दशकुशलां कर्मपथां समादाय वर्तन्ते परेषां च देशयन्ति दानानि देथ करोथ पुण्यानीति तिष्ठन्तां च बुद्धां पूजयन्ति श्रावकांश्च नो च तावदनुत्तराय सम्यक्संबोधये चित्तमुत्पादेन्ति।

पूजयन्ति प्रथमं तथागतां गौरवेण महता महायशां।
Sen. 47 नैव ताव जनयन्ति मानसं अग्रपुद्गलगतं नरोत्तमा॥१॥

पूजयन्ति वशिभूतकोटियो पुर्वमेव वशिपारमिं गता।
नैव ताव जनयन्ति मानसं ज्ञानसागरतराय नायका॥२॥

ते च प्रत्येकबुद्धकोटियो पूजयन्ति परमार्थपुद्गला।
नैव ताव जनयन्ति मानसं सर्वधर्मविदुताय पण्डिता॥३॥

इयं महामौद्गल्यायन प्रकृतिचर्या।

कतमा च महामौद्गल्यायन प्रणिधिचर्या? इतो महामौद्गल्यायन अपरिमिता

असंख्येया कल्पा[a] यं शाक्यमुनिर्नाम[b] तथागतोऽर्हं[c] सम्यक्संबुद्धो लोके उदपादि विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः[d] शास्ता देवानां च मनुष्याणां[e] च । शाक्यमुनिस्य[f] खलु पुनः महामौद्गल्यायन[g] कपिलवस्तुं[h] नाम नगरं । विस्तरेण । तदाहं[i] श्रेष्ठि[j] अभूषि । य्वागूपानं[k] कृत्वा बोधाये[l] प्रणिहितं[m] ।

ते[n] यदा विपुलपुण्यसंचया[o]
भोन्ति भावितशरीरमानसा[p] ।
ते उपेत्य वररूपधारिणो[q] Sen. 48
बोधये[r] उपजनेन्ति[s] मानसं ॥४॥
यं मया कुशलमर्जितं[t] पुरा[u]
तेन मे भवतु सर्वदर्शिता[v] ।
मा[w] च मे प्रणिधी अवसीदतु[x]
यो यमेष[y] प्रणिधिः प्रवर्ततु[z] ॥५॥
यो ममं[a] कुशलमूल[b]संचयो[c]
सो[d] महा भवतु सर्वप्राणिहि[e] ।
यत्र कर्म अशुभं कृतं ममा
तं ममैव[f] कटुकं फलं[g] भवेत् ॥६॥
एवं[h] अहं लोकमिमं[i] चरेयं
यथा[j] अयं चरति असंगमानसो ।
चक्रं प्रवर्तेय[k] अनन्यसादृशं[l]
सुसत्कृतं[m] देवमनुष्यपूजितं ॥७॥

य्वागूपानं[n] प्रथमं अदासि[o] लोकोत्तरस्य बुद्धस्य शाक्यमुनिनो[p] भगवतो कल्पस्मि इतो[q] असंख्येये[r] । प्रथमा[s] प्रणिधि[t] तदा आसि ।

इतो[a] महामौद्गल्यायन[b] अपरिमिते असंख्येये[c] कल्पे[d] समिताविर्नाम[e] तथागतोऽर्हं[f]
Sen. 49 सम्यक्संबुद्धो लोके उदपादि विद्याचरणसंपन्नः[g] सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः[h]
शास्ता देवानां च मनुष्याणां[i] च। तेन खलु पुनस्समयेन[j] बोधिसत्वो राजा अभूषि
चक्रवर्ती[k] चातुर्द्वीपो[l] विजितावी[m] सप्तरत्नसमन्वागतो[n] धार्मिको[o] धर्मराजा[p] दशकुशलकर्मपथ-
समादायवर्ती[q]। इमानि सप्त रत्नानि अभुन्सुः[r], तद्यथेदं चक्ररत्नं[s] हस्तिरत्नमश्वरत्नं
मणिरत्नं स्त्रीरत्नं गृहपतिरत्नं परिणायकरत्नमेव सप्तमं। पूर्णं[t] चास्य पुत्रसहस्रं
अभूषि शूराणां[u] वीराणां वराङ्गरूपिणां[v] परसैन्यप्रमर्दकानां[w]। सो[x] इमानि चत्वारि
द्वीपानि सय्यथिदं[y] जम्बुद्वीपं[z] पूर्वविदेहं[a] अपरगोदानीयं उत्तरकुरुं[b] सागरगिरिपर्यन्ता-
मखिलामकण्ठकाम[c]दण्डेनाशस्त्रेणा[d]नुत्पीडेनादण्डेन धर्मेणे[e]मां पृथिवीम[f]भिजित्वा अध्या-
वसति। अथ खलु[g] महामौद्गल्यायन[h] राजा चक्रवर्ती[i] समिताविस्य[j] सम्यक्संबुद्धस्य
सश्रावकसंघस्य सर्वेण प्रत्युपस्थितो अभूषि[k] चीवरपिण्डपात्रशयनासन[l]ग्लानप्रत्ययभैषज्य-
परिष्कारेहि[m] सप्तरत्नमयं[n] च प्रासादं कारयेसि[o] सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य
स्फाटिकस्य मुसारगल्वस्य[p] लोहितिकायाः[q] चतुरशीतिहि स्तम्भसहस्रेहि[r] एकमेकञ्च
स्तम्भं आवद्ध[s]हिरण्य[t]कोटिहि निर्मितो[u] उपार्धस्य[v]। चुतुरशीति कूटागारसहस्राणि
कारयेसि[w] चित्राणि दर्शनीयानि[x] सप्तानां रत्नानां[y] तद्यथा सुवर्णस्य रूप्यस्य[z] मुक्ताया
वैडूर्यस्य[a] स्फाटिकस्य[b] मुसारगल्वस्य[c] लोहितिकाये[d]। तावल्लक्षणं[e] च महामौद्गल्यायन[f]
प्रासादं[g] कारयित्वा राजा चक्रवर्ती[h] समिताविस्य सम्यक्संबुद्धस्य[i] निर्यातेसि[j] एव[k] च
Sen. 50 प्रणिधेसि[l]। अहो पुनरहमनागतमध्वानं[m] भवेयं[n] तथागतोऽर्हं[o] सम्यक्संबुद्धो[p] विद्याचरण-
संपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः[q] शास्ता देवानां च मनुष्याणां च
यथापीदं[r] भगवान्[s]समिताविरेतर्हि[t] द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतो[u] अशी-
तिहि अनुव्यञ्जनेहि उपशोभितशरीरो अष्टादशावेणिकेहि[v] बुद्धधर्मेहि[w] समन्वागतो दशहि[x]
तथागतबलेहि[y] बलवां[z] चतुर्हि वैशारद्येहि[a] सुविशारदो[b] यथायं[c] भगवान्[d]समितावी सम्यक्-[e]

संबुद्धो एतर्हि[a] एवञ्च तीर्णो तारयेयं आश्वस्तो आश्वासयेयं परिनिर्वृतो[b] परिनिर्वापयेयं। तं भवेयं बहुजनहिताय[c] बहुजनसुखाय लोकानुकंपाय[d] महतो जनकायस्यार्थाय[e] सुखाय हिताय देवानां च मनुष्याणां[f] च। एवं महामौद्गल्यायन[g] तथागतस्य[h] अयं[i] प्रणिधिः।

एवं[j] अहं लोकमिमं[k] चरेयं
यथा[l] अयं चरति[m] असंगमानसो।
चक्रं[n] प्रवर्तेय अनन्यसादृशो[o]
भवेयमहं[p] देवमनुष्यपूजितो ॥८॥

अथ खलु समितावि[q]नो सम्यक्संबुद्धस्य[r] एतदभूषि[s]। किं नु खलु मयि परिनिर्वृते[t] इमेहि[u] च श्रावकेहि[v] परिनिर्वृतेहि इमस्मि[w] धर्माख्यानेऽन्तरहिते[x] इतो केत्तकस्य नु खलु[y] कालस्य बुद्धो भगवान्लोके[z] उपपदिष्यति[a]। एकस्मि[b] कल्पे नाद्राक्षीत्। द्विहि[c] कल्पेहि[d] Sen. 51 नाद्राक्षीत्[e]। कल्पसहस्रेण[f] बुद्धं लोके पश्यति। अथ खलु[g] महामौद्गल्यायन[h] समिता-[i]विस्य सम्यक्संबुद्धस्य[j] महता[k] कारुणेन समन्वागतस्य सत्वेषु महाकारुणं[l] ओक्रमि। पंच[m] च बुद्धकार्याणि अवश्यं[n] कर्तव्यानि[o]। कतमानि पंच[p] ? धर्मचक्रं प्रवर्तयितव्यं माता[q] विनेतव्या पिता विनेतव्यो[r] बौद्धवैनेयका[s] सत्वा[t] विनेतव्या युवराजा अभिषिंचितव्यो[u]। एषो ममात्ययेन बुद्धो लोके[v] भविष्यति[w] यथा एतर्हि[x] अहं तथा एष अजितो बोधिसत्वो ममात्ययेन बुद्धो लोके भविष्यतीति[y] अजितो नामेन मैत्रेयो[z] गोत्रेण बन्धुमायां[a] राजधान्यां[b]। यं नूनाहं कल्पानां शतसहस्रं[c] तिष्ठेहं[d]। अथ खलु समितावी[e] सम्यक्संबुद्धो भिक्षूना-[f]मन्त्रेसि[g]। इह[h] मह्यं रहोगतस्य एकस्य प्रतिसंलीनस्य[i] अयमेवरूपो[j] चेतसो परिवितर्को[k] उदपादि। किं नु खलु[l] मयि परिनिर्वृते इमेहि च श्रावकसंघेहि[m] परिनिर्वृतेहि इमस्मि धर्माख्याने[n] अन्तर्हिते इतो केत्तकस्य[o] नु[p] कालस्य[q] बुद्धो लोके उपपदिष्यति ? एकस्मि[r] कल्पे नाद्राक्षीत्[s]। द्वीहि[t] कल्पेहि नाद्राक्षीत्[u]। त्रीहि[v] कल्पेहि नाद्राक्षीत्[w]। कल्प-

शतसहस्रेण बुद्धं लोके पश्यामि[a]। पंच[b] मे बुद्धकार्याणि अवश्यं[c] कर्तव्यानि यो च सो
सत्वो युवराजाभिषिंचितव्यः सो दीर्घायुके[d]हि देवे[e]हि उपपन्नो[f]। यं[g] नूनाहं[h] कल्पानां
शतसहस्रं स्थातु[i]मिच्छाम्यहं[j] इच्छथ भिक्षवो कल्पानां शतसहस्रं स्थातुं को वा मया
Sen. 52 सार्धं[k] स्थास्यति[l]। तत्र[m] महामौद्गल्यायन[n] चतुरशीतिहि भिक्षुशतसहस्रे[o]हि सो लोको[p]
उद्गृहीतो[q] सर्वेहि[r] बलवशीभावप्राप्तेहि[s]। वयं भगवं[t] स्थास्यामः वयं सुगत स्थास्यामः।
अथ खलु समितावी[u] सम्यक्संबुद्धो ते च श्रावका[v] चिरं दीर्घमध्वानं तिष्ठेन्सुः[w]।
संवर्त[x]कालसमये[y] मनुष्या कालगता[z] आभास्वरे देवनिकाये[a] उपपद्यन्ति राजापि[b] कालगतो
आभास्वरे[c] देवनिकाये उपपद्यति भगवान् भिक्षुसंघेन सार्धं आभास्वरं देवनिकायं
गच्छति[d]। विवर्तनीयकालसमये संस्थिते[e] लोकसन्निवेशे सत्वा आयुःक्षयाय आभास्व-
राद्[f]देवनिकायतो[g] च्यवित्वा इच्छत्वमागच्छन्ति[h]। बोधिसत्वो पि आभास्वरा[i]-
द्देवनिकाया[j] च्यवित्वा इच्छत्वमागत्वा राजा भवति चक्रवर्ती[k] चातुर्द्वीपो[l] विजितावी
याव[m] इमानि चत्वारि[n] महाद्वीपानि धर्मेणैव अभिनिर्जिनित्वा[o] अध्यावसति। यदा
मनुष्या[p] परिमितायुष्का[q] भवन्ति जराव्याधिमरणा[r] च प्रज्ञायन्ति तदा भगवान्[s]समितावी
सश्रावकसंघो जम्बुद्वीप[t]मागच्छति। आगत्वा[u] सत्वानां धर्मं देशयति[v]। तथैव[w] राजा[x]
चक्रवर्ती समिताविस्य[y] सम्यक्संबुद्धस्य[z] सर्वेण प्रत्युपस्थितो[a] चीवरपिण्डपात्र[b]शयनासन[c]-
ग्लानप्रत्ययभैषज्यपरिष्कारेहि[d]। सप्तरत्नमयं प्रासादं तादृशमेव[e] कारापयित्वा[f] भगवतः[g]
सम्यक्संबुद्धस्य[h] निर्यातेसि[i]। एतेन उपायेन कल्पशतसहस्रं[j] समितावी[k] सम्यक्संबुद्धो[l]
स्थितो[m] सश्रावकसंघो कल्पशतसहस्रं[n] बोधिसत्वेन उपस्थितो[o] सर्वत्र च कल्पे सप्तरत्नमयं
Sen. 53 प्रासादं तादृशमेव[p] कारापयित्वा निर्यातेसि समिताविस्य[q] सम्यक्संबुद्धस्य[r]। अनुत्तरां[s]
सम्यक्संबोधिं[t] प्रार्थयमानो[u] प्रासादशतसहस्रं[v] रत्नमयं अहं[w] चक्रवर्ती सन्तो समिताविनो[x]
अदासि। कल्पस्मि[y] इतो[z] असंख्येये[a]।

सो तं दानं दत्वा प्रणिधेसि[b] लोकनायको अस्यां[c]।
देवमनुष्या[d]चार्यो[e] आर्यं[f] धर्मं[g] प्रकाशेय्यं[h] ॥६॥

एवं[a] च मह्यं अस्या[b] प्रकाशना[c] देशना च धर्मस्य[d]।
एवं च बहुं[e] सत्वं आर्ये[f] धर्मे निवेशेय्यं[g] ॥१०॥
एवं च मे श्रुणेन्सुः[h] देवमनुष्या सुभाषितं वाक्यं।
एवं च धर्मचक्रं[i] प्रवर्तये[j] बहुजनहिताय[k] ॥११॥
धर्मोल्कां[l] विचरेयं पराहणे धर्मभेरीं[m] सपताकां[n]।
उच्छ्रेयं[o] धर्मकेतुमार्यं[p][q] शंखं प्रपूरेयं[r] ॥१२॥
कृच्छ्रापन्ने[s] लोके[t] जातिजरापीडिते[u] मरणधर्मे[v]।
भवचक्षुके[w] अपाया प्रज्ञास्कन्धं[x] निवेशेयं[y] ॥१३॥
संजीवे[z] कालसूत्रे[a] संघाते[b] रौरवे अवीचिस्मिं[c]।
षट्सु गतीषु[d] विकीर्णा[e] भवसंसारात्प्रमोचेयं ॥१४॥
नरके[f] पक्वविपक्वां अपायप्रपीडितां[g] मरणधर्मां[h]।
अल्पसुखदुःखबहुलां[i] भवसंसारात्प्रमोचेयं[j][k] ॥१५॥
अर्थं[l] चरेयं लोके देवमनुष्याणां देशिय[m] धर्मं[n]। Sen. 54
एवं विनेय[o] सत्वां[p] यथा[q] अयं लोकप्रद्योतो[r][s] ॥१६॥

द्वितीयो[t] प्रणिधि तदासि। अशीति[u] चन्दनविमानानि अदासि लोकोत्तरस्य बुद्धस्य गुरुणो[v]। अहं भगवानस्यां[w] इतो असंख्येये[x]। तृतीयो[y] प्रणिधिः[z] तदासीत्। सप्तरतनमयानां[a] गुहानां[b] अशीति सहस्राणि[c] अर्को राजा अदासि[d] पर्वतनामस्य[e]। चतुर्थी[f] तदा प्रणिधिः[g] आसीत्। षड्वर्षाणि चरति[h] अनित्यसंज्ञानिमित्तकामेहि[i] रतनेन्द्रेणानुशासितो[j]। पंचमा[k] प्रणिधिः तदा[l] आसीत्।

इति श्रीमहावस्तुअवदाने बहुबुद्धसूत्रं समाप्तं ॥

एवं मया श्रुतमेकस्मिं समये[m] भगवां[n] राजगृहे विहरति स्म[o] गृध्रकूटे[p] पवते। अथ[q] खल्वायुष्मान्महामौद्गल्यायनो[r][s] काल्यमेव निवासयित्वा पात्रचीवरमादाय राजगृहं नगरं

पिण्डाय[a] प्रक्रमि[b]। अथ खल्वायुष्मतो[c] महामौद्[d]गल्यायनस्य[e] अचिरप्रक्रान्तस्यैतदभवत्[f]। अतिप्राग[g]स्तावदेतर्हिं[h] राजगृहं नगरं पिण्डाय चरितुं। यं नूनाहं[i] येन शुद्धावासं[j]
Sen. 55 देवनिकायं तेनोपसंक्रमेयं। अथायुष्मान्[k]महामौद्[l]गल्यायनः तद्यथापि नाम बलवान्पुरुषः[m] संमिं[n]जितं बाहुं प्रसारयेत्[o] प्रसारितं[p] च बाहुं[q] संमिजयेत् एकक्षणेन पदवीतिहारेण[r] राजगृहाद्वैहायस[s]मभ्युद्गम्य शुद्धावास[t]देवनिकाये प्रत्यस्थात्[u]। अद्राक्षीत्[v]शुद्धावासकायिका देवपुत्रा[w] आयुष्मन्तं[x] महायौद्गल्यायनं[y] दूरत एवागच्छन्तं[z]। दृष्ट्वा च पुनर्[a]येनायुष्मान्महामौ[b]द्गल्यायनस्तेनोपसंक्रमित्वा[c] आयुष्मतो[d] महामौद्[e]गल्यायनस्य पादौ शिरसा वन्दित्वा एकान्ते[f] अस्थासि। एकान्ते स्थित्वा च ते संबहुला शुद्धावासकायिका देवपुत्रा[g] आयुष्मन्तं[h] महामौद्गल्यायनं[i] गाथाभि[j]रध्यभाषि।

कल्पान[k] शतसहस्रं[l] संधावित्वान[m] बोधिपरिपाकं।
सुचिरस्य[n]नन्तरतनो बुद्धो लोकस्मिं[o] उपपन्नो[p] ॥१॥

इत्थं वदित्वान[q] ते संबहुला शुद्धावास[r]कायिका देवपुत्रा[s] आयुष्मतो महामौद्[t]गल्यायनस्य पादौ शिरसा वन्दित्वा एकान्ते अस्थासि। एकान्ते[u] स्थित्वा[v] अन्तर्हिता[w]। अथ खल्वायुष्मतो महामौद्[x]गल्यायनस्यैतदभवत्। एवं दुर्लभा[y] बोधिर्यत्र[z] हि नाम कल्पानां[a] शतसहस्रेण। अथ खल्वायुष्मान्महा[b]मौद्गल्यायनस्तद्यथा[c] बलवान्[d]पुरुषः[e] संमिञ्जितां बाहां प्रसारयेत्[f]प्रसारितां[g] वा बाहां[h] संमिञ्जयेत् एत्तकेन[i] क्षणवीतिहारेण[j]
Sen. 56 शुद्धावासतो देवनिकायातो[k] अन्तर्हितः[l] राजगृहे नगरे[m] प्रत्यस्था[n]। अथायुष्मान्महामौ[o]द्गल्यायनो राजगृहे नगरे पिण्डाय[p] चरित्वा पश्चाद्भक्तो[q] पिण्डपात्रप्रतिक्रान्तः[r] पात्रचीवरं प्रतिशामयित्वा[s] पादौ प्रक्षालयित्वा[t] येन भगवां[u]स्तेनोप[v]संक्रमित्वा[w] भगवतः[x] पादौ[y] शिरसा वन्दित्वा एकान्ते न्यषीददेकान्ते[z] निषण्णश्च[a] पुनः[b] आयुष्मान्[c]महामौद्[d]गल्यायनो भगवन्तमेतदवोचत्[e]। इहाहं भगवन्[f]काल्यस्यैव[g] निवासयित्वा पात्रचीवरमादाय[h] राजगृहं महानगरं पिण्डाय प्रक्रमि[i]। तस्य,[j] मे भगवन्[k] अचिरप्रकान्तस्यैतदभवत्।

अतिप्रागस्तावदेतर्हि[a] राजगृहे महानगरे पिण्डाय[b] चरितुं[c]। यं नूनाहं येन शुद्धावासं[d] देवनिकायं तेनोपसंक्रमेयं। चिरं[e] मे देवनिकायं[f] शुद्धावासं उपसंक्रान्तस्य[g]। अथाहं[h] बलवां[i] तद्यथा[j] पुरुषः संमिंजितां[k] बाहां प्रसारयेय[l] प्रसारितां वा बाहां[m] संमिंजयेत् एत्त-[n]केन क्षणवीतिहारेण[o] राजगृहाद्वैहायसमभ्युद्गम्य[p] शुद्धावासे देवनिकाये प्रत्यस्थासि[q]। अद्राक्षीत्[r] मे भगवन्संबहुलाः शुद्धावासकायिका[s] देवपुत्रा दूरत एवागच्छन्तं दृष्ट्वा च पुनर्येनाहं[t] तेनोपसंक्रमित्वा[u] मम पादौ शिरसा वन्दित्वा एकान्ते[v] स्थान्सु। एकान्त-[w]स्थिता संबहुला[x] ते शुद्धावासकायिका देवपुत्रा मम गाथाये अध्यभाषेरन्[y]।

कल्पान[z] शतसहस्रं[a] संधावित्वान बोधिपरिपाकं।
सुचिरस्यनन्तरतनो[b] बुद्धो लोकस्मिं[c] उपपन्नो ॥२॥

इत्थं[d] वदित्वान[e] ते संबहुलाः शुद्धावासकायिका देवपुत्रा मम पादौ[f] शिरसा वन्दित्वा प्रक्रमि। तस्य मे भगवन्नेतदभवत्[g]। यावद्दुःखसमुदानीया[h] अनुत्तरा[i] संबो- Sen. 57
धिर्यत्र हि नाम कल्पानां शतसहस्रेण[j]। यं[k] नूनाहं[l] येन भगवांस्तेनोपगमित्वा[m] भगवन्तमेतमर्थं परिपृच्छेयं। यथा मे भगवां[n] व्याकरिष्यति तथा[o] नं धारयिष्यामि[p]। इह भगवां[q] किमाह। एवमुक्ते[r] भगवानायुष्मन्तं महामौद्गल्यायनमेतदवोचत्[s]। परीत्तकं खलु[t] पुनर्महामौद्गल्यायन[u] शुद्धावासकायिकानां[v] देवपुत्राणां[w] शतसहस्रन्ति। अप्रमेयेहि महामौद्गल्यायन[x] कल्पेहि असंख्येयेहि[y] अप्रमेयेहि[z] तथागतेहि अर्हन्तेहि[a] सम्यक्संबुद्धेहि कुशलमूलान्यवरोपितानि[b][c] आयतिसंबोधिं[d] प्रार्थयमानेहि। अभिजानामि[e] खलु पुनरहं[f] महामौद्गल्यायन[g] त्रिंशद्बुद्धकोटियो[h] शाक्यमुनिनामधेयानां[i] ये[j] मया सश्रावकसंघाः[k] सत्कृता[l] गुरुकृता[m] मानिताः[n] पूजिता अपचिता[o] राज्ञा चक्रवर्तिभूतेन आयतिसंबोधिमभिप्रार्थयमानेन च[p] मे ते बुद्धा भगवन्तो व्याकरेन्सुः[q]। भविष्यसि त्वमनागतमध्वानं[r] तथागतोऽर्हं[s] सम्यक्संबुद्धो[t] विद्याचरणसंपन्नो[u] सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः[v] शास्ता देवानां च मनुष्याणां च। अभिजानाम्यहं खलु पुनर्[w]महामौद्गल्यायन[x] अष्ट बुद्धशत-

सहस्राणि दीपंकरनामधेयकानां[a] ये मया सश्रावकसंघाः सत्कृता[b] गुरुकृता मानिताः[c] पूजिता[d] अपचिता[e] चक्रवर्तिभूतेन[f] आयतिं संबोधिमभिसंप्रार्थयमानेन[g][h] च मे ते बुद्धा भगवन्तो[i] व्याकरेन्सुः[j]। यथा प्रथमे परिवर्ते तथा सर्वत्र कर्तव्यं। भविष्यसि[k] त्वम-[l] Sen. 58 नागतमध्वानं[m]। अभिजानाम्यहं[n] महामौद्गल्यायन[o] पंच बुद्धशतानि[p] पद्मोत्तरनामधेयानां। सर्वत्र[q] कर्तव्यं[r]। भविष्यसि त्वमनागतमध्वानं। अभिजानाम्यहं[s] महामौद्गल्यायन[t] अष्ट[u] बुद्धसहस्राणि प्रद्योतनामधेयानां। अभिजानाम्यहं[v] महामौद्गल्यायन[w] त्रयो बुद्धकोटीयो[x] पुष्पनामधेयानां[y]। अभिजानाम्यहं[z] महामौद्गल्यायन[a] अष्टादश बुद्धसहस्राणि मारध्वजनामधेयानां[b] यत्र मया ब्रह्मचर्यं चीर्णं[c] आयतिं बोधिं प्रार्थयमानेन च मे ते बुद्धा भगवन्तो[d] व्याकरेन्सुः[e]। अभिजानाम्यहं[f] महामौद्गल्यायन[g] पंच बुद्धशतानि पद्मोत्तरनाम-[h]धेयानां[i] ये मया[j] सश्रावकसंघाः सत्कृताः[k]। अभिजानाम्यहं[l] महामौद्गल्यायन[m] नवति[n] बुद्धसहस्राणि काश्यपनामधेयानि[o][p]। अभिजानाम्यहं[q] महामौद्गल्यायन[r][s] पंचदश बुद्धसहस्राणि प्रतापनामधेयानि[t][u]। अभिजानाम्यहं[v] महामौद्गल्यायन[w][x] द्वौ बुद्धसहस्रौ कौण्डिण्यनामधेयौ[y]। अभिजानाम्यहं[z] महामौद्गल्यायन[a] चतुरशीति प्रत्येकबुद्धसहस्राणि[b][c]। अभिजानाम्यहं[d] महामौद्गल्यायन[e] समन्तगुप्तं[f] नाम[g] तथागतमर्हन्तं[h] सम्यक्संबुद्धं[i]। अभिजानाम्यहं[j] महामौद्गल्यायन[k] बुद्धसहस्रं जम्बुध्वजनामधेयानां[l]। अभिजानाम्यहं[m] महामौद्गल्यायन[n] चतुरशीति[o] बुद्धसहस्राणि इन्द्रध्वजनामधेयानां[p]। अभिजानाम्यहं[q] महामौद्गल्यायन[r] पंचदश बुद्धसहस्राणि आदित्यनामधेयानां[s]। अभिजानाम्यहं[t] महामौद्गल्यायन[u] द्वाषष्टि[v] बुद्धशतानि[w][x] अन्योन्यनामधेयानां। अभिजानाम्यहं[y] महामौद्गल्यायन[z] चतुर्षष्टि[a] बुद्धान[b] समिताविनामधेयानां[c][d]।

सुप्रभासो[e] नाम[f] महामौद्गल्यायन[g] तथागतोऽर्हं[h] सम्यक्संबुद्धो यत्र मैत्रेयेण बोधिसत्वेन[i] प्रथमं कुशलमूलान्यवरोपितानि[j] राज्ञा वैरोचनेन चक्रवर्तिभूतेन आयतिं संबोधिं प्रार्थयमानेन। सुप्रभासे खलु पुनर्महामौद्गल्यायन[k] तथागतभूते[l] चतस्रः[m]

चतुरशीतिकोटिवर्षसहस्राणि मनुष्याणामायुषः[a] प्रमाणमभूषि[b] अन्तरा[c] च उच्चा-
वचता[d] आयुषः। सुप्रभासस्य[e] खलु पुनर्महामौद्गल्यायन[f] तथागतस्यार्हतः[g] सम्यक्-
संबुद्धस्य[h] त्रयः सन्निपाताभूत्[i]। प्रथमो[j] श्रावक[k]सन्निपातो[l] षण्णवति[m] कोटीयो[n] अभूषि
सर्वेषां[o] अर्हन्तानां क्षीणाश्रवाणा[p]मुषितव्रतानां[q] सम्यगाज्ञा[r]विमुक्तानां परिक्षीणभव[s]-
संयोजनानामनुप्राप्तस्वकार्थानां[t]। द्वितीयो श्रावक[u]सन्निपातो[v] चतुर्नवति[w] कोटियो[x]
अभूत्[y]सर्वेषामर्हन्तानां क्षीणाश्रवाणा[z]मुषितव्रतानां[a] सम्यगाज्ञाविमुक्तानां[b] परिक्षीणभव-
संयोजनानां[c] अनुप्राप्तस्वकार्थानां[d]। तृतीयो श्रावकसन्निपातो द्वानवति कोटियो[e] अभूषि[f]
सर्वेषा[g]मर्हन्तानां[h] क्षीणाश्रवाणा[i]मुषितव्रतानां[j] सम्यगाज्ञाविमुक्तानां[k] परिक्षीणभवसंयोज-
नानां[l] अनुप्राप्त[m]स्वकार्थानां। अथ खलु[n] महामौद्गल्यायन[o] राज्ञो[p] वैरोचनस्य तं[q] भगवन्तं
सुप्रभासं दृष्ट्वा उदार[r]हर्षं उदारवेगप्रीतिप्रामोद्यं[s] उत्पद्ये[t]। सो तं भगवन्तं[u] सश्रावक-
संघं दश वर्षसहस्राणि सत्करेसि[v] गुरुकरेसि[w] मानेसि[x] पूजेसि[y] अपचायेसि[z]। सत्कृत्वा Sen. 60
गुरुकृत्वा[a] तां च[b] समितिमनुगृह्लन्तो[c] तं च[d] श्रावकसंघमनुगृह्लन्तो[e] तं चायुःप्रमाणमनु[f]-
गृह्लन्तो[g] एवं[h] चित्तमुत्पादेसि[i]। अहो[j] पुनरहं भवेयमनागतेऽध्वनि[k] तथागतोऽर्हं[l] सम्यक्-
संबुद्धो विद्याचरणसंपन्नः[m] सुगतो[n] लोकविदनुत्तरः पुरुषदम्यसारथिः[o] शास्ता देवानां च
मनुष्याणां च यथायं भगवान्[p]सुप्रभासो एतरहि[q]। एवं[r] सर्वाकारसंपन्नं[s] सर्वाकारप्रतिपूरं[t]
धर्मं[u] देशेयं[v] यथापीह भगवान्[w]सुप्रभासो एतरहि[x]। एवं[y] समग्रं[z] श्रावकसंघं परिहरेयं
यथापि भगवान्[a]सुप्रभासो[b] एतरहि[c]। एवं च मे देवाश्च[d] मनुष्याश्च श्रोतव्यं[e] श्रद्धातव्यं
मन्येन्सुः[f] यथापीदं[g] भगवतो[h] सुप्रभासस्य एतरहिं[i]। तं भवेयं[j] बहुजन[k]हिताय बहुजन-
सुखाय लोकानुकंपाय महतो जनकायस्यार्थाय[l] हिताय सुखाय देवानां च मनुष्याणां च।
एवं[m] चाह महामौद्गल्यायन[n] अतो[o] च भूयो[p] अन्यं[q]। चतुरचत्वारिंशत्[r]कल्पसंप्रस्थितस्य[s]
खलु[t],पुनर्महामौद्गल्यायन[u] मैत्रेयस्य बोधिसत्वस्य[v] पश्चा[w] ताये बोधये[x], चित्तमुत्पादितं[y]।
अपराजितध्वजो[z] नाम[a] महामौद्गल्यायन[b] तथागतोऽर्हं[c] सम्यक्संबुद्धो[d] यो मये सश्रावक-

संघो वर्षसहस्रं सत्कृतो[a] गुरुकृतो मानितो पूजितोऽपचितो[b] राज्ञा दृढधनुना चक्रवर्ति-
Sen. 61 भूतेन आयतिं संबोधिं[c] प्रार्थयमानेन[d] महन्तेहि च पंचेहि[e] दुष्ययुगशतेहि[f] अभिच्छादिता। परिनिर्वृतस्य च स्तूपं कारितं योजनमुच्चत्वेन योजनमभिनिवेशेन[g]। एषा[h] च[i] महामौद्गल्यायन[j] प्रणिधि[k] सततसमिता[l] अभूषि। यस्मिं[m] समये सत्वा[n] भवेन्सुः[o] अलेना अत्राणा अशरणा[p] अपरायणा[q] उत्सदलोला उत्सददोषा उत्सदमोहा[r] अकुशलान्धर्मा[s] समादाय वर्तेन्सुः[t] योभूयेन[u] च अपायप्रतिपूरका[v] भवेन्सु[w] तस्मिं[x] काले तस्मिं समये[y] अहमनुत्तरां[z] सम्यक्संबोधिमभिसंबुध्येहं[a]। तं भवेय[b] बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय[c] हिताय सुखाय देवानां च मनुष्याणां[d] च। दुष्करकारका[e] महामौद्गल्यायन[f][g] तथागतार्हन्तो[h] सम्यक्संबुद्धा[i] लोकस्यार्थं[j] चर्यां[k] चरन्ति। इदमवोचद्भगवानात्तमनो[l][m][n] आयुष्मान्महामौद्गल्यायनो[o][p] भगवतो भाषितमभ्यनन्दत्[q]।

शाक्यमुनिनामकानामुपस्थितास्त्रिंश[r][s] कोटियो[t] जिनानां।
अष्टशतसहस्राणि दीपंकरनामधेयानां[u][v] ॥३॥
षष्टिं च सहस्राणि प्रद्योतनामधेयानां[w][x]………।
तथ[y] पुष्पनामकानां[z] त्रयो कोटियो[a] वादिसिंहानां ॥४॥
अष्टादश[b] सहस्राणि मारध्वजनामकानां[c] सुगतानां।
यत्र चरे ब्रह्मचर्यं[d] सर्वज्ञतामभिलाषाय[e] ॥५॥
पूजयि[f] पंच शतानि पद्मोत्तरनामकानां सुगतानां।
Sen. 62 कौण्डिन्यनामकानामपराणि[g][h] द्वि सहस्राणि ॥६॥
अपरिमितासंख्येया[i] प्रत्येकजिनान[j][k] कोटिनयुतां[l] च।
पूजयि बुद्धसहस्रं जम्बुध्वजनामधेयानां[m] ॥७॥
चतुरशीति सहस्राणि इन्द्रध्वजनामकानां सुगतानां।
नवतिं च सहस्राणि काश्यपसहनामधेयानां॥८॥

पंचदश बुद्धसहस्राणि प्रतापनामकानां सुगतानां।
पंचदश[a] च सहस्राणि आदित्यनामधेयानां[b] ॥९॥
द्वाषष्टि[c] च शतानि सुगतानां अन्योन्यनामधेयानां।
चतुर्षष्टि[d] च सहस्राणि समितावीनामधेयानां[e] ॥१०॥
एते च कोलितशिरी[f] अन्ये च दशबला अपरिमाणा[g]।
सर्वे अनित्यताय समिता[h] लोकप्रद्योता[i][j] ॥११॥
यानि च बलानि[k] कोलित तेषां महापुरुषलक्षवराणां[l]।
सर्वे अनित्यताय[m] कालं न उपेन्ति[n] संख्यां[o] च ॥१२॥
ज्ञात्वानानित्यबलं[p] सुदारुणं[q] सत्कृतस्य[r] अनन्तरं[s]।
वीर्यारम्भो[t] योजितो अनित्यबलस्य[u] विघाताय[v] ॥१३॥

इतो[w] मौद्गल्यायन[x] अपरिमिते[y] असंख्येये[z] कल्पे[a] रत्नो[b] नाम[c] सम्यक्संबुद्धो अभूषि
तथागतोऽहं सम्यक्संबुद्धो विद्याचरणसम्पन्नः[d] सुगतो[e] लोकविदनुत्तरः पुरुषदम्यसारथिः[f]
शास्ता देवानां च मनुष्याणां[g] च। अहं तदा[h] राजा चक्रवर्ति[i] अभूषि। ततो मयैतस्य[j]
भगवतो रतनवतो[k] चतुरशीति कूटागारसहस्राणि कारितानि चित्राणि दर्शनीयानि Sen. 63
सप्तानां रत्नानां सुवर्णस्य रूप्यस्य[l] मुक्ताया[m] वैडूर्यस्य[n] स्फाटिकस्य[o] मुसारगल्वस्य[p] लोहिति-
कायाः[q]। तानि मया तस्य भगवतो निर्यातित्वा[r] बोधाय अनुप्रणिहितं[s]। न[t] तावद्बुद्धा[u]
भगवन्तो परिनिर्वायन्ति[v] यावद्युवराजा[w][x] अनभिषिक्तो[y] भवति। एषो[z] मम[a] अनन्तरं
बुद्धो लोके भविष्यति[b]। यथर्तहि[c] मया मैत्रेयो[d] व्याकृतो एषो ममानन्तरं[e] बुद्धो भविष्य-[f]
तीति। सो भगवां चतुरशीतिहि[g] श्रावकसहस्रेहि[h][i] सार्धं चतुरशीतिसंवर्तविवर्तस्थितो[j]
संवर्तमाने[k] लोके भगवाश्चतुरशीतिहि[l] श्रावकसहस्रेहि[m] सार्धं[n] आभास्वरं[o] देवनिकायं
गच्छति[p] विवर्तमाने[q] लोके इहागच्छति इह धर्मं[r] देशयति। अहं भूयो राजा चक्रवर्ती[s]

भवामि । चतुरशीतिकूटागारसहस्राणि कारापयित्वा[a] भगवतो रतनवतो[b] निर्यातेमि[c] । इयं[d] महामौ[e]द्गल्यायन[f] प्रणिधिचर्या ।

कतमा च अनुलोमचर्या[g] । इह[h] महामौद्गल्यायन[i] बोधिसत्वो महासत्वो बोधाय अनुलोमताये स्थितो[j] भवति । इयं[k] महामौद्गल्यायन[l]·········अविवर्तचर्या[m] । विवर्तन्ति[n] संसरन्ति विवर्तचर्या[o] । अवैवर्तिया[p] बोधाय[q] भवन्ति[r] अविवर्तचर्या[s] ।

अत्र दशभूमिको[t] कर्तव्यो[u] दीपंकरवस्तु च ।

नमोऽस्तु[v] बुद्धानां[w] नमोऽर्हतां[x] । दशभूमिकस्यादि

वत्त अप्रतिम धर्मदर्शनं
Sen. 64 नैक[y]कल्पशत[z]संचितात्मनां[a] ।
भूमयो दश[b] जिनान श्रीमतां
यैर्विकुर्विषु[c] सदा पण्डिता ॥१४॥
मानदर्प[d]मदमोह[e]मोचिता
सर्वशः समियमार्दवा[f]न्विता ।
गौरवं[g] जनिय सर्वदर्शिषु[h]
श्रूयतां जिनवरस्य[i] शासनं ॥१५॥
निर्वृते[j] कनकराशिसन्निभे[k]
शाक्य[l]नन्दि[m]जनने[n] तथागते[o] ।
कंपि मेदिनी[p] सशैल[q]कानना[r]
सागरांबरधरा[s] सपर्वता[t] ॥१६॥
कम्पितं[u] परमरोमहर्षणं[v]
भूमिकंपमनुदृश्य दारुणं ।

काश्यपो धूतगुणाग्रपारगो
चित्त[a]मभ्युपगतः[b] तदा[c] अभूत् ॥१७॥
किं नु अद्य धरणी[d] सपर्वता
सागराम्बरधरा वसुन्धरा।
कम्पते परमदारुणस्वरं
नूनं[e] निर्वृतिं गतस्तथागतः[f] ॥१८॥
सो च दिव्यनयन[g]स्तथागतं[h]
देवकिन्नरवरेहि वन्दितं
दृश्य[i] सर्वभवबन्धनान्तकं Sen. 65
निवृतं[j] यमक[k]शालअन्तरे ॥१९॥
न खलु मे[l] समुचितं[m] तथागतं
ऋद्धिये[n] समनुगन्तु[o] गौतमं[p]।
पद्धिरेव[q] वदतां[r] वरं मुनिं[s]
द्रष्टुम[t]प्रतिमं[u] प्रव्रजाम्यहं ॥२०॥
सो च मत्व[v] त्वरमाणो सूरी
काश्यपो[w] मथितमानसो भिक्षुः[x]।
भिक्षुभिर्[y]बहुभिरुत्तमो परि-
निर्वृत[z]भुवमनु[a]पूर्वमागमि ॥२१॥
तस्य च प्रणिधिरासि[b] उत्तमा
काश्यपस्य[c] जिनपादवन्दने[d]।
तौ········चरणौ महामुने
मूर्धिना[f] उपान[g]पीड्य वन्दितुं ॥२२॥

संगृह्योल्कां[a] विपुलां[b] अथ चतस्रो
मल्लका[c] उपगता[d] बलवन्तः[e] ।
वीजितां[f] परममल्लविनीतां
दग्धउल्कां[g] अभिप्राणमयेन्सुः[h][i] ॥२३॥
तैश्रितामभिमुखं[j] उपनीता[k]
तैः पराक्रमबलै[l] रथशूरैः[m] ।
Sen. 66 निर्वृता च[n]·········सा समकालं
प्राप्य वारिपरिषेकमिवोल्का[o] ॥२४॥
संशयं विमतिमध्यमुपेत्य[p][q]
मल्ला दिव्यनयनं[r] अनिरुद्धं[s] ।
गौरवा[t] नतशिरा सुविनीता
प्रश्नम्·········इदं परिपृच्छे ॥२५॥
को नु हेतुरिह प्रत्ययो च को[u]
येनिमा[v] जिनसुता[w] उपनीता[x] ।
निर्वृति[y] उपगता सहसोल्का[z][a]
ब्रूहि कारणमिहार्य यथावत् ॥२६॥
देवता खलु[b] प्रसन्ना काश्यपे[c]
तस्य एष खलु[d] ऋद्धिभावना ।
नैव ताव[e] ज्वलनो ज्वलिष्यति
याव[f] नागतो अग्रपारगः[g] ॥२७॥
तस्य[h] चैष प्रणिधिः[i] समृध्यति
काश्यपस्य[j] धुतधर्मधारिणः[k] ।

तौ क्रमौ दशबलस्य श्रीमतः[a]
वन्दितुं हि शिरसा महामुने[b] ।।२८।।
सो च भिक्षुगण[c]संपुरस्कृतः[d]
काश्यपो[e] धुतरजो[f] जिनात्मजः[g] ।
प्रांजली[h] जिनचितामुपागतो[i]
गौरवा[j] प्रणतशीर्षमानसः[k] ।।२९।।
दृश्य[l] तं प्रवररूपधारिणं Sen. 67
काष्ठसंचय[m]गतं[n] तथागतं ।
धिग्[o]भवानिति गिरामुदीरयी[p]
दर्शितप्रकृतिभावलक्षणां[q] ।।३०।।
को नु[r] सो[s] भव[t]मुपेत्य प्राणको[u]
यो न मृत्यु[v]वशमागमिष्यति[w] ।
यत्रयं ज्वलन[x]कांचनोपमो
निर्वृतो शिखिरिवेन्धनं[y] विना ।।३१।।
कृत्व[z] अंजलि[a]पुटं[b] महायशो[c]
पादतो जिनवरस्य काश्यपो ।
मूर्धिना[d] निपतितो महर्षिणो[e]
पश्चिमं 'इदं नमस्यते मुने ।।३२।।
तौ[f] च चक्रवर[g]लक्षितौ[h] क्रमौ
देवदानववरेहि वन्दितौ ।
निःसृतौ तथ[i] विदार्य[j] तां चितां
देव[k]यक्षभुजगानुभावितौ[l] ।।३३।।

तौ क्रमौ[a] शिरसि सन्निपातिय[b]
पाणिभिः समनुगृह्य[c] चा मुने[d]।
आलपे[e] श्रुतिधरं मर्हर्षिणं[f]
अन्तिकावचरः[g] काश्यप[h]स्तदा[i] ॥३४॥
Sen. 68 किं[j] त्विमौ श्रुतिधर क्रमौ मुने
ध्यामतामुपगतौ[k] न सुप्रभौ।
ब्रूहि[l] कारण[y][m]मशेषमाह्वय
येनिमौ न नयना[n]भिनन्दिनौ[o] ॥३५॥
एतं[p] श्रुत्वं[q] श्रुतसंचयंधरो
काश्यपं[r] इदमुवाच पण्डितो।
अश्रुवेग[s]दुषिता[t] व शोचतां
रोदितेहिं[u] मथिता[v] हिमौ[w] क्रमौ[x] ॥३६॥
तेनिमौ[y] क्रमवरौ महामुनेः[z]
रोदनेन जनता[a]भिपीडितौ[b]।
नो विभान्ति[c] मुनिनो यथा पुरा
एवमेत[d]दनुपश्य सुव्रत[e] ॥३७॥
सो[f] निपत्य शिरसा[g] पुनःपुनः
तौ[h] क्रमौ प्रवरचक्रलक्षणौ।
करतलेहि[i] अभिपीडयेत्मुने[j]
शास्तु गौरवपराय बुद्धिये[k] ॥३८॥
वन्दितौ च धूतधर्म[l]धारिणा[m]
तौ क्रमौ गुणधरेण शास्तुनो।

लोकनाथ[a]चितकाष्ठ तेजसा
वायुवेगविधुतेन[b] दीप्यति[c] ।।३९।।
दह्यमाने[d] जिनचन्द्रशरीरे Sen. 69
पंच तानि वशिभूतशतानि[e] ।
मन्त्रयन्ति[f] सहिता[g] समुपेत्य
निर्वृतीसमयकाले[h] संगीतिं ।।४०।।
निर्वृतो प्रवरलक्षणधारी[i]
यो नु शास्तु[j] ससुरासुरनेता[k] ।
को गुणो[l] इह चिरंपरिवासे
वयमप्यद्य[m] विजहामथ देहं ।।४१।।
सर्वथा[n] सुपरि[o]निष्ठित[p]कार्याः
प्राप्य[q] अच्युतमशोकमनन्तं[r] ।
सर्वभावभववीतिगता[s] स्म
एष[t] निर्वृतिमुपेम इहैव[u] ।।४२।।
एवमुक्ते[v] धुतधर्म[w]विशुद्धो[x]
काश्यपो ब्रवि तदा वशिभूतां[y]
न[z] खु भवद्भिरनुपादि[a] विमुक्ति
निर्वृती[b] समनुगम्य[c] इहैव[d] ।।४३।।
तीर्थिका[e] च बहिर्धानुगताश्च[f]
क्रेयुरप्रतिमशासनदोषं[g] ।
धूमकालिकमिति[h] श्रमणस्य[i]
एतदेव[j] च तु रक्षणीयं[k] नो ।।४४।।

लोकनाथ बहवो नरसिंहा[a]
Sen. 70 ये चनागत[b] महामति[c]शूरा[d]।
ते हि नो[e] उपपदेयु[f]रुदग्रा[g]
यदि न संकलिये[h] शासनं[i] शास्तुः ॥४५॥
तेन[j] अप्रतिहताः सुसमग्राः[k]
गायथा[l] सुगतशासनमग्रच ।
यथ इदं सुपरिगीत[m] यथार्थं[n]
चिरतरं नरमरुषु[o] विरोचे[p] ॥४६॥
एवमस्तु[q] इति ते वशिभूता[r]
काश्यपस्य[s] वचनं प्रतिपूज्य[t]।
चित्तमप्युपगता[u] क्व इदानीं[v]
देशि धर्मधर[w]संगणना स्यात् ॥४७॥
रम्यकाननवने[x] सुसमृद्धे
मागधस्य मगधाधिपतिस्य[y]।
पुरवरे[z] भवतु राजगृहस्मिं[a]
सप्तपर्ण[b]अभिधानगुहायां ॥४८॥
पर्वतस्य[c] वैहायवरस्य[d]
उत्तरस्मि[e] तीरे[f] वरपार्श्वे[g]।
विविधपादपे[h] शिलातल[i]भूमेः[j]
भागे यं भवतु धर्मसमस्या[k] ॥४९॥
ते च ऋद्धि[l]वशिभाव[m]बलस्था
Sen. 71 उद्गताः[n] खगपथे जिनपुत्रा ।

तत्क्षणान्तर[a]······प्रपलाना
मानसं सरो यथा हंसयूथो ॥५०॥
ते प्रतिष्ठिता नगाग्र[b]वरस्य
पार्श्वे तद्वनमुपेत्य निषण्णा[c]।
शासने[d] च सुगतस्य सुगीते[e]
देवदुन्दुभि[f]गणानि नदेन्सुः[g] ॥५१॥
ते च दुन्दुभिन नादं[h] नदन्तं
श्रुत्व[i] शासनकरा सुगतस्य[j]।
भूमिकम्पमनुदृश्य[k] च घोरं
काश्यपं[l] धुतरजं इदमूचुः ॥५२॥
किं[m] तु (?) भोः[n] धुतं[o]धरा समकंपि[p]
मेदिनी ससरिता[q] ससमुद्रा।
देवदुन्दुभिरवा[r]श्च मनोज्ञा[s]
दिव्यमाल्यविकिरणं[t] च भवन्ति ॥५३॥
तानुवाच धत[u]धर्मसमंगी
काश्यपो जिनसुतां[v] वशिभूतां।
एते सन्निपतिता मरुसंघा
श्रुत्व[w] शासनवरं[x] सुसमग्रचं[y] ॥५४॥
ते समग्रवरलक्षण[z]धारी
गौरवा[a]त्प्रमुदिता मरुसंघाः[b]।
पूजां[c] अप्रतिमकस्य करोन्ति
शासनं श्रृणुयु[d] सर्वसमग्रचं[e] ॥५५॥ Sen. 72

सो हि नैकभवकल्पशतेहि[a]
हितसुखाय नरदेवगणानां ।
एवमभ्युपगतो[b] चिररात्रं
मोक्षयिष्येऽहं[c] प्रजाः[d] परिमुक्तः[e] ।।५६।।
सो लभित्व परमार्थमशोकं[f]
सर्वभावभवदुःख[g]निरोधं[h] ।
काशिपुर्यां[i] नरदेवहितार्थं[j]
वर्तयिष्यि वरचक्रमद्भुतं[k] ।।५७।।
पंचकेहि[l] सह तेहि मुँनीहि
मरुगणां विनयवादिनां वरो[m] ।
सत्वकोटिनयुतानि नायको[n]
जातिजन्म[o]मरणात्[p]समुद्धरे ।।५८।।
सो[q] विमोक्षयि भवाभिनन्दिनो[r]
तोषयं[s] नरमरू[t] नरसिंहो[u] ।
मथिय[v] सर्वपरवादि सांप्रतं[w]
निवृतो[x] तु भगवां निरपेक्षो[y] ।।५९।।
एत[z] श्रुत्व[a] वचन[b] मनोरमं[c]
काश्यपस्य धुतधर्मधारिणो ।
देवसंघा[d] मुदिता नभे स्थिता
व्याहरन्ति वचनं[e] मनोरमं[f] ।।६०।।
साधु[g] साधु[h] धुतधर्मकोविदा
Sen. 73 शास्तु शासनकरा[i] अनन्यथा ।

भाषसे[a] गुण[b]मनन्तबुद्धिनो[c]
जेतवने नरमरू[d] सुतोषिता[e] ॥६१॥
सो हि देवमनुजान[f] उत्तमो[g]
सोहि[h] अग्रपुरुषो महामुनिः[i] ।
सो[j] हि नि[k]:शरणमुत्तमं[l] प्रभुः
दृष्टदर्शनो[m] हिताय प्राणिनां ॥६२॥
तेन[n] स्कन्धा[o] तडिबुद्बुदोपमा[p]
फेनपिण्डकमिव[q] प्रभास्वरं[r] ।
देशिता दशबलेन[s] जानता[t]
यस्यियं[u] गुणकथा प्रवर्तते ॥६३॥
कृष्णसर्प[v]शिरसन्निभा[w]स्तथा
काम[x] अग्रपुरुषेण देशिता ।
शल्ल[y]रुच्छविषकुम्भ[z]सन्निभा[a]
यस्यियं[b] गुणकथा[c] प्रवर्तते ॥६४॥
तेन दृष्टमचलं[d] परं[e] सुखं[f]
दृष्टिभिः परमसाधु[g]दृष्टिभिः ।
तं अमत्सर[h]वता प्रकाशितं
संविभागरुचिना[i] यदद्भुतं ॥६५॥
उद्गते दिनकरे[j] यथा[k] किमि
निष्प्रभो[l] भवति नो[m] च भ्राजति[n] । Sen. 74
उद्गते[o] जिनदिवाकरे[p] तथा
निष्प्रभा परगणी[q] असंयता[r] ॥६६॥

ऋद्धि[a]पाद[b]बलपारमिं गतो[c]
ईश्वरो जिनबलेन[d] चक्षुमां[e] ।
लोचनं[f] भगवतस्य पश्यथ
निर्वृंतो कनकबिम्बसन्निभो ॥६७॥
धिग्भवां सरद[g]अभ्रसन्निभा[h]
वालिका[i]नगररूपसन्निभा ।
यत्र नाम कुशलान[j] संचयो[k]
निर्वृंतो परमबुद्धिसागरो[l] ॥६८॥
हेतुकारणशतेहि नायको[m]
नर्दते पुरुषसिंहनर्दितं ।
भवमनन्यमरणं[n] निरीक्ष्य
तस्य उत्तमन्तरं न विद्यते ॥६९॥
दिव्यपुष्पवर[o]मण्डितं नभं[p]
शोभते सुगतवर्ण[q]भाषणे ।
दिव्यचन्दनरसानुवासितं
शोभते अमृतगन्धिकं नभमिति ॥७०॥

अथ खल्वायुष्मानूमहामौद्गल्यायनो[r] आयुष्मन्तं महाकाश्यपमामन्त्रयति । व्यवस्थापय जिनपुत्र वशिभूता ये परिषायां[s] संशयगतानि मानसानि[t] विजाने-
Sen: 75 युरिति । अथानिरुद्धं[u] उपालिं[v] च स्थविरं[w] च अलकुण्डलभट्टियं[x][y] सुन्दरनन्दं[z] च काश्यप उवाच ।

अवलोकेथ[a] जिनात्मजाश्चित्तानि या परिषायां[b] ।
संशयं च परिपृच्छथ यस्य यत्र तथा भवेदिति ॥७१॥

साधूति[a] ते प्रतिश्रुत्वा जिनशास्त्रविशारदाः[b]।
पश्यन्ति परचित्तानि[c] 'करे[d] वामलकं यथा ॥७२॥
प्रलम्बबाहुं[e] वशिभूतं काश्यपो इदमब्रवीत्।
गृध्रकूटस्य[f] शिखरे[g] निर्मिणे[h] वसुधां लघुं ॥७३॥
अष्टादश[i] सहस्राणि परिषायां समागता।
यथा सर्वाभिजानेया[j] 'ऋद्धि[k] संजनया[l] तथा[m] ॥७४॥
विचिन्तचूतं[n] वशिभूतं काश्यप[o] इदमब्रवीत्।
गंगोदकमया[p] मेघा निर्मिणे[q] गगने[r] लघुं[s] ॥७५॥
विविधगन्धपुष्पाश्च उपवायन्तु[t] सवतः[u]।
मानुषाणामामगन्धा[v] च[w] शीघ्रमन्तरहापय[x] ॥७६॥
हर्यक्षं[y] नाम वशिभूतं[z] काश्यप[a] इदमब्रवीत्[b]।
तथा उत्पादय शीघ्रं समाधिं सुगतात्मज[c]।
यथा गृहीणां[d] द्रव्याणि[e] न गच्छेयुः परां[f] गतिं[g] ॥७७॥
वरुणं नाम[h] वशिभूतं[i] काश्यपो[j] इदमब्रवीत्।
अरतिदंशमशका[k] मनुष्याणां निवर्त्तये[l] ॥७८॥
अजकर्णं[m] वशिभूतं[n] काश्यपो[o] इदमब्रवीत्। Sen. 76
क्षुधां[p] पिपासां[q] व्याधिं[r] च मनुष्याणां निवर्तय[s] ॥७९॥
साधूति[t] ते प्रतिश्रुत्वा काश्यपस्य जिनात्मजाः[u]।
यथाज्ञप्तानि[v] स्थानानि यथोक्तं[w] परिजाग्रिषु[x] ॥८०॥
ततः[y] काश्यपस्थविरः[z] कात्यायनमुवाच[a] स।
समुदीरय महात्मनां[b] चरितं[c] धर्मराजिनां[d] ॥८१॥
एवमुक्ते[e] महाप्राज्ञो कात्यायनकुलोद्गतः[f]।

उवाच चर्या[a] बुद्धानां काश्यपस्यानुपृच्छतः ।।८२।।
श्रुयतां भो जिनसुता[b] बुद्धानां सर्वदर्शिनां[c] ।
चर्या[d] चरणशुद्धानां यथावदनुपूर्वशः[e] ।।८३।।
दश[f] खलु भो जिनपुत्रा[g] बोधिसत्वान भूमयो[h] ।
.....................भवन्ति[i] कतमा दश[j] ।।८४।।
दुरारोहेति[k] प्रथमा भूमी[l] समुपदिश्यते[m] ।
द्वितीया बद्धमाना[n] नाम[o] तृतीया पुष्पमण्डिता[p] ।।८५।।
चतूर्थी[q] रुचिरा नाम[r] पंचमी चित्तविस्तरा[s] ।
षष्टी[t] रूपवती नाम[u] सप्तमी दुर्जया[v] स्मृता ।।८६।।
अष्टमा जन्मनिदेशो[w] [x] नवमी यौवराज्यतो[y] ।
दशमी त्वभिषेकातो[z] इति[a] एता दश भूमयः[b] ।।८७।।
Sen. 77 एवमुक्ते तु गाथाभिः काश्यपोऽब्रवि[c] पण्डितः ।
कात्यायनमतो त्यर्थं[d] वाक्यमप्रतिमं[e] इदं ।।८८।।
भूमीनां[f] परिणामानि यथावदनुकीर्तयं[g] ।
यथा च ते विवर्तन्ते[h] संसरन्तो महायशा[i] ।।८९।।
यथा[j] चापि संवर्तन्ते सत्त्वसाराः[k] तथा वदे ।
यथैवाध्याशया[l] तेषां भवन्ति[m] तां[n] उदाहरे[o] ।।९०।।
यथा च परिकल्पेन्ति[p] सत्वा सत्वसमन्विता[q] ।
यथा[r] च देन्ति दानानि तत्सर्वमनुकीर्तये[s] [t] ।।९१।।
तथा[u] च दृष्ट्वा संबुद्धा भाषन्तो[v] च मनोजनं[w] ।
संज्ञोत्पादं[x] तथा[y] ब्रूहि काश्यपो इदमब्रवीत् ।।९२।।

इदं[a] ते वचनं[b] श्रुत्वा वशिभूता[c] उपस्थिता[d]।
गौरवेण महासत्वा संबुद्धानां महात्मनां ॥९३॥

एवमुक्ते कात्यायनो काश्यपमुवाच[e]। न खलु भो जिनपुत्र[f] शक्यं बोधिसत्वानां भूमीः[g] प्रमातुं[h] एत्तककल्पा[i] वा[j] अनन्ता भवन्ति। सर्वं[k] संसारो[l] बोधिसत्वानां खण्ड-[m]संज्ञया भूमिरिति परिकल्पितं तेन भूमिरिति स्मृता। एवमुक्ते आयुष्मानानन्द आयुष्मन्तं[n] कात्यायनमुवाच[o]। यदि भो जिनपुत्र एका भूमि[p] अप्रमेया कथमिदानीं[q] Sen. 78 परिशेषाणां[r] भूमीनां[s] ग्रहणं भविष्यति[t] इति। एवमुक्ते आयुष्मान्[u]कात्यायनो आयुषमन्त[v]मानन्दं[w] गाथाभिरध्यभाषे।

कल्पो[x] यथा[y] अपरिमितः प्रकाशितः[z][a]
प्रजानता[b] अवितथवादिना[c] स्वयं।
कल्पेषु[d] च भवति बहूसु[e] देशना[f]
इदं नु भो पुरुषवरस्य शासनं ॥९४॥

भूमिस्तथा[g] अपरिमिता प्रजानता
प्रकाशिता[h] स्वयमनिवृत्तबुद्धिना[i][j]।
प्रवर्तते तथ परिशेषभुमिषु[k]
सामान्यसंकेतानां निरूपणं ॥९५॥

प्रथमायां[l] भो जिनपुत्र भूमौ वर्तमाना[m] बोधिसत्वा[n] पृथग्जना इति प्राप्तफला भवन्ति इति दक्षिणीयाश्च लोकानां विरोचेन्ति[o] भवन्ति चात्र[p]

त्यागेन त्यागसम्पन्ना[q] बोधिसत्वा महायशाः[r]।
लोकां[s] च अभिरोचन्ते[t] चन्द्रभानुरिवांशुमां[u] ॥९६॥

प्रथमायां भूमौ बोधिसत्वानां[v] वतमानानामष्ट[w] समुदाचारा[x] भवन्ति। कतमे अष्ट[y]। तद्यथा[z] त्यागः करुणा[a] अपरिखेदः[b] अमानो[c] सर्वशास्त्राध्ययिता[d][e] विक्रमं लोकानुज्ञा धृतिरिति। भवन्ति चात्र[f]

Sen. 79 ते संविभागरुचयः करुणायमाना
दुःखसंहती[a] भगवतां[b] मधुरस्वराणां ।
वचनैः[c] गुणैश्च परितोषमुपेन्ति[d] धीराः
एवं चरन्ति धरणी प्रथमाये[e] सत्वा ॥९७॥
शास्त्राणि[f] यानि प्रसरन्ति[g] असारकानि[h]
एता विचार्य जनताअनुरागबुद्धी[i][j] ।
निष्क्रम्य[k] तं तृणसमं[l] च विचार्य लोकं[m]
तीव्रां[n] वेदेन्ति[o] वेदना कुशलं चिनोन्ति ॥९८॥

एकेन कारणेन बोधिसत्वा विवर्तन्ति द्वितीयायां भूमौ। कतमेन एकेन[p] ।
भवेषु आस्वादसंज्ञिनो[q] भवन्ति। द्विहि कारणेहि बोधिसत्वा विवर्तन्ति[r] द्वितीयायां
भूमौ। कतमेहि[s] द्विहि। कामगुणेहि[t] अभिलाषिनश्च भवन्ति[u] कुशीदाश्च। पुनस्त्रि[v]-
भिराकारैर्बोधिसत्वा[w] द्वितीयायां भूमौ विवर्तन्ति। कतमेहि[x] त्रीहि[y]। स्पृहालवश्च[z]
भवन्ति[a] उत्त्रासबहुला[b] दुर्बलाध्याशयाश्च[c]। षड्भिराकारैः बोधिसत्वा[d] प्रथमायां भूमौ
स्थिता द्वितीयायां[e] भूमौ विवर्तन्ति[f]। कतमैः[g] षड्भिः[h]। न च अनित्यसंज्ञाबहुला
विहरन्ति। आघातबहुलाश्च भवन्ति। दघवैराश्च[i] भवन्ति। स्त्यानमिद्धबहुलाश्च भवन्ति[j]।
Sen. 80 लोककार्यपरायणाश्च[k] भवन्ति। ये भो जिनपुत्र[l] बोधिसत्वा विवर्तेन्सु[m] विवर्तन्ति[n]
विवर्तिष्यन्ति[o] सर्वे ते इमेहि द्वादशभिराकारैर्विवर्तेन्सु[p][q] विवर्तन्ति[r] विवर्तिष्यन्ति नातो
भूय इति।

एवमुक्ते[s] आयुष्मान्महाकाश्यपः[t] आयुष्मन्तं[u][v] महाकात्यायनमुवाच[w]। इमे भो जिनपुत्र[x] बोधिसत्वा[y] विवर्तियाश्च[z] अविवर्तियाश्च[a] ये प्रथमं[b] चित्तमुत्पादयन्ति[c] सम्यक्संबुद्धा[d] भवेम[e] इति[f] केत्तकं पुण्यं प्रसवन्त[g] इति। एवमुक्ते[h] आयुष्मान्कात्यायन[i] आयुष्मन्तं[j] महाकाश्यपमुवाच[k]। पश्य[l] भो जिनपुत्र यो[m] दद्या[n] जम्बुद्वीपं सप्तरत्नसंचयं

दशबलानां[a] अतो बहुतरकं[b] पुण्यं प्रसवति बोधाये[c] प्रणिधेन्तो[d] । यश्च भो जिनपुत्र चत्वारो[e] द्वीपां दद्यात्[f] रत्नाचितां[g] दशबलानां[h] अतो बहुतरकं[i] पुण्यं प्रसवति[j] बोधाये[k] प्रणिधेन्तो[l] । यश्च भो जिनपुत्र दद्यात्[m]त्रिसाहस्रां[n] बहुरत्नधरां[o] महागुणधराणां[p] अतो बहुतरकं[q] पुण्यं प्रसवति बोधाय[r] प्रणिधेन्तो[s] । यश्च भो जिनपुत्र गंगानदीवालुकासमा[t] लोकधातुयो अनेकरत्नाचितपूर्णा[u] लोकनाथान[v] पूजयेत्[w] अतो बहुतरकं[x] पुण्यं प्रसवति बोधाये[y] प्रणिधेन्तो । यश्च भो जिनपुत्र सागरवालुकासमा लोकधातुयो[z] बहु[a]विध[b]रत्नाचिता[c] पूर्णा[d] अग्रपुद्गलान[e] पूजया[f] दद्यात्[g] अतो बहुतरकं[h] पुण्यं प्रसवति बोधाये[i] प्रणिधेन्तो[j] ।

किं कारणं न[k] ह्येते प्राकृतपुरुषाणां भवन्ति संकल्पाः ।
बहुजनहिताय[l] यत्र ते[m] जनयन्ति मनोरथां[n] वीराः ॥९९॥

एवमुक्ते आयुष्मान्महाकाश्यपः[o] आयुष्मन्तं कात्यायनमब्रवीत् । ये पुनर्भो
जिनपुत्र बोधिसत्वा अवैवर्तिकतायै[p] परिणामेन्ति किन्तु खलु[q] तेषामुपचित- Sen. 81
कुशलपुण्यानां[r] प्रथमा प्रणिधिरुत्पद्यति[s] आहोस्विदुपचितकुशलमूलानामिति[t] । एवमुक्ते
आयुष्मान्महाकात्यायन आयुष्मन्तं[u] महाकाश्यपं गाथाभि[v]रध्यभाषति ।

पूजयन्ति प्रथमं तथागतां[w]
गौरवेण[x] महता महायशा ।
नैव[y] ताव[z] जनयन्ति[a] मानसं[b]
अग्रपुद्गलगतं[c] नरोत्तमा[d] ॥१००॥
ते च प्रत्येकबुद्धकोटियो[e]
पूजयन्ति परमार्थपुद्गलां[f] ।
नैव[g] ताव[h] जनयन्ति मानसं
सर्वधर्मविदुताय[i] पण्डिताः ॥१०१॥

पूजयन्ति वशिभूतकोटियो[a]
पूर्वमेव[b] वशिपारमिं गता ।
नैव[c] ताव[d] जनयन्ति मानसं
ज्ञानसागरतराय[e] नायका: ॥१०२॥
ते यदा विपुलपुण्यसंचया[f]
भोन्ति भावितशरीरमानसा:
ते समेत्य वररूपधारिणां
बोधये[g],उपजनेन्ति'मानसं ॥१०३॥
यं[h] मया कुशलमूलमर्जितं
तेन मे भवतु सर्वदर्शिता[i] ।
Sen. 82 मा[j] च मे प्रणिधि[k] तच्चिरंतरो ।
एवमेष प्रणिधि: प्रवर्ततु[l] ॥१०४॥
यश्च[m] मे कुशलमूलसंचयो ।
सो महा भवतु[n] सर्वप्राणिभि:[o] ।
यच्च[p] कर्म अशुभं कृतं मया ।
तत्फलं कटुकं निस्तराम्यहमिति[q][r] ॥१०५॥

एवमुक्ते[s] आयुष्मान्महाकाश्यप:[t] आयुष्मन्तं[u] महाकात्यायनमेतदुवाच । कथं[v] च भो जिनपुत्र बोधिसत्वा दृढविक्रमा[w] भवन्ति ये ते अवैवर्तिका भवन्ति । एवमुक्ते आपुष्मान्महाकात्यायन[x] आयुष्मतं काश्यपं गाथाभिरध्यभाषे ।

येनान्तरेण परमार्थविदुभवामि[y]
तं अन्तरं यदि अवीच्चिगतो वसामि ।

तं[a] अभ्युपेमि[b] न च तं प्रतिसंहरामि[c]
सर्वज्ञताये[d] प्रणिधि[e] इति निश्चयो मे ॥१०६॥
जाती[f]जरामरणशोक[g]उपद्रवांश्च
त्यक्तुं[h] प्रभुः[i] न हि[j] विवर्तयि[k] मानसानि[l] ।
दुःखसंहति जगतो अर्थकरो[m] प्रजानाम्
इत्येतं विक्रम[n]बलं पुरुषर्षभानामिति ॥१०७॥

एवमुक्ते आयुष्मान्[o]महाकाश्यप आयुष्मन्तं महाकात्यायनमब्रवीत्। यं[p] पुनर्भो
जिनपुत्र अवैवर्तियो बोधिसत्वो प्रथमं[q] चित्तमुत्पादयति[r] कतमेषां[s] तदा अद्भुतानां[t]
धर्मणां प्रादुर्भावो[u] भवति। एवमुक्ते[v] आयुष्मान्महाकात्यायनो[w] आयुष्मन्तं[x] महा- Sen. 83
काश्यपं गाथाभिरध्यभाषति[y]।

सनगरनिगमसरिता रणति वसुमती[z] प्रभूतरत्नवती ।
प्रभवति यदा प्रथमतो प्रणिधानं[a] जगत्प्रधानानां[b] ॥१०८॥
दिवसकरसदृशतेजश्चाभासो[c] विकसते दिशः[d] सर्वाः[e] ।
यदा पुरुषसिंह[f]ताये[g] आद्यप्रणिधिः[h] समुद्भवति[i] ॥१०९॥
सुरवरगणाश्च[j] उदग्राः परंपरा[k]नभि गिरामुदीरेन्ति[l] ।
एष[m] नरसिंहताये[n] प्रणिधेति अनन्तवूदग्रो[o] ॥११०॥
अस्माभिः[p] रक्षितव्य[q] एष[r] हि जगतोर्थं[s] अतितेजस्वी[t] ।
चिनोति शुभं शुभकरो इदमाश्चर्यं[u] तदा भवति ॥१११॥

एवमुक्ते आयुष्मां[v] काश्यप[w] आयुष्मन्तं[x] महाकात्यायनमुवाच। ये इमे भो जिनपुत्र अविवर्तिका[y] बोधिसत्वा[z] केवत्तकानि[a] तैः प्रथमायां भूमौ स्थितैः[b] दुष्कराणि कृतानीति। एवमुक्ते आयुष्मान्[c]महाकात्यायन आयुष्मन्तं महाकाश्यपं श्लोकानुवाच।

[a]भार्या [b]प्रियां [c]हृदिसुखांश्च सुतां [d]शिरांसि
नेत्रा[e]णि चाभरणवाहनविस्तरांश्च ।
[f]दत्त्वा न विश्रममुपेन्त्यथ दैन्यतां[g] वा
Sen. 84 सर्वज्ञतामभिमुखाः पुरुषर्षभास्ते ॥११२॥

आ[h]र्धर्षिता च [i]वधबन्धनताडनेभ्यो[j]
रौद्रै[k]र्नरै[l]रशुभकर्म[m]मतिप्रवणैः[n] ।
ता[o]नेव दृष्ट्व पर[p]मार्दवमैत्रचित्ता
श्लक्ष्णाभि वाग्भि[q]रनघाः समुदाचर[r]न्ति ॥११३॥

दृष्ट्वा च याचनक मा[s]नप्रमादुपेतं
हर्षं परं प्र[t]तिलभन्ति महामनुष्या[u]ः ।
दत्त्वा[v] च व[w]र्धितगुणा[x]त्तमना भवन्ति
प[y]श्चात्तपो न तु तपन्ति [z]तपोनिराशा[a] इति[b] ॥११४॥

इति श्रीमहावस्तुअवदाने प्रथमा[c] भूमिः समाप्ता ॥

ततश्च काश्यपस्थवि[d]रः महाकात्यायनमब्रवीत् ।
[e]निर्दिष्टा प्रथमा भूमि महासत्व मनो[f]रमा ॥१॥
द्वितीयां संक्रमन्तानां भूमिं[g] नरवरात्मजा ।
किं चित्तं बोधिसत्त्वानां जा[h]यते समनन्तरं ॥२॥
[i]के च अध्याशया सन्ति द्वितीयायां जिनात्मज[j] ।
भूमिन्तां बोधिसत्वानां यथाभूतमु[k]दीरयेदिति ॥३॥
ततः कात्यायनः स्थवि[l]रः काश्यपमिदमब्रवीत् ।
निर्दे[m]शं बोधिसत्वानां[n] कीर्तयिष्ये मनोरमं ॥४॥

द्वितीयां[a] संक्रमन्तानां प्रथमतोऽनुजायते[b] । Sen. 85
अरती[c] बोधिसत्वानां भवेष्विति न संशय[d] ॥५॥

बोधिसत्वानां[e] भो जिनपुत्र द्वितीयायां[f] भूमौ वर्तमानानां इमे अध्याशया[g] भवन्ति । तद्यथा कल्याणाध्याशया[h] भवन्ति स्निग्धाध्याशयाश्च[i] भवन्ति मधुरा-[j]ध्याशयाश्च भवन्ति तीक्ष्णाध्याशयाश्च भवन्ति विपुलाध्याशयाश्च भवन्ति विचित्रा-ध्याशयाश्च भवन्ति[k] गम्भीराध्याशयाश्च भवन्ति[l] अपर्यादिन्नाध्याशयाश्च भवन्ति अनुपहताध्याशयाश्च भवन्ति असाधारणाध्याशयाश्च भवन्ति उन्नताध्याशयाश्च भवन्ति अकृपणाध्याशयाश्च भयन्ति अनिवर्ताध्याशयाश्च[m] भवन्ति अकृत्रिमाध्याशयाश्च[n] भवन्ति शुद्धाध्याशयाश्च भवन्ति दृढाध्याशयाश्च भवन्ति स्वभावाध्याशयाश्च भवन्ति तृप्ताध्या-शयाश्च भवन्ति[o] पुद्गलाध्याशयाश्च भवन्ति अनन्ताध्याशयाश्च भवन्ति ।

कथं भो धुतधर्मधर[p] बोधिसत्वाः[q] कल्याणाध्याशयाः भवन्ति । उच्यते ।

बुद्धे[r] धर्मे च संघे[s] च न कांक्षन्ति कथं चन ।
इति[t] अध्याशयस्तेषां कल्याण[u] उपदिश्यते[v] ॥६॥

कथं भो धुतधर्मधर बोधिसत्वाः स्निग्धाध्याशया भवन्ति । उच्यते ।

अङ्गेषु छिद्यमानेषु मनस्तेषां न[w] कुप्यते ।
एवमध्याशयस्तेषां[x] स्निग्धमृदूपदिश्यते[y] ॥७॥

कथं च भो धुतधर्मधर[z] बोधिसत्वाः[a] मधुराध्याशया[b] भवन्ति । उच्यते[c] ।

अन्तःकुशलकर्माणि[d] सेवन्ति पुरुषोत्तमाः । Sen: 86
एवमध्याशया[e] मधुरा भवन्ति[f] धुतबुद्धीनामिति ॥८॥

कथं भो धुतधर्मधर बोधिसत्वाः[g] तीक्ष्णाध्याशया भवन्ति[h] । उच्यते[i] ।

बुध्यन्त्याशयसंयुक्ता[j] लोके[k] लोकोत्तरे तथा ।
[l]एवमध्याशया[m] तीक्ष्णा भवन्ति शुद्धकर्मणामिति[n] ॥९॥

कथं च भो धुत[a]धर्मधर बोधिसत्वा[b] विपुलाध्याशया भवन्ति । उच्यते[c] ।

[d]सर्वभूतान हितार्थं संचि[e]नोन्ति शुभं बहुं ।
[f]एवमध्याशया विपु[g]ला भवन्ति[h] परमर्षि[i]णामिति ॥१०॥

कथं[j] भो धुतधर्मधर बोधिसत्वा[k] विचित्राध्याशया भवन्ति । उच्यते[l] ।

विचित्राणि[m] मनोज्ञानि देन्ति दानान्यमत्सराः ।
[n]एवमध्याशया विचित्रा भवन्त्[o]युत्तमदर्शिनामिति ॥११॥

कथं च भो धुतधर्मधर बोधिसत्वा अपर्यादिन्नाध्याशया[p] भवन्ति । उच्यते[q] ।

अपर्यादिन्नचित्तास्ते प्रतिवेधपराक्रमाः ।
एवमध्याशयस्तेषामपर्यादिन्न उच्यते ॥१२॥

कथं च भो धुतधर्मधर बोधिसत्वा[r] अनुपहताध्याशया भवन्ति । उच्यते[s] ।

[t]न ते शक्यन्ति संहर्तुं[u] दुष्टचित्तेन केनचित् ।
एवमध्या[v]शयस्तेषां न जातु उपहन्यते ॥१३॥

Sen. 87 कथं च भो धुतधर्मधर बोधिसत्वा[w] असाधारणाध्याशया भवन्ति । उच्यते[x] ।

[y]यं नान्यः प्रणिधिः[z] क[a]श्चित् एवं स[b]त्वस्योपजायते ।
सर्वसत्वसुखार्थाय त[c]दसाधारणं विदुरिति ॥१४॥

कथं च भो धुतधर्मधर बोधिसत्वा[d] उन्नताध्याशया भवन्ति । उच्यते ।

[e]अपरतीर्थिक[f]मत श्रुत्वावज्ञा प्रतिष्ठते[g] ।
उन्नताध्याशयास्तेन नरसिंहा [h]भवन्ति ते ति ॥१५॥

[i]कथं च भो धुतधर्मधर बोधिसत्वा[j] अकृपणाध्याशया भवन्ति । उच्यते[k] ।

न कामगुणभोगार्थं संचि[l]न्वन्ति शुभं वि[m]दूः ।
ततश्चाकृपणास्तेषां भवन्त्यध्याशया[n] सदेति ॥१६॥

कथं च भो धुतधर्मधर बोधिसत्वा[o] अनिर्व[p]र्तियाध्याशया भवन्ति । उच्यते[q] ।

कामैः[a] ते नावकीर्यन्ते बुद्धत्वे[b] कृतनिश्चयाः ।
तेनानिर्वर्तियास्तेषामध्याशया[c] इति स्मृताः ॥१७॥

कथं च भो धुतधर्मधर बोधिसत्वा अकृत्रिमाध्याशया[d][e] भवन्ति । उच्यते[f] ।

वशि[g]प्रत्येकबुद्धानां न स्पृहेन्ति कथं चन ।
एवं[h] चाकृत्रिमो[i] भवति[j] तेषामध्याशयः[k] सदेति ॥१८॥

कथं च भो[l] धुतधर्मधर बोधिसत्वाः[m] शुद्धाध्याशया[n] भवन्ति । उच्यते[o] ।

लाभसत्कार[p]मुत्सृज्य परमार्था[q]भिकांक्षिणो[r] । Sen. 88
शुद्ध[s] अध्याशयस्तेषा[t]मित्येव[u]मुपदिश्यते[v] ॥१९॥

कथं च भो धुतधर्मधर बोधिसत्वा दृढाध्याशया[w] भवन्ति । उच्यते[x] ।

न[y] संहरति[z] वीरियं धर्मे लोकै[a]रभिद्रुता[b] ।
एवमध्याशया[c]स्तेषां[d] दृढा सन्ति महर्षिणामिति ॥२०॥

कथं च भो धुतधर्मधर बोधिसत्वाः[e] स्वभावाध्याशया भवन्ति । उच्यते[f] ।

मूर्च्छितास्ते[g] न[h] भुंजन्ति परान्नान्यवस्तु[i]ता ।
स्वभावाध्याशयस्तेषा[j]मेवमार्य[k] प्रशंस्यते ति ॥२१॥

कथं च भो धुतधर्मधर बोधिसत्वाः[l] तृप्ताध्याशया भवन्ति । उच्यते[m] ।

नात्र प्रस्यन्दन्ति[n] कामेषु निष्क्रम्याभिरताः[o] सदा[p] ।
एवमध्याशयो[q] तृप्तो[r] बोधिसत्वे[s] प्रशंस्यते[t] ति ॥२२॥

कथं[u] च[v] भो धुतधर्मधर बोधिसत्वाः पुद्गलाध्याशया[w] भवन्ति । उच्यते[x] ।

स्वयंभू[y]सर्वदर्शि[z]त्वमभिकांक्षन्ति[a] पण्डिताः[b] ।
पुद्गलाध्याशया[c] भवन्ति[d] चैवमप्रतिमा[e] ध्रुवाः[f] ॥२३॥

कथं च भो धुतधर्मधर बोधिसत्वा[g] अनन्ताध्याशया भवन्ति । उच्यते[h] । Sen. 89

न प्रार्थयन्ति[i] महाभोगानदानगुणसंपदा[j] ।
अनन्ताध्याशयाश्चैवं[k] भवन्ति पुरुषोत्तमा इति ॥२४॥

सर्वे[a]हि एतेहि विंशद्भिः सर्वधर्मविशारदा[b]।
समन्विता[c] सत्पुरुषा शुभै[d]रध्याशयै[e]र्वरा इति ।।२५।।

इमेहि खलु भो धुत[f]धर्मधर बोधिसत्वा विंशद्भिरध्याशयैः समन्वागता भवन्ती[g]ति ।

एवमुक्ते[h] आयुष्मान्महाकाश्यप[i] आयुष्मन्तं[j] महाकात्यायनमुवाच । कतिहि भो जिनपुत्र[k] आकारेहि बोधिसत्वा द्वितीयायां[l] भूमौ वर्तमानास्तृतीयायां भूमौ विवर्तन्ति[m] । एवमुक्ते[n] आयुष्मान्महाकात्यायनो[o] आयुष्मन्तं महाकाश्यपमुवाच । अष्टाविंशद्भिः[p] भो धुतधर्मधर कारणेहि बोधिसत्वा द्वितीयायां भूमौ[q] वर्तमानाः[r] तृतीयायां भूमौ विवर्तन्ते[s] । कतमै[t]रष्टाविंशद्भिराकारैः । तद्यथा लाभगुरुकाश्च भवन्ति । सत्कारगुरुकाश्च भवन्ति[u] । कीर्ति[v]श्लोकपराश्च भवन्ति । शुठाश्च[w] भवन्ति[x] । विषमेण[y] च वृद्धिं कल्पयन्ति । गुरुकोपन[z]भाषणपराश्च भवन्ति । त्रिषु[a] रतनेषु[b] न च चित्रिकार[c]बहुला[d] वितरन्ति । दक्षिणीयेषु बोधिसत्वचरितं[e] च न पर्येषन्ति[f] । यतश्च बोधिसत्वचरित[g]भूमिं प्राप्नुवन्ति[h] तां न पूजयन्ति । अतिरेकपूजाये प्राप्यं च भारं[i] न उपादियन्ति[j] । अप्राप्यं च भारं उपादियित्वा वितरन्ति । आकीर्णविहारेण[k] च नार्तीयन्ति । माल्य[l]-
Sen. 90 वस्त्रालंकारा[m]भारणानुलेपनधराश्च[n] भवन्ति । अल्पगुणपरितुष्टाश्च भवन्ति[o] । अभीक्ष्णं लोकरमणीयाभिरताश्च भवन्ति । न च सर्वधातू[p] अनित्या संकल्पयन्ति । स्वेन च वर्णरूपेण परमभिमन्यन्ति । न च विपरीतदर्शनत्यागं[q] करोन्ति । न[r] च यथोद्दिष्टं[s] पदव्यंजनं परिपूर्णं करोन्ति । देशनामत्सरिणश्च भवन्ति । अपात्रदर्शिनश्च[t] भवन्ति । पात्रे च न प्रतिपादयन्ति । कठिन[u]सन्ताना[v]श्च भवन्ति । असमीक्ष[w]कारिणश्च भवन्ति । ये[x] केचि[y] भो धुतधर्मधर बोधिसत्वा द्वितीयायां भूमौ वर्तमाना[z] तृतीयायां भूमौ विवर्तन्ति[a] सर्वे[b] ते इमेहि[c]रष्टाविंशद्भिराकारै[d]र्विवर्तन्ति ।

तत्रे[e]दमिति उच्यते[f] ।

इत्येषा[a] द्वितीया[b] भूमि[c] बोधिसत्वानमुच्यते[d][e] ।
नानाकुशलकोशानां[f] लोकार्थसुखचारिणां ॥२६॥
ये हि[g] दोषेहि संयुक्ता विवर्तन्ति तथाविधा[h] ।
ये[i] चैवं परिवर्तन्ता[j] न[k] विवर्तन्ति[l] पण्डिताः ॥२७॥
दुरारोहां[m] धुरधीराः[n] प्रतिपद्यन्ति शूरतां[o] ।
तां[p] च लोकानुकम्पार्थं[q][r] बहुदुःखा[s] चरन्ति ते ॥२८॥
ते ते देवमनुष्याणां पूज्याः सर्वे[t] तथागताः ।
तथा हि विविधं दुःखं उपेन्ति ज्ञानपूर्वकं ॥२९॥
नानाधातुमिमं लोकमनुवर्तन्ति[u] पण्डिताः ।
तेन तेषां गता कीर्ति लोके[v] समरुमानुषे इति ॥३०॥

इति श्रीमहावस्तुअवदाने द्वितीयभूमिः समाप्ता ॥

एवमुक्ते[w] आयुष्मान्महाकाश्यपः[x] आयुष्मन्तां[y] महाकात्यायनमुवाच[z] । द्वितीया भूमितो तृतीयां भूमिं[a] संक्रमन्तानां[b] बोधिसत्वानां[c] नरवरात्मज कीदृशं जायते[d] चित्तमिति । Sen. 91

ततः कात्यायनस्थविरः[e] काश्यपमिदमब्रवीत् ।
श्रूयतां बोधिसत्वानां सन्धिचित्तमनुत्तमं ॥१॥
त्यागे[f] प्रवर्तते चित्तं बोधिसत्वानमावुसो[g] ।
तृतीयां[h] संक्रमन्तानां द्वितीयातो जिनात्मज[i] ॥२॥
सुखेन्ति सर्वसत्वानां[j] संस्थितानि[k] नरेश्वराः[l] ।
तं च नात्मसुखार्थाय नापि बोधेः कथं चन ॥३॥
क्रिणन्ति[m] पुत्रदारेण एकगाथां सुभाषितां ।
… … … … … … … ॥४॥
साधुना बोधिसत्वेन राज्यं कारयता[n] पुरा[o] ।
… … … … … … … ॥५॥

वनगहनं[a] बलगहनं[b] गिरिगहनानि[c] त्यागग्रहणानि[d] ।
विषमाप्रतिसन्निषण्णवनानि[e][f] तु मनुष्यगहनानि[g] ॥६॥
तृणगुल्मकण्ठकलताकुलानि वृक्षग्रहणा[h] गहनानि ।
शठनिकृति[i]पैशुन्यानि[j] तु मनुष्यगहनानि[k] ॥७॥
... ... ।
... ...भण्डिना[l] ब्रूहि ब्राह्मण ॥८॥

Sen. 92 ......बोधिसत्वेन एका गाथा सुभाषिता[m] ।
बोधिसत्वेन सा क्रीता[n] परमार्थाभिकांक्षिणा ॥९॥
अहितुण्डिकातो[o] हस्तातो यत्नात्क्रीतं[p] सुभाषितं ।
यावज्जीवन्ते[q][r] अमुष्यां पेलायां दुष्कृतं कृतं ॥१०॥
ब्राह्मणो[s] अभ्युपगम्य[t] ऋषिदेवं नरेश्वरं ।
इदमुवाच[u] प्रीतात्मा[v] अस्ति एषा[w] सुभाषिता ॥११॥
तस्य मूल्यं तव[x] शीर्षं त्यक्त्वा[y] शीर्षमित्यब्रवीत्[z] ।
ब्रूहि[a] ब्राह्मण शीघ्रं मे गाथामेतां सुभाषितां ॥१२॥
यदि[b] अपि किञ्चिदशुभं[c] समुदाचरन्ति
संबोधिसत्वचरितान्यभिकांक्षमाणाः[d][e] ।
तैलप्रदीप इव[f] सूर्यमरीचिच्छन्नः[g]
न[h] भ्राजते विपुलपुण्यबलाभिभूतं[i][j] ॥१३॥
सुरूपं[k] नाम भूमिपतिं[l] राक्षसो इदमब्रवीत् ।
अस्ति सुभाषिता[m] गाथा क्रेया यदि क्रीणासि[n] तां ॥१४॥
तस्या[o] मूल्यं कुमारं च देवीं[p] त्वां चैव भक्षयेत् ।
गृह्यतां यदि ते कृत्यं गाथा[q] हि धर्मसंहिता[r] ॥१५॥

सोऽब्रवीद्राजा[a] सुरूपो निःसंगो धर्मं[b]गौरवात् ।
गृह्यतां दीयतां[c] गाथा युक्तं भवतु मा चिरं ॥१६॥

तत्रेमां गाथां सुभाषितां[d] राक्षसो[e] अब्रवीत् । Sen. 93

परिदेवित[f]कंपनेषु[g] अनिष्टसंयोग[h]प्रियहीनेषु[i] ।
उषितं[j] नरकेषु वरं[k] न च कुपुरुषसंश्रय[l]निकेतः ॥१७॥
अमात्यं[m] संजयं नाम पिशाचो इदमब्रवीत् ।
स्वकं मे हृदयं देहि श्रृणु गाथां सुभाषितां[n] ॥१८॥
स्वकन्ते हृदयं देमि[o] ब्रूहि गाथां सुभाषितां ।
पिशाचमब्रवीद्वीरो संजयो विगतव्यथो[p] ॥१९॥

तत्रेमां गाथां सुभाषितां[q] पिशाचोऽब्रवीत् ।

न[r] जातु तृणकाष्ठेहि[s] ज्वलनः[t] शाम्यते ज्वलन् ।
न जातु उपभोगेभ्यः[u] तृष्णा कामेषु[v] शाम्यति ॥२०॥
श्रेष्ठि[w] वसुन्धरं[x] नाम[y] दरिद्रो इदमब्रवीत् ।
इयं सुभाषिता[z] गाथा सर्वस्वेन[a] तु दीयते[b] ॥२१॥

बोधिसत्वोऽब्रवीत् ।

सर्वस्वं[c] ददामि[d] एषां ब्रूहि गाथां[e] सुभषितां ।
एतं[f] सन्तः[g] प्रशंसन्ति[h] धर्मेषु यत्सुभाषितं[i] ॥२२॥

तत्रेमां[j] गाथां सुभाषितां[k] दरिद्रोऽब्रवीत् ।

आकीर्णान्यपि[l] शून्यानि बालिशा[m] यत्र जन्तवः[n] ।
शून्यान्याकीर्णा[o] च सन्ति एकेनापि प्रजानता ॥२३॥ Sen. 94
सुरूपं[p] नाम राजानं पुरुषो एतदब्रवीत् ।
जम्बुद्वीपेन[q] मूल्येन[r] शक्यं श्रोतुं सुभाषितं ॥२४॥

बोधिसत्व उवाच ।

जम्बुद्वीपं च ते देमि सर्वं यत्किंचि इच्छसि ।
शीघ्रं सुभाषितं[a] ब्रूहि ब्रूहि सत्यं यदिच्छसि ॥२५॥

तत्रेमां[b] गाथां सुभाषितां पुरुषोऽब्रवीत्[c] ।

अहंकारममकारा[d] नाना यत्र समुपस्थिता ।
मानं यत्र निरोधाय उत्पद्यन्ते[e] तथागताः ॥२६॥
सत्वरं नाम[f] हरिणं लुब्धक[g] इदमब्रवीत् ।
इयं सुभाषिता गाथा[h] देहि[i] मान्सं श्रृणोहि[j] तां ॥२७॥
यदि विनाशधर्मेण[k] मान्सेनाहं सुभाषितं ।
श्रृणोमि देमि ते[l] मान्सं क्षिप्रं ब्रूहि सुभाषितं[m] ॥२८॥

तत्रेमां[n] सुभाषितां गाथां लुब्धको[o]ऽब्रवीत् ।

सतां[p] पादरजः श्रेयो न सुवर्णमयो गिरिः[q] ।
सो[r] पान्सु शोकहाराय[s] सो गिरि[t] शोकवर्धन[u] इति ॥२९॥
Sen: 95
राजानं[v] नागभुजं नाम तद्दासो इदमब्रवीत् ।
चातुर्द्वीपेन[w] राज्येन[x] शक्यं[y] प्राप्तुं[z] सुभाषितं ॥३०॥

बोधिसत्वो[a]ऽब्रवीत् ।

चातुर्द्वीपं च ते राज्यं देमि[b] क्षिप्रमुदीरय[c] ।
एतां सुभाषितां वाचां मा विलम्ब ब्रवीहि[d] मे ति ॥३१॥

तत्र[e] इमं श्लोकं सुभाषितं तद्दासो[f]ऽब्रवीत् ।

लोमोत्पाटनतुल्यमाहु[g] विदुषः[h] प्राज्ञस्य[i] या विक्रिया[j]
तस्मा ज्ञानबलं समेतिय पुनर्दोषां समूलां नया ।
छित्त्वा दोषविवर्जितेन[k] मनसा संभाति संघः[l] शुचिः
भाति लोकगुरुः[m] सतामनुगतो[n]ऽनिक्षिप्तभारो[o] शुचिरिति ॥३२॥

एवं सुभाषितार्थाय[a] प्रपाते पतितः[b] पुनः ।
भूयः सुभाषितार्थाय[c] पोतस्त्यक्तो[d] महार्णवे ।।३३।।
भूयो[e] अक्षीणि त्यक्तानि श्रुत्वा[f] गाथां सुभाषितां[g] ।
अग्निस्कन्धे[h] पुनः पतितः[i] श्रुत्वा गाथां सुभाषितां[j] ।।३४।।
बहूनि एवमादीनि दुष्कराणि[k] जिनर्षभाः[l] ।
सुभाषितानामर्थाय[m] प्रतिपद्यन्ते[n] महायशा[o] ।।३५।।

एवमुक्ते[p] आयुष्मान्महाकाश्यपः[q] आयुष्मन्तं[r] महाकात्यायनमुवाच । ये पुनर्भो[s] Sen. 96 जिनपुत्र बोधिसत्वाः[t] तृतीयायां भूमौ वर्तन्ते[u] कथं चतुर्थायां भूमौ[v] विवर्तन्ति इति । एवमुक्ते आयुष्मान्महाकात्यायन आयुष्मन्तं महाकाश्यपमुवाच । चतुर्दशभिर्भो[w] धुतधर्मधर आकारैर्बोधिसत्वाः[x][y] तृतीयायां भूमौ वर्तमानाः[z] चतुर्थायां भूमौ विवर्तन्ते । कतमेहि चतुर्दशेहि[a] । अक्षवंकद्यूतक्रीडानुयोगमनुयुक्ताश्च[b][c] भवन्ति । अत्यभीक्ष्णं[d] विवेकं सेवन्ति[e] । राज्यं च कारापयमाणा[f] लोभेनाभिभूता[g] अत्रान्तरविजितवासिनां[h] सर्वस्वहारिणो[i] भवन्ति । अपराधं[j] च अननुयुज्या वधमाक्षेपयन्ति[k] । वध्यांश्च[l] न संगोपायन्ति । पुरुषांश्च[m] वध्रयन्ति[n] । विप्रतिपन्नाश्च भवन्ति । न च[o] भोगयात्रायां[p] संविभजन्ति[q] विद्यमानेषु[r] विभवेषु[s] । प्रव्रजित्वा[t] च सम्यक्संबुद्धानां भाषतां[u] वा[v] बाहुश्रुत्यं[w] न पर्याप्नुवन्ति । पुरा प्रणिधित्वा च[x] बाहुश्रुत्यं न देशयन्ति[y] । आमिषप्रतिबद्धांश्च[z] सेवन्ति[a] न धर्मप्रतिबद्धा । न[b] चाभीक्ष्णं बुद्धवर्णं[c] भाषन्ति[d] । सम्यक्संबुद्धांश्च लोकसमताये[e] देशेन्ति । न[f] च सम्यक्संबुद्धां लोकोत्तरा इति बोधयन्ति । इमेहि[g] भो धुतधर्मधर चतुर्दशभिराकारैः[h] बोधिसत्वाः तृतीयायां[i] भूमौ वर्तमानाश्चतुर्थायां भूमौ विवर्तन्ति । ये[j] हि केचिद्भो[k] धुतधर्मधर बोधिसत्वाः तृतीयायां भूमौ वर्तमानाः[l] चतुर्थायां भूमौ[m] विवर्तेन्सुः विवर्तन्ति[n] विवर्तिष्यन्ति वा सर्वे ते इमेहि चतुर्दशेहिराकारैर्नातो[o] भूय इति ।

Sen. 97 एवमुक्ते[a] आयुष्मान्महाकाश्यप आयुष्मन्तं महाकात्यायनमुवाच। ये पुनर्भो[b] जिनपुत्र बोधिसत्वा अवैवर्तिया[c] प्रथमं[d] चित्तमुत्पादयन्ति बोधाय केवरूपेण सुखेन[e] युज्यन्ति[f] केवत्तकाश्च[g] सत्वा सुख[h]सातसं[i]गता भवन्तीति। एवमुक्ते आयुष्मान्महाकात्यायन आयुष्मन्तं महाकाश्यपं गाथाभिरध्यभाषि।

सर्वसत्व सुखसातसंगता
संभवन्ति यदचिन्त्यमद्भुतं[j]।
जायते[k]' यद मनो महर्षिणां
बोधिमार्ग[l]परिभावनात्मकं[m] ॥३६॥
सप्त[n]रात्रमितिनिश्च[o]याश्च ये
येऽपि[p] ते निरयदारुणालया।
ये च प्रेत[q]भवनेषु प्राणिनो
ते भवन्ति[r] सुखिताश्च नाम ॥३७॥
सप्तरात्रं न च्यवन्ति प्राणिनो
बोधिसत्वकुशलानुकंपया।
क्षुभ्यते[s] च वसुधा ससमुद्रा[t]
सप्रभो[u] भ्रमति मेरुमस्तकः[v] ॥३८॥
भूमि[w] सन्धिषु[x] अयं प्रवर्तते
निश्चला[y] नभसि नात्र संशयः।
तेषु सर्वशुभ[z]कर्मराशिनां
तेजसा भ्रमति सर्वसंततं[a] ॥३९॥

Sen. 98 अथ खलु नामतिदेवो[b] नाम त्रायस्त्रिंशको बोधिसत्वो भूतो एकांसमुत्तरासङ्गं[c] कृत्वा येन भगवन्तो[d] दृष्टो तेनांजलिं प्रणमय्य[e] भगवन्तमभिस्तुतः[f] संमुखं[g] वशीभूतगणस्य[h] इमैः[i] श्लोकैः[j]।

यस्य रूपं[a] हेमाभासं तरुणरविअविहतवपुं[b] विराजिततेजसा
द्वात्रिंशद्भिः पूर्णैः[c] पूर्णं कुशलचरपुरुषकथितैः[d] सुलक्षणलक्षणः[e]।
शीलेनाग्र्यं[f] संपूर्णाभं धरणिनगगुरुतरबलं[g][h][i] बलोत्तमधारिणं
ते वन्दे शान्तं[j] ते दान्तं···स्मृतिविनयकुशलं[k] सुरासुरसत्कृतं ॥४०॥
दीर्घं[l] कालं चित्राचारो कुशल[m] अतिविपुलफलदो[n] भवक्षयकांक्षया[o]
श्लाघ्यैर्नानैः[p] मैत्रीपूर्वैर्बहुविविधजनितकुशलैः[q][r][s] शमाभिमुखो मुनिः।
त्यक्त्वावासं[t] नित्यं विद्वानसुरसुरमहितं[u] सुखितं सत्वप्रतिबोधने
इक्ष्वाकूनां[v] वंशोद्भूतो धरणितलमवतरि[w][x] यशःस्थितो अचलाधृतिः[y] ॥४१॥
मायाया[z] देव्याः कुक्षिस्मि प्रविशिषु स कुमुदसदृशो वरो[a] गजरूपवां[b]
एवं[c]···लोकालोकः[d] तुषितवरभवननिलयं विहाय इहागतः[e]।
सत्वां[f] मत्तां[g] अन्धां दृष्ट्वा विमतिपथविषमपतितां[h] समुद्धरितुं प्रजाः
तस्मि[i] काले रत्नाकीर्णा[j] विविधनिधिनिचयभरिता चचाल[k] वसुन्धरा[l] Sen. 99
तं शाक्येन्द्रं[m] चारित्राढ्यं[n] स्मृतिनिभृतमधिगुणचितं अवन्दि महामुनिं[o] ॥४२॥
प्रासादाग्रे[p] देवी माया सुरपतिप्रवरभवने[q] वा'. सुखैः,प्रविचार्यंते
नृत्यैर्गीतैर्लास्यैर्वाद्यैः[r][s] श्रवणहृदिनयनसुभगैः[t] सुरेष्विव देवता।
सा[u] देवी राजानं खिन्नं वदति वनवरं महिपते ब्रजेयं यदिच्छसि[v]
लुम्बोद्यानं पुष्पाकीर्णं[w] मधुमधुरपरभृतरुतं[x] मनोहृदिनन्दनं ॥४३॥
गत्वा[y] तस्मि स्त्रीभिः सार्धं प्रविचरति मुदितसुखिता[z] वने वनलोलया[a]
सा चोद्यानं[b] पर्यण्वन्ती तरुणलतकिशलयधरां[c][d] ददर्शथ[e] लुम्बिनीं[f]।
बोधिसत्वस्य खलु [b]पुनर्भो धुतधर्मंधर [c]मातुः कुक्षिगतस्य पूजार्थं सततसमितं दिव्यानि [d]तूर्याणि वाद्यन्ति न [e]कदाचिद्दिवा वा रात्रौ वा [f]तिष्ठन्ति। बोधिसत्वं च भो
Sen. 145 धुतधर्मंधर मातुः कुक्षिगतं [g]पूजार्थं अप्सरशतसहस्राणि [h]सन्दर्शयन्ति [i]दिव्यं [j]पुष्पवर्षं दिव्यं
[k]चूर्णवर्षं [l]नोपरमन्ते कदाचित्। मातुः कुक्षिमादौ कृत्वा वोधिसत्वानां यावत्परिनिर्वृंता [m]दशबला च [n]दिव्या च [o]अगुरुधूपा नोपरमन्ति। न खलु भो धुतधर्मंधर बोधिसत्वा [p]मातापितृनिर्वृत्ता भवन्ति। अथ खलु [q]स्वगुणनिर्वृत्ता उपपादुका भवन्ति। तत्रेदमुच्यते।

[r]अथ सा कमलदलनयन अनुबद्धा गन्धर्वबहुभि श्यामा।
[s]सहितं पि तं सुमधुरं [t]शुद्धोदनमब्रवीत् माया ॥१२॥
[u]एषा समादियामि प्राणेहि अहिंसं [v]ब्रह्मचर्यं च।
[w]विरमामि [x]चाप्यदिन्ना [y]मद्यादनिबद्धव[z]चनाच्च ॥१३॥
परुषवचनाच्च [a]नरवर [b]प्रतिविरमामि तथैवं [c][d]पैशुन्या।
[e]अनृतवचनाच्च नरपति विरमामि अयं मम [f]छन्दो ॥१४॥
परकामेषु च [g]ईर्ष्यां न [h]संजनेष्यं नापि अभिद्रोहं।
भूतेषु [i]मैत्रचित्ता मिथ्यादृष्टिं च विजहामि ॥१५॥

एकादशप्रकारं शीलं[a] सेवाम्यहं पृथिवीपाल ।
रजनीमिमामनूनामेवं[b][c] मे जायते[d] छन्दो[e] ॥१६॥
अपि[f] च खलु भूमिपाला[g] कामवितर्को[h] मा मां प्रतिकांक्षि ।
प्रेक्षस्व मा[i] ति अधर्मो भवेय[j] मयि ब्रह्मचारिणिये ॥१७॥
संकल्पं प्रपूरेष्यन्ति[k][l] पार्थिवो[m] भारियामिदमवोचत् ।
अभिरम भवनवरगता[n] अहं च राज्यं च ते वश्यं ॥१८॥ Sen. 146
सा स्त्रीसहस्रमग्रं[o][p] अनुरक्तं गृह्य[q] तं विमानवरं[r] ।
अभिरुह्य सन्निषीदे[s] मनापपरिपूर्णपरिवारा[t][u] ॥१९॥
सा[v] कंचिदेव[w][x] कालं तस्मि हिमपाण्डुपुण्डरीकनिभे[y][z] ।
शयने प्रशमदमरता[a][b] तुष्णीभावेन[c] क्षेपयते[d] ॥२०॥
अथ कौतुहलमनो[e] संजनिया[f] बहुदेवकन्या[g] वरमाल्यधराः[h] ।
जिनमातुः उपगता[i] द्रष्टुमना प्रासादसुन्दराग्रेण स्थिता[j] ॥२१॥
उपसंक्रमित्व[k] शयनोपगतां मायां निशाम्य[l] वरविद्युनिभां[m][n] ।
प्रीतिसुखं विपुलं[o] संजनिया[p] अथ[q] संप्रवर्षि दिविजं[r] कुसुमं ॥२२॥
मानुष्यकं[s] पि[t] किल ईदृशकं रूपं[u] सुजातमिदमाश्चर्यं[v] ।
कंचित्कालं[w] स्थिहिय अन्तरतो नायं समा मरुवधूहि भवे ॥२३॥
लीलां[x] निशामयथ हे सखिका प्रमदाये[y] यादृशीं यथोपयिकां ।
शयने[z] विरोचति[a] मनं हरति विभ्राजते कनकरीतिरिव[b] सा ॥२४॥
इयं[c] तं धरेष्यति महापुरुषं अत्यन्तदानदमशीलरतं[d][e] ।
सर्वाश्रवान्तकरणं[f][g] विरजं किं ह्रायते तव नरेन्द्रवधू[h][i] ॥२५॥ Sen. 147
चापोदरे[j] करतलप्रतिमे[k] वररोमराजिनि चित्रस्तवने[l] ।

इह [a]वासमभ्युपगतो [b]वरदो अविम्रक्षितो [c]अशुचिना [d]भगवां ।।२६।।

अनुरूपा त्वं च [e]प्रमदा प्रवरा माता स [f]चैव [g]पुरुषप्रवरो ।

पुत्रो भवान्तकरणो [h]भगवां किं हायते तव [i]नरेन्द्रवधू इति ।।२७।।

[j]यस्यां [k]खलु भो धुतधर्मंधर [l]जातीयां बोधिसत्वमातरो चरमभविकं बोधिसत्वं [m]धारयन्ति [n]तस्यां [o]जातौ प्रमदावराणां [p]परिशुद्धं [q]परिपूर्णमखण्डं ब्रह्मचर्यं [r]भवति । मनसापि तासां [s]प्रमदोत्तमानां रागो नोत्पद्यते [t]सर्वपुरुषेषु भर्तारमादौ [u]कृत्वा । [v]बोधिसत्वे च भो धुतधर्मंधर मातुः [w]कुक्षिगते [x]बोधिसत्वमाता [y]दिव्यवस्त्रसंवृतशरीरा च [z]भवति दिव्याभरणधारिणी च [a]सुस्नातोच्छादन[b]परिमर्दनपरिषेकं च अप्सरोगणाः [c]बोधिसत्वमातुः प्रतिजागरन्ति । बोधिसत्वे मातुः कुक्षिगते [d]बोधिसत्वमातुः [e]देवकन्याशतसहस्र हि [f]सार्धं [g]हास्यं भवति । [h]तथा प्रसुप्तां च बोधिसत्वमातरं [i]देवकन्या मन्दारवपुष्पदामैः [j]परिवीजयन्ति [k] अग्रयौवन[l]मण्ड[m]प्राप्ता । यदा च तस्या [n]प्रमदोत्तमायाः [o][p]बोधिसत्वः [q]कुक्षिमवतरति न बोधिसत्वमाता [r]कानिचिद्दुःखान्यनु[s]भवति यथान्या [t]प्रमदा । तुषित-

Sen. 148 भवनमादौ कृत्वा सर्वेषां बोधिसत्वानां [u]पंच [v]नीवरणानि विष्कम्भितानि [w]भवन्ति अप्राप्ते धर्मराज्ये । परिपूर्णेहि च दशहि [x]मासेहि सर्वे [y]बोधिसत्वाः मातुः कुक्षौ [z]प्रादुर्भवन्ति [a]दक्षिणेन पार्श्वेन न च तं पार्श्वं भिद्यते । न चात्र [b]किंचिद्विलम्बं [c]भवति [d]जात इत्येवं भवति । [e]तत्रेदमुच्यते ।

अथ [f]प्रतिपूर्णे [g]दशमे मासे माता [h]प्रभूतपुण्यस्य ।

[i]शुद्धोदनं उपगम्य [j]इदमब्रवीत् [k]दृष्ट[l]संकल्पा ।।२८।।

उद्यानगमन[m]बुद्धी उत्पन्ना मे [n]नराधिपा शीघ्रं ।

सज्जेहि वाहनं मे [o]यथोचितां [p]चैवमारक्षां ।।२९।।

[q]एतं श्रुत्वा वचन राजा [r]शुद्धोदनो [s]सुप्रीतमनो ।

आलपति[a] साभिलाषं परिवारवरं[b] पृथिविपालो[c] ॥३०॥
शीघ्रं गजतुरगवतीं[d] सेनां पदातिसमाकुलां[e] विपुलां[f] ।
प्रासशरशक्तिचित्रां[g] सज्जिय[h] प्रतिवेदयध्वं मम ॥३१॥
चतुघोटान[i] तथ[j] अश्वरथान दशशतसहस्रा[k] युज्यन्तु ।
प्रवरा[l] काञ्चनघण्टारवाणि मधुरानुनादानि[m] ॥३२॥
अंजनघनसदृशानां नागानां[n] वर्मधारिणां[o] शीघ्रं[p] ।
प्रतिधेयथ[q] अधिमात्रा सज्जानि दशशतसहस्राणि[r] ॥३३॥
आयुक्तवर्मकवचा[s][t][u] शूरा सज्जीभवन्तु[v] अनिवर्त्या ।
सज्जीभवन्तु चपलं विंशत्साहस्त्रियो[w][x] तेषां[y] ॥३४॥
विपुल[z] सकिंकिणिरणितं सहेमजालं[a] उडारअश्वरथं[b] । Sen. 149
वरमाल्यवस्त्रधारिणो[c] प्रमदा[d] धारेन्तु[e] देवीये ॥३५॥
लुम्बिनिवनं[f][g] च शीघ्रं व्यपगततृणरेणुपत्रसंकारम्[h][i] ।
सुशोधितं मनोज्ञं[j] कुरुत देवीये देवभुवनं[k] वा ॥३६॥
एकैकं[l] च द्रुमवरं[m] दुकूलपट्टोर्णकोशिकारेहि[n] ।
कल्पयथ कल्पवृक्षां[o] यथा दिवि देवप्रवरस्य ॥३७॥
साधूति प्रतिश्रुत्वा ,तस्य वचनेन[p][q] नरेन्द्रगर्भस्य ।
नचिरेण यथाज्ञप्तं कृतमिति प्रतिवेदितं राज्ञः[r] ॥३८॥
सा[s] सलीलचारुवदना[t] माता[u] मारबलसंप्रमथनस्य[v] ।
अभिरूहि[w] सपरिवारा तानि मनोज्ञानि यानानि ॥३९॥
सा विविधाभरणवती[x] पादौघरथौघसंकुला[y]........ ।
शोभति सुसंप्रयाता[z] सेना मनुजप्रधानस्य ॥४०॥
अवगाह्य[a] तद्वनवरं[b] माया सखिसंवृता[c] जिनजनेत्री[d] ।

विचरति[a] चित्ररथे[b] इव अमरवरवधू रतिविधिज्ञा[c] ॥४१॥
सा क्रीडार्थ[d]मुपगता[e] प्लाक्षां शाखां भुजेभिरवलम्ब्य[f] ।
प्रतिजृम्भिता[g] सलीलं तस्य यशवतो[h][i] जननकाले[j] ॥४२॥
अथ विंश[k] सहस्राणि[l] अप्रतिमानि[m] तदाप्सरवराणां[n] ।
दशनख[o]कृतांजलिपुटा[p] मायामभिनन्दिय[q] भणन्ति ॥४३॥
Sen. 150 अद्य[r] जराजातिमथनं जनयिष्यसि[s] अमरगर्भ[t]सुकुमारं[u] ।
देवी दिवि भुवि[v] महितं हितं हितकरं नरमरूणां[w] ॥४४॥
मा खु जनयी[x] विषादं परिकर्म वयं तवं करिष्यामः ।
यत्कर्तव्यमुदीरय[y] दृश्यतु कृतमेव[z] मा चिन्ता ॥४५॥
मातरमबाधमानो प्रादुर्भूतो[a] मनापो[b] मायाये ।
दक्षिणपार्श्वेन मुनिः[c] सुसंप्रजानो परमवादी ॥४६॥
अथ विविधरतननिचया[d] नगरनगरा अनेकसहस्राणि[e] ।
प्रज्वलि[f] प्रभा च विमला प्रादुर्भूते[g] नरवरेन्द्रे[h] ति ॥४७॥

न खलु भो धुतधर्मधर सो[i] अस्ति[j] सत्वो सत्वनिकाये यो चरमां जातिं समनन्तरजातं बोधिसत्वं[k] समर्थो[l] व्याकर्तुं[m] अन्यत्र शुद्धावासेभ्यो[n][o] देवेभ्यः । तत्रेदमुच्यते ।

अंशुक[p]सुवेष्टितशिरा[q] अष्ट सहस्रा[r] महेश्वरवराणां[s] ।
ब्राह्मण[t]बेषधराणां[u] अभिगच्छि पुरं कपिलवस्तु ॥४८॥
ते राज[v]कुलद्वारे[w] वरवसनधरा[x] वराभरणधारी[y] ।
उपगम्य[z] मुदितमनसा[a] प्रतिहारमुवाच[b] सत्ववरा[c] ॥४९॥
शुद्धोधनमुपगम्य[d] ब्रूवीहि इमे लक्षणगुणविधिज्ञा[e] ।
तिष्ठन्ति अष्टसहस्रं[f] प्रविशेदिति[g] यद्यनुमतन्ते ॥५०॥

[a]एतं श्रुत्वा वचनं प्रतिहाररक्षो उपेत्य राज[b]वरं ।
[c]कृतांजलिपुटः प्रणम्य [d]इदं उवाच नराधिपतिं ।।५१।। Sen: 151
[e]सुखं [f]अतुलबल [g]दीप्तिद कारय [h]राज्यं चिरं [i]निहतशत्रुः ।
[j]द्वारे ते [k]अमरसदृशा तिष्ठन्ति [l]प्रवेष्टुमिच्छन्ति।।५२।।
[m]प्रतिपूर्णविमल[n]नयना मधुरस्वरमत्तवारणविचारी ।
भवति मम [o]तेषु संका न ते मनुष्या मरुसुतास्ते ।।५३।।
[p]प[q]रि[r]चंक्रमतां तेषां धरणिरजः क्रम[s]वरा न सं[t]किरति ।
न च तेषु सन्धि[u]शब्दः चंक्रमतां श्रुय्यति [v]कदाचित् ।।५४।।
गम्भीरमधु[w]रचेष्टा आर्याकारा प्रशान्त[x]दृष्टिपथा ।
[y]विपुलां जनेन्ति [z]प्रीतिं जनस्य समुदी[a]क्ष[b]माणस्य ।।५५।।
निःसंशयं [c]नरवरा [d]पुत्रवरं उप[e]गता तवं द्रष्टुं ।
[f]देवगणपुरुषप्रदेवं अभि[g]वाद्य नन्दितुं नर[h]सिंहं ।।५६।।
[i]एतं श्रुत्वा वचनं प्रतिहाररक्षं नराधिपोवाच ।
[j]मयि भो [k]कृताभ्य[l]नुज्ञा [m]प्रविशन्तु निवेशनमुदारं ।।५७।।
[n]अमरप्रवरगणास्ते[o] गगनसमनिभा [p]विशुद्धकर्मान्ता ।
[q]प्रविशेन्सुः पार्थिवकुलमहीनकुल[r]वंश[s]मुख्यस्य ।।५८।।
शुद्धोदनो पि राजा [t]महेश्वरां दूरतो [u]निशामेत्वा ।
[v]प्रत्युत्थित आसनातो [w]सपरिजनो गौरव[x]बलेन ।।५९।। Sen. 152
[y]अभिवादते नरपतिः स्वागत[z]मनुरागतं च सर्वेषां ।
प्रीता स्म [a]दर्शनेन [b]प्रशमदमबलेन च भवतां ।।६०।।
सं[c]विद्यन्ते इमानि [d]वरासनानि वररूपविकृतानि ।
आस्तां [e]ताव भवन्तो [f]अस्माकमनुग्रहार्थाय ।।६१।।

अथ ते[a]ष्वासनवरेषु कनकरजतवर्णचित्र[b]पादेषु ।
[c]विगतमद[d]मानदर्पाः ते तत्र सुखं निषी[e]देन्सुः ॥६२॥
[f]ते [g]कंचिदेव कालं [h]निषण्णमात्रा नराधिपमुवाच ।
[i]शृण्वतु भवां प्रयोजनं यं अस्माकमिह गमनाय ॥६३॥
[j]सर्वानिवद्यगात्रो [k]पुत्रस्तवं [l]अनुजातो············।
लक्षण[m]पार[n]मिप्राप्तो··························॥६४॥
वयमपिं [o]लक्षण[p]कुशला दोषगुणां [q]लक्षणै[r]र्विजानाम ।
यदि न गुरु तव सुतन्ते [s]पश्येम महा[t]पुरु[u]षरूपं ॥६५॥
सो वद[v]ति एथ पश्यथ सुव्यपदेशक्षेमं मम [w]पुत्रं ।
[x]मरु[y]मनुजकीर्तियशसं [z]लक्षणगुणपारमिप्राप्तं ॥६६॥
अथ मृदुककाचलिन्दिक[a]प्रवे[b]णिशयितं च कन[c]कवर्णाभं ।
[d]उपनयति पार्थिववरो [e]नरमरुपरिवन्दितं [f]सुगतं ॥६७॥
[g]आलोकयित्व दूरा [h]महेश्वराः क्रमवरान्नर[i]वरस्य ।
Sen. 153 [j]मूर्ध्ना विग[k]लि[l]तमकुटा धरणिवरतले [m]प्र[n]णि[o]पतेन्सुः ॥६८॥
गोक्षीर[p]विमलचन्द्रं महीतले [q]मूर्ध्नं प्रतिष्ठापेत्वा ।
दशबलमभि[r]नन्दन्ताः स्थिता सुचिरकालमभि[s]कांक्षितं इति ॥६९॥

[t]जाता खलु भो धुतधर्मधर [u]बोधिसत्वाः सर्वाणि मानुष्यकानि [v]शिल्[w]पानि अना[x]चा[y]र्यकाप्यनुतिष्ठन्ति ।

न खलु भो धुतधर्मधर [z]बोधिसत्वाः [a]तुषितभवनात्प्रभृति कामां प्रतिसेवन्ति । भो जिनपुत्र को हेतुः [b]कः प्रत्ययः यं अप्रहिणेहि क्लेशेहि बोधिसत्वाः कामां न प्रतिसेवन्ति राहुलश्च [c]कथमुत्पन्न इति । [d]एवमुक्ते आयुष्मान् महाकात्यायन आयुष्मन्तं

महाकाश्यपमुवाच । परि[a]पि[b]ण्डत्वात्कुशलस्य बो[c]धिसत्वा कामां न प्रतिसे[d]वन्ति कल्याणाध्याशयत्वात् अ[e]ग्रा[f]ध्याशयत्वात्प्रणीताध्याशयत्वाच्च बो[g]धिसत्वा का[h]मां न प्रति[i]सेवन्ति । अका[j]मकामित्वात् ज्ञा[k]नध्वजत्वात् अ[l]तत्प[m]रायण[n]त्वात् स्पृहानुपस्थितत्वाद्बोधिस[o]त्वाः का[p]मां न प्रति[q]सेवन्ति । आर्य[r]त्वात् अनीचत्वात्कुश[s]लपरि[t]भावितत्वाच्च बोधि[u]सत्वाः का[v]मान्न प्रति[w]सेवन्ते परमपुरु[x]षसंभावितत्वाच्च लोक[y]स्य सम्यक्संबुद्धो॰भविष्यतीति ।

अथ रा[z]हु[a]लस्तुषितकायाच्च्यवित्वा मातुः यशोध[b]रायाः क्षत्रि[c]यकन्यायाः कुक्षिमवतीर्ण इति । ए[d]वमनुश्रुयते भो धुतध[e]र्मंधर । रा[f]जानश्चक्रव[g]र्तिनः औपपा[h]दुका ब[i]भूवु । तद्य[j]था कुसुमचूडः हेमवर्णः गान्धर्वः सु[k]मालः रत्नदण्डः सुवि[l]मानः, आर्जवः मान्धाता Sen. 154
सुनयः सुवस्त्रः बहुपक्षः तोरग्रीवः म[m]णिविरजः पवनः मरुदेवः सुप्रियः त्यागवां शुद्धवंशः दुरारोह [n]इति इत्येवमादयश्चक्रवर्तिगणाः औपपा[o]दुका आसन् न तथा राहुलभद्र इति ।

कथं भो धुतधर्मंधर, बोधि[p]सत्वा अभिनिष्क्रमणसंप[q]न्ना भवन्ति । भूतपूर्वं भो जिनपुत्र बोधि[r]सत्वो अभिनिष्का[s]न्तः । रा[t]जकु[u]लगतः छन्दकं गा[v]थयाध्यभाषते ।

क्षिप्रं छन्दक क[w]ण्ठकमु[x]पनीत्वा मा चिरं विलम्बाहि ।
सं[y]ग्राममहं दुर्जयं ज[z]यिष्ये अद्य भ[a]व वूदग्रो ॥७०॥
सो वा[b]ष्पपूर्णव[c]दनो परिनिःश्वसन्तो
छन्दकः स[d]शोकरवितानि समुत्थि[e]तानि ।
वाष्पाणि मु[f]ञ्चति इमा[g]नि प्रबोधना[h]र्थं
सुप्तस्य पार्थि[i]वजनस्य............... ॥७१॥
किं दा[j]नि आविगलिता वरको[k]शभारा
वाष्पौघसंस्त[l]रगता मदनाभिभूता ।
लालस्य[m]सोकप[n]रिदेवितकाल एव

सुप्ता [a]इदानि [b]यद जाग्रणदेशकालः ।।७२।।
[c]देवी पि नाम सुचिरं प्रतिजागरित्वा
[d]सौदामनीप्रति[e]मरूप[f]निभा शयाना ।
निर्या[g]णकालसमये नरलम्बक[h]स्य
वरसुरपुरे सुरवधू[i]प्रतिमा सलीला ।।७३।।
Sen. 155 [j]सा दानि तस्य महिषी मनुजेश्वरस्य
[k]माता सवत्सलविशालसुचारुनेत्रा ।
[l]संपश्यमान करुणं प्रियविप्रयोगं
निद्राभिभूत न [m]विजानति [n]आलपन्तं ।।७४।।
[o]सा दानि [p]कुञ्जरवराश्वसमाप्तयोधा[q]
नाराचप्रासशर[r]शक्ति[s]विचित्रवर्मा ।
[t]सेना कहिं वसति कं वा गुणं' करोति
या शाक्यपुङ्गवं न बुध्यति निष्क्रमन्तं ।।७५।।
कं [u]बोधयामि मम को नु [v]भवे सहायो
किं वा करोमि [w]दिवसे अपि विप्र[x]नष्टे ।
हा हेमकाञ्चननिभेन [y]किल विहीनो
राजा [z]जहिष्यति सबन्धुजनो शरीरं ।।७६।।
तं देव[a]संघ अवची [b]मधुर[c]प्रलापी
[d]किं [e]छन्दका लपसि किं ति विहन्यितेन ।
नैतस्य [f]मारकपुत्राण्यपि उद्यतानि
विघ्नं समर्थं जनयेयु कुतो पुनस्त्वं ।।७७।।
भेरिमृदङ्ग यदि शंखसहस्रशब्दं

[a]कुर्यात्कोचित्कपिलवस्तुनि [b]बोधनार्थं ।
नैतद्विबुद्धि अमरे[c]श्वरमा[d]दिकेहि
तं [e]सोपितं [f]पुरवरं हि [g]समृद्धवारं ॥७८॥
[h]पश्यासि ताव गगने म[i]णि[j]रत्नचूडा
[k]देवा दिवि गुरु[l]क्ततस्य वसानुवर्ती । 5 Sen. 156
[m]प्रह्वा क्ृतांजलि[n]पुटा [o]प्रणिपत्य [p]मूर्ध्ना
त्वं बन्धु त्वं च [q]शरणं ति नमस्यमाना ॥७९॥
[r]त[s]त्साधु कण्ठकमुपानय [t]नायकस्य
गोक्षीरहेमवपुषं सहजं [u]तुरंगं ।
[v]न ह्यस्ति [w]सो भुवि दिवि [x]नरलम्बकस्य
यो [y]विघ्नं [z]कुर्या उपनेहि [a]तुरंग[b]श्रेष्ठं ॥८०॥
सो तं [c]प्रफुल्लकुमुदाकरकुन्दगौरं
[d]संपू[e]र्ण[f]चन्द्रवपुषं [g]सहजं तुरंगं ।
तस्य महागुणधरस्य [h]व[i]चा[j]भितुन्नो
सुश्रूषकारि [k]उपनामयते रुदन्तो ॥८१॥
एषो ति नाथ वरलक्षण[l]भूषिताङ्गो
[m]सज्जः सुद्योतचरणो ललिताग्रगामी ।
यं दानि ते ध्यवसितं वररूप[n]धारि
तन्ते [o]समृध्यतु [p]विशालभुजान्तरांशा ॥८२॥
[q]शत्रुश्च ते ग्रबलदुर्बलभग्नशूको
शीघ्रं [r]त[s]पेतु तव तेजवराभिभूतः ।

आसा च ते[a] नरलम्बक[b] महार्थयुक्ता[c]
संपूर्यतां[d] कनकपर्वतसन्निकाशा[e] ॥८३॥
ये तुभ्य[f] विघ्नकरा[g] ते तु अपक्रमन्तु
Sen. 157 श्रेयावहा[h] तु ति बलं विपुलं[i] लभन्तु ।
यं च व्रतं समुपगच्छसि[j] तस्य[k] पारं
गच्छासि मत्तवरवारणखेलगामि[l][m][n] ॥८४॥
मणिकुट्टिमा[o] च वसुधा राजकुले[p] कण्ठकस्य पादेहि ।
समनिहता रसति मधुरं[q] निशां स्फुरति अद्भुतं[r] शब्दं ॥८५॥
चतुरश्च[s] लोकपाला विगलितमकुटा[t] प्रलम्बवरमालाः ।
कण्ठकपादेषु[u] करां न्यसन्ति रक्तोत्पलसकाशां[v] ॥८६॥
अग्रतो[w][x] वज्रवरधरो त्रिदशगुरू[y] आबद्धमणीचूडो[z] ।
इन्द्रो सहस्रनयनो गच्छति पुरतो नरवरस्य ॥८७॥
संज्ञाकृतमात्रमिदं कण्ठको[a] वहतीति वादिशार्दूलं[b][c] ।
देवा प्रवरकरहृतं[d] वहन्ति अंशुप्रवरवर्षं[e] ॥८८॥
निष्क्रम्य नगरवरातो[f] अवलोकयि[g] पुरवरं पुरुषसिंहो[h] ।
न तं पुनरहं[i] प्रवेक्ष्यमप्राप्य जरामरणपारमिति[j] ॥८९॥

एवमभिनिष्क्रमणसंपन्ना[k][l][m] खलु भो धुतधर्मधर सम्यक्संबुद्धा[n] इति । न प्रतिबलो[o] खल्वहं भो धुतधर्मधर बोधिसत्वस्य गर्भावक्रान्तिमादौ[p] कृत्वा यावदभिनिष्क्रमणतो[q] विस्तरेण भाषितुं[r] कल्पं कल्पावशेषं वा न च गुणा[s] समन्ता शक्यमभिगन्तुं । इत्यपि[t] बहुगुणसंपन्ना[u] सम्यक्संबुद्धा[v] इति ।

Sen. 158 बोधिमूलमुपगम्य[w] चाप्राप्तायां सर्वाकारज्ञतायां[x] पंचचक्षुसमन्वागता[y] भवन्ति ।
एवमुक्ते[z] आयुष्मान्[a] महाकाश्यप आयुष्मन्तं महाकात्यायनमुवाच । विस्तरेण भो

जिनपुत्र पंच [a]चक्षूणि परिकीर्तय अवहितश्रोता देव[b]मनुष्यसंकुला परिषा सर्व[c]भूतगणा इति। एवमुक्ते आयुष्मान् [d]महाकात्यायन आयुष्मन्तं महाकाश्यपमुवाच। पंच इमानि भो धुतधर्मधर सम्यक्संबुद्धानां [e]चक्षूणि [f]भवन्ति। कतमानि पंच। [g][h]मान्सचक्षुः दिव्यचक्षुः [i]प्रज्ञाचक्षुः धर्मचक्षुः बुद्धचक्षुः। इमानि भो धुतधर्मधर [j]पंचचक्षूणि सम्यक्संबुद्धानां भवन्ति असाधारणानि प्रत्येकबुद्धेभ्यः अर्हन्तेभ्यः शैक्षेभ्यः [k]सर्वबालपृथग्[l]जनेभ्य इति। तत्र भो [m]धुतधर्मधर [n]मान्सचक्षुस्तथागतानां। [o]याये प्रभाये [p][q]समन्वागतं याये [r]शूक्ष्मदर्शनाये [s][t][u]समन्वागतं याये [v]तत्त्वदर्शनाये [w][x]समन्वागतं [y]तन्मान्सचक्षु अन्यस्य [z]सत्वस्य सत्वकायें नास्ति। प्राप्ते च सर्वदर्शित्वे बोधिसत्वा [a]यावत्तक[b]मवकाशमवलोकयितुमिच्छन्ति तं दर्शनं तत्र अप्रतिहतं [c]प्रवर्तते। किं [d][e]कारणं। विपुलकुशलसं[f]चितत्वात्। [g]तद्यथापि [h]नाम [i]ऋद्धिबलेन राजा चक्रवर्ति [j]सार्धं [k]चतुरंगिनीया सेनाये [l]वैहायसं द्वीपातो [m]द्वीपं [n]संक्रामति [o]तथेदं पि [p]द्रष्टव्यं। [q]सम्यक्संबुद्धानां चरिते ऋद्धिबलेन [r]अनाकांक्ष[s]माणानां [t]निश्चलां वसुमतिं प्रतिक्रमन्तानां [u]उन्नता [v]च [w]ओनमति ओनता च उन्नमति [x]तथैतदपि [y]द्रष्टव्यमित्येवमादिना लक्षणमात्रे[z]ण [a]सम्यक्संबुद्धानां [b]मान्सचक्षुः निरुपदिश्यते। [c]न च Sen. 159
कल्पेन सम्यक्संबुद्धानां [d]मान्सचक्षुस्य [e][f]शक्यं गुणपर्यन्तमधिगन्तुं। किं [g]कारणं। न हि [h]किंचित्सम्यक्संबुद्धानां लोकेन समं। अथ खलु [i]सर्वमेव महर्षिणां लोकोत्तरं। तथा [j]हि सम्यक्संबुद्धानां समुदागमः सो पि [k]लोकोत्तरो। [l]तत्र सम्यक्संबुद्धानां [m]मान्सचक्षुषः वर्णं प्रवृत्तं स्थानं च यथान्येषां [n]सत्वानां सत्वकाये। येन चक्षुषा [o]भौम्या देवाश्च यक्षाश्च राक्षसाश्च कामावचराश्च [p]रूपावचराश्च देवाः ततो [q]विशिष्टतरं च [r]विपुलतरं च [s]स्फुटतरं च सम्यक्संबुद्धानां [t]दिव्यचक्षुः। तत्प्रवृत्तं मनोमयेषु [u][v]रूपेषु।

[w]येनेह प्रज्ञाचक्षुषा [x]समन्वागता [y]चक्षुत्वपरीक्षया [z]अष्टमकादि[a]का पुद्गला [b]यावदर्हत्पुद्गला इति [c]अतो [d]परिव्यक्ततरं सम्यक्संबुद्धानां [e]प्रज्ञाचक्षुः। तत्र [f]कतमं सम्यक्संबुद्धानां [g]धर्मचक्षुः। [h]स दशानां [i]बलानां मनोविभुता। तत्र कतमानि दशबलानि।

तद्यथा---

स्थानास्थानं[a] वेत्ति प्रथमं बलं अप्रमेयबु[b]द्धीनां[c] ।
सर्वत्रगामिनीं[d] च प्रतिपदं[e] वेत्ति[f] बलं द्वितीयं ॥९०॥
नानाधातुकं[g] लोकं[h] विदन्ति ख्यातं[i] बलं तृतीयं ।
अधिमुक्तिनानात्वं वेत्ति[j] चतुर्थं बलं भवति[k] ॥९१॥
परपुरुषचरितकुशलानि वेत्ति[l] तत्पंचमं बलं च ।
Sen. 160 कर्मबलं[m] प्रतिजानन्ति शुभाशुभं[n] तद्बलं षष्ठं ॥९२॥
क्लेशव्यवदानं[o] वेत्ति[p] सप्तमं बलं ध्यान[q]समापत्तिं[r] वेत्ति ।
अष्टमं[s] बलं[t] पूर्वनिवासं[u] वेत्ति बहुप्रकारं[w] ॥९३॥
बलं[x] नवमं भवति[y] परिशुद्धदिव्यनयना[z] भवन्ति[a] ।
सर्वक्ले[b]शविनाशं[c] प्राप्नोन्ति[d] दशमं बलं भवति[e] ॥९४॥

एतानि[f] मनोविभुबलानि यैः सर्वदर्शी दिवि भुवि च जातकीर्तिः[g] दशबल[h] इत्येव[i]-माख्यातो[j] । यं एतेषु[k] दशबलेषु[l] मनोविभुज्ञानं[m] इदमुच्यते[n] धर्मचक्षुरिति[o] । तत्र कतमं बुद्धचक्षुः । अष्टादशावेणिका[p] बुद्धधर्माः । तद्यथा अतीते अंशे तथागतस्य अप्रतिहतं[q] ज्ञानदर्शनं । अनागते अंशे अप्रतिहतं ज्ञानदर्शनं । प्रत्युत्पन्ने[r] अंशे अप्रतिहतं[s] ज्ञानदर्शनं[t] । सर्वं[u] कायकर्म ज्ञानपूर्वंगमं[v] ज्ञानानुपरिवर्ति[w] । सर्वं वाचाकर्म[x] ज्ञानपूर्वंगमं[y] ज्ञानानुपरिवर्ति[z] । सर्वं मनोकर्म ज्ञान[a]पूर्वंगमं[b] ज्ञानानुपरिवर्ति[c] । नास्ति छन्दस्य हानिः । नास्ति वीर्यस्य[d] हानिः । नास्ति स्मृतिये[e] हानिः । नास्ति समाधीये[f] हानिः[g] । नास्ति प्रज्ञाये हानिः[h] । नास्ति विमुक्तिये हानिः[i] । नास्ति खलितं[j] । नास्ति रवितं । नास्ति मुषित[k]स्मृतिता[l] । नास्ति असमाहितं[m] चित्तं । नास्ति अप्रति[n]संख्याय[o] उपेक्षा । नास्ति[p] नानात्वसंज्ञा । यं[q] इमेषु[r] अष्टादश-स्वावेणिकेषु बुद्धधर्मेषु ज्ञान[s]मिद[t]मुच्यते[u] बुद्धचक्षुरिति ।

[a]एवमुक्ते आयुष्मान्महाकाश्यप आयुष्मन्तं महाकात्यायनमुवाच। किं पुनर्भो Sen. 161 जिनपुत्र भगवतो एतदधिवचनं यादशानां भूमीनां व्याकरणं [b]उताहो सम्यक्संबुद्धानामे[c]तदिति। [d]एवमुक्ते आयुष्मान्महाकात्यायन आयुष्मन्तं महाकाश्यपमुवाच। [e]एकस्मि [f]समये भो धुतधर्मंधर [g]भगवां वाराणस्यां [h]विजहार [i]ऋषिवदने मृगदावे अष्टाविंशतीनां [j]वशीभूतशतानां [k]पुरस्कृतः। [l]तत्र भगवता अष्टादश बुद्धधर्मा [m]विभक्ताः [n]अतीते [o]अंशे अप्रतिहतं ज्ञानदर्शनं[p]मेव सम्यक्संबुद्धानां भवतीति दश भूमयो [q]समुत्कीर्तये। शाक्यमुनिं [r]सम्यक्संबुद्धं आदौ कृत्वा दश भूमयो [s][t]देशिता। तत्रेदमुच्यते।

[u]प्रियाणि [v]वस्तूनि ददाति चक्षुमां
[w]चिरं [x]प्रसन्नेन मनेन [y]संसरन्।
ततो प्रियं बुध्यति ज्ञानमु[z]त्तमं
स्वयं [a]मही[b]मण्डगतो तथागतो ॥९५॥
विचित्र वस्त्राभरणैरलंकृताः
स्त्रियो ददाति परितुष्टमानसो।
विचित्रमस्य [c]प्रतिज्ञानमद्भुतं
[d]उदीर्यते तस्य फलेन कर्म[e]णः ॥९६॥
न शक्तिनाराच [f]न [g]प्रासतोमरा।
[h]प्रासेसि सत्वेषु [i]भवेषु संसरन्।
[j]तथास्य मार्गोऽतृणखण्ड[k]कण्टको
[l]अघाति ग्रामां [m]नगरां च [n]संसरन् ॥९७॥ Sen. 162
स्वकस्य दासस्य पि [o]धर्मवादिनः
शृणोति सत्कृत्य [p][q]कथां न च्छिन्दति।
ततो स्य [r]धर्मं ब्रुवतो महाजने

न [a]कश्चि नो रम्यति नो च तुष्यति ॥९८॥
[b]प्रणीतदा[c]नानि ददाति··············
विनेति [d]कांक्षाञ्च तथैव संशयं ।
ततो स्य [e]कायात् ज्वलना[f]र्चिसन्निभा
प्रभा समु[g]त्तिष्ठति [h]शी[i]त[j]लप्रभा ॥९९॥
न कस्यचिद्याचनकस्य याचना
भव[k]न्ति बन्ध्या नरदे[l]ववेशिता ।
ततो अबन्ध्या भवि तस्य देशना
तदद्भुतं [m]मारबलप्रमर्दने ॥१००॥
मनो[n]रमां काञ्च[o]नतालपर्णियो
जिने[p]षु देन्ति परितु[q]ष्टमानसाः ।
[r]ततो अनालोकिया लोकबान्धवा
सदा च लोकेषु··· ···एतद[s]द्भुतं ॥१०१॥
उपानहा र[t]त्नमया च पादुका
ददाति नित्यं प[u]रितुष्टमान[v]सः ।
Sen; 163 [w]ततः सदा चंक्रमते नरोत्तमः
अ[x]संस्पृशन्तो चतु[y]रंगुलं [z]महीं ॥१०२॥
परेहि उक्तो [a]परुषं '[b]पुनः पुनः
प्रभुः समानो [c]क्षमते न [d]ऊहते ।
[e]ततो प्रियं चंक्रमतो',स[f]पर्वता
समु[g]न्नतान्तोनमति वसु[h]न्धरा ॥१०३॥
करो[i]ति ? दीनान नयेन संग्रहं

[a]पतन्तमभ्युद्धरते महाजनं ।
ततो [b]स्य [c]रत्नामयरत्नसंचया
[d]समोनता [e]उन्नमते [f]वसुंधरा ॥१०४॥

[g]स्वगुणपरि[h]कीतनेन [i]च सम्यक्संबुद्धेन [j]बुद्धानुस्मृतिर्नाम [k]धर्मपर्यायो [l]भाषितः । तस्य [m]पर्यवसाने [n]आयुष्मता [o]वागीसेन [p]सम्यक्संबुद्धो [q]संमुखमभिस्तुतो ।

[r]नमो,स्तु ते बुद्ध अनन्तदर्शन
समन्तचक्षुः शतपुण्यलक्षण ।
[s]हितानुकम्पी परमार्थको[t]विद
नमामि त्वां वल्गु[u]गिराहि गौतम ॥१०५॥
तारेसि [v]तीर्णो जनतां महामुने
[w]न भायसि [x]क्षेमकराग्रपुद्गल ।
[y]यथातथं [z]स्थानमभिप्रकाशयं Sen: 164
[a]विनेसि सत्ये [b]अमृते बहुं जनं ॥१०६॥
शीलं महर्षिस्य [c][d]अनन्तदर्शिनः
गम्भीर[e]मार्यं [f]विपुलं सुभाषितं ।
शीले [g]विशिष्टो त्वमरिप्रमर्द[h]नः
इमस्मि लोके परत[i]श्च सुव्रतः ॥१०७॥
अखण्डमच्छिद्रमकाच[j][k]मव्रणं
अनाश्रवन्ते चरणं महामुने ।
[l]शुचि विशुद्धि परमां [m]गतो सदा
विरोचसे नगशिखरे [n]यथा[o]नलो ॥१०८॥
चित्तस्थि[p]तित्वे असि [q]पारमिंगतो

[a]वशी समाधिस्मि [b]तथापि पुद्गल ।
[c]चित्ते वशी त्वं वशिनां परां गतः
[d]वंकावकाशा वि[e]गतो विरोचसे ॥१०९॥
[f]यथेच्छ[g]कं अरणसमाधि [h]शान्तर
..............[i]देवनरेषु [j]अर्चित ।
नि[k]वेशसन् [l]काञ्चनदामप्रभः
[m]नमो स्तु ते गौतम सत्यवि[n]क्रम ॥११०॥
[o]वि[p]रोचनो नभसि यथा [q]महाप्रभो
[r]शुद्धे नभे पंचदशीय [s]चन्द्रमा ।
Sen. 165 [t]तथा समा[u]धिस्मि स्थितो विरो[v][w]चसे
सुव[x]र्णमुत्तप्तमिवात्र पुद्गला ॥१११॥
आकांक्ष[y]माणा विगता विप[z]ण्डिता
सत्वा न जानन्ति [a]समन्त[b]उद्यमां ।
सुखं समाधिं अरणानि [c]सेवतो
[d]नमो स्तु ते देवमनु[e]ष्यपूजित ॥११२॥
[f]यदा च आलोकसि [g]नागगामि
[h]यदा च आगत [i]मरणाय पारं ।
[j]मती[k]स्मृतीमां [l]विमलेन [m]चेतसा
तदा अयं भूतधरा प्रकम्पते ॥११३॥
[n]सत्या [o]अभिसमेतिय [p]दर्शनं तथा
[q]स्वयं [r]अभिज्ञाये अनुश्रुतं [s]पुरा ।

[a]इमां गिरां [b]व्याहर [c]अग्रपुद्गल
सहस्रनेत्रो [d]मघवां व [e]शोभसे ॥११४॥
इदं समाप्तं व्यसनं [f]महद्भयं
[g]इतो न भोति [h]अग्रे अस्य संभवो ।
[i]तस्यावरोधानमधो [j]प्रवर्तते
निर्[k]वाति वा[l]तान स्वरो व पाकः ॥११५॥
विमुक्तिचित्तस्य विमुक्ति[m]दर्शना
[n]अचिन्तिया तर्कपथेन निश्रिता ।
[o]असंकिया वीरगिरा विरोचते Sen. 166
या सा सुवेला मृदु सत्यसंभवा ॥११६॥
[p]अनुद्धतां तां च गिरां प्रकाशय
[q]त्वं............हि जनस्य सन्निधौ ।
[r]ते तुह्य श्रुत्वा मधुरां [s]सुभाषितां
पिबन्ति [t] [u]तृष्णार्त इवाम्भसार्णवे ॥११७॥
[v]हतेषु त्वं प्राणिषु मैत्रं [w]चिन्तय
ऐश्वर्यऋद्धि प्रति[x]भानमुत्तमं ।
[y]श्रेष्ठेषु धर्मेषु हि पार[z]मीगतो
[a]यथा न कोची इह [b]लोकधातुये ॥११८॥
[c]प्रज्ञा च ते अस्ति अनुत्तरा मुने
सर्वस्मि लोकेऽप्रतिमा अनोपमी ।
[d]त्वमेव [e]श्रेष्ठो सकलस्य प्राणिनो
[f]शिलोच्चयानां यथ [g]मेरुपर्वतः ॥११९॥

न ते स्ति तुल्यो सदृशो समानो
[a]कुतोत्तरो गुणेषु [b]गुणंधरस्य ।
[c]त्वमेव [d]श्रेष्ठो परमा[e]र्थ[f]पुद्गलो
[g]धर्माणि [h]निर्वाणमिवाचलं सुखं ।।१२०।।
[i]रागं च मोहं च प्रहाय दोषं
मानं च म्रक्षं तर्सिणां च जालिनां ।
Sen. 167 विराजसे दोषविमुक्त[k]मानसो
यथा [l]शशी [m]पूर्ण इव [n]नभे शुभे ।।१२१।।
[o]यदत्र [p]सत्यं तुवं [q]मार्गसे ऋजुः
सेतुर्महा स[r]त्पु[s]रुषेण[t] से[u]वितः ।
इमां [v]गिरं व्याहर [w]अग्रपुद्गल
सहस्रनेत्रो [x]मघवां व [y]शोभसे ।।१२२।।
क्लेशैर्विमुक्त[z]ं विमलं सुशा[a]न्तं
निषेव [b]स[c]त्वशरणं [d]समाधिं ।
हिताय [e]भूतानभि[f]र्भुविराजसे
रवी यथा देवमनुष्य[g]पूजितः ।।१२३।।
[h]अनिश्रितः त्वं इह च [i]परत्र च
ध्यायन्तो ध्याने [j]रमसे प्रतिष्ठितः ।
[k]वन्दन्ति देवा बहवो [l]समा[m]गता
[n]नमस्कृतं [o]प्रांजलियो महामुनिं ।।१२४।।
बहुधा [p]बहुप्रकारं चक्षुं भवते विशुद्ध[q]चक्षूणां ।
[r]जरामरण[s]मर्दनान [t]बुद्धान अदान्तदमकानां ।।१२५।।

[a]लोकोत्तरा भग[b]वता च[c]र्या लोकोत्तरं [d]कु[e]शलमूलं ।
[f]गमनं स्थितं निषण्णं शयितं लोकोत्तरं मुनिनो ॥१२६॥
यत्तत्सुगतशरीरं [g]भवते भवस्य [h]बन्धनक्षयकरणं ।
लो[i]कोत्तरं [j]तदपि भो इत्यत्र न संशयः [k]कार्यो ॥१२७॥ Sen. 168
चीवरधरणं [l]मुनिनो लोकोत्तरं अत्र संशयो नास्ति ।
आ[m]हाराहरणमथो लोकोत्तरमेव सुगतस्य ॥१२८॥
[n]देशना नरनागानां सर्वलोकोत्तरा [o]मता ।
[p]यथातथं [q]प्रवक्ष्यामि [r]माहात्म्यं वरबुद्धिनां ॥१२९॥
देश[s]कालवशं प्राप्य परिपाकं च [t]कर्मणः ।
[u]सत्यं [v]वा अभिनि[w]र्वृ[x]तं ध[y]र्मं देशेन्ति ना[z]यकाः ॥१३०॥
[a]लोकानु[b]वर्तनां बुद्धा अनुवर्तन्ति लौकिकीं ।
प्रज्ञप्तिमनुवर्तन्ति यथा लोकोत्तरामपि ॥१३१॥
[c]ई[d]र्यापथां दर्शयन्ति [e]च[f]त्वारः पुरुषोत्तमाः ।
[g]नो च परि[h]श्रमस्तेषां [i]जायते शुभकर्मिणां ॥१३२॥
पादां च ना[j]म [k]धोवन्ति न चैषां सज्जते रजः ।
[l]पादाः कमल[m]पत्राभा [n]एषा लोका[o]नुवतना ॥१३३॥
[p]स्नायन्ति नाम [q]संबुद्धा न चैषां विद्यते मलो ।
बिम्बे कन[r]कबिम्बाभे [s]एषा लोकानुव[t]र्तना ॥१३४॥
[u]दन्तधोवञ्च सेवन्ति [v]मुखं [w]चोत्पलगन्धिकं ।
नि[x]वसनं निवासेन्ति प्रावारं च त्रिची[y]वरं ॥१३५॥
चैलं वातानि वायित्वा विकोपेन्ति न देहकं ।
वस्त्रं पुरुषसिंहानां [z]एषा लोका[a]नुवतना ॥१३६॥ Sen: 169

छायायां च निषीदन्ति[a] आतपश्च न बाधति ।
बुद्धानां शुभनिष्यन्दानां[b] एषा लोकानुवर्तना ॥१३७॥
औषधं प्रतिसेवन्ति व्याधि[c] चैषां न विद्यते ।
नायकानां फलं[d] महन्तं एषा[e] लोकानुवर्तना ॥१३८॥
प्रभूश्च[f] कर्म[g] वारयितुं कर्मं दर्शयन्ति च जिना ।
ऐश्वर्यं विनिगूहन्ति[h] एषा लोकानुवर्तना ॥१३९॥
करोन्ति नाम आहारं न चैषां बाधते क्षुधा[i] ।
जनताया[j] उपदार्थं एषा लोकानुवर्तना ॥१४०॥
पिबन्ति नाम पानीयं पिपासा च न बाधते ।
तदद्भुतं[k] महर्षिणां[l][m] एषा लोकानुवर्तना ॥१४१॥
चीवराणि[n] निवासेन्ति सदा च प्रावृतो जिनः ।
यथारूपो[o] भवे देवो[p] एषा[q] लोकानुवर्तना ॥१४२॥
केशां[r] च ओरूपयन्ति न चैषां छिन्दते क्षुरः ।
केशां[s] नीलाञ्जननिभां[t] एषा लोकानुवर्तना ॥१४३॥
जरां[u] च उपदेशेन्ति न चैषां विद्यते जरा[v] ।
जिना[w] जिनगुणोपेता एषा[x] लोकानुवर्तना ॥१४४॥
कल्पकोटीमसंख्येयां[y][z] पुण्येषु पारमिंगता[a] ।
आरब्धमुपदेशेन्ति[b] एषा[c] लोकानुवर्तना ॥१४५॥
Sen. 170 न[d] च मैथुनसम्भूतं सुगतस्य समुच्छ्रितं[e] ।
मातापितृश्च देशेन्ति एषा[f] लोकानुवर्तना ॥१४६॥
दीपंकरमुपादाय वीतरागस्तथागतः ।
राहुलं पुत्रं[g] दर्शेति[h] एषा लोकानुवर्तना[i] ॥१४७॥

[a]कल्पकोटी[b]मसंख्येयां [c]प्रज्ञापारमितां गता ।
बालभावं च [d]दर्शन्ति एषा लोकानुवर्तना ॥१४८॥
[e]असन्मन्त्रा [f]विभाषित्वा अस्मि लोके सदेवके ।
पुनः [g]पर्येषन्ति तीर्थे [h]एषा लोकानुवर्तना ॥१४९॥
[i]बोध्यित्वामतुलां [j]बोधिं सर्वसत्वान कारणा ।
[k]अल्पोत्सुकत्वं प्रदेशेन्ति [l]एषा लोकानुवर्तना ॥१५०॥

[m]परमगुण[n]संपन्ना वचन[o]संपन्ना[p]श्च सर्वे [q]सम्यक्संबुद्धा । [r]षष्टिभिः [s]गुणैः सम्यक्संबुद्धानां [t]वाचा समन्वागता [u]भवति । कतमेहि [v]षष्टिभिः ।

[w]गीतरव[x]मधुर[y]वादी नर[z]वरवचना विनिश्चरति [a]वाचा ।
वीणारववेणुरवा हंसरवरुता सुगत[b]वाचा ॥१५१॥
[c]जी[d]मूतरसितमधुरा पर[e]भृतरथनेमितुल्यनिर्घोषा ।
[f]सागरनर्दित[g]सारसप्रभावा वरबु[h]द्धिनो वाचा ॥१५२॥
किन्नर[i]कल[j]विंकरुता मेघवरस्वररवा वरगजरुता ।
[k]ऋषभमृगराजरसिता वाचा वरलक्षण[l]धराणां ॥१५३॥ Sen. 171
दुन्दुभिरव[m]गम्भीरा वनदेव[n]अनिलवि[o]धूतस्वरप्रपाता ।
[p]भूमीविक्षोभनरवा [q]गिरा [r]नरमरु[s]प्रधानानां ॥१५४॥
[t]पंचांगिकतुल्य[u]रवा प्रलुलितकल[v]हंस[w]बर्हि[x]णनिवाता ।
[y]बिम्बोष्ठसुतनु[z]जिह्वा जिनवदना नि[a]श्चरति वाचा ॥१५५॥
गन्धर्वगीतमधुरा [b]जलधाराणां निपात[c]तुल्यरवा ।
[d]अवि[e]स्तरपिण्डितरवा गिरा गुणवर[f]प्राधानानां ॥१५६॥
[g]वरकिंकणीकसलील[h]सुसंचिता हेमजालतुल्यरवा ।
आभरण[i]घट्टितरवा [j]भुवि दिवि च गिरा [k]प्रधानानां ॥१५७॥

नातिद्रुता[a] अनमन्ती अनुपच्छिन्ना विवर्तते[b] मधुरा[c] ।
गलितपदसंचयवती[d] वाचा वरलक्षणधराणां[e][f] ।।१५८।।
सर्वामेवानुचरति[g][h] परिषां यदि लोकधातुनयुतानि[i][j][k] ।
विज्ञापयते[l] सर्वां[m] परिषां सुमधुरा वाचा दशबलानां ।।१५९।।
शकयावनचीणरमठपह्लवदरदेषु[n][o][p] दस्युपरिषायां[q] ।
एकविधमुच्यमाना सर्वविषयचारिणी भवति[r] ।।१६०।।
परिषां[s] नातिक्रमते निश्चरमाणा[t] गिरा नरवराणां[u] ।
Sen. 172 न वर्धते न च हायति[v] गिरा स्थितलया दशबलानां[w][x] ।।१६१।।
न[y] च भिद्यते[z] न नुद्यति न च उपतप्यते[a]...... ।
न च[b] विखलखलखलायति[c] अभिस्वररुता[d] सुगतवाचा ।।१६२।।
न च सा अपशब्दवती[e] शब्दभ्रष्टा अशेषं[f] अनुयुक्तशब्दा[g] ।
शब्देषु कुशलाकुशलां[h] सर्वां[i] जनतां[j] प्रहर्षयति ।।१६३।।
वदना सुविमलदशना[k] निश्चरति गिरा[l] यदा गुणधराणां[m] ।
माद्यन्ति[n] शकुनसंघा[o] गगनतलगता वनगताश्च ।।१६४।।
यो यस्य स्वर[p] अभिमतः[q] सा तं पूरयति तस्य संकल्पं ।
सुगतवचनप्रभूता[r] वाचा परिषदि विचरमाणा[s] ।।१६५।।
वरवासनसहितघोषा[t][u] गिरिनदिनिर्घोषसन्निभा शुद्धा[v] ।
उत्क्रोशकुररुतनया[w][x] प्रभवति वाचा वररुतानां ।।१६६।।
शकुन्तजीवंजीवक[y] जिनवाचा[z] कनकतालपत्ररवा[a] ।
पटुपटहप्रवदमृदंगचाटुस्वरतुल्यनिर्घोषा[b][c][d] ।।१६७।।
आज्ञेया[e] विज्ञेया[f] गम्भीरभीष्मरूपा कर्णसुखा ।
हृदयंगमा[g] च नित्यं वाचा वरपारमिगतानां ।।१६८।।

[a]वल्लकी श्रवणी[b]या च प्रे[c]मणिया च गिरा गुणधारीणां ।
[d]विपुलशुभसंचयानां स[e]र्वेषां अनन्त[f]यशसानामिति ॥१६९॥

य[g]थाभूतं [h]देशिता [i]वाचा । सम्यक्संबुद्धा एवं [j]धर्मं [k]देशयन्ति । नाहं भिक्षवो Sen. 173 ये धर्मा [l]अनित्यास्ते नित्यतो देशयामि । नापि ये धर्मा नित्या ते अनि[m]त्यतो देशयामि । नापि ये [n]धर्माः दुःखास्ते [o]सुखातो देशयामि । [p]नापि ये धर्मा [q]सुखा ते दुःखातो देशयामि । [r]नापि ये [s]धर्मा अनात्मीया ते [t]आत्मतो देशयामि । नापि ये [u][v]धर्मा आत्मीयास्ते[w] अनात्मतो देश[x]यामि । नापि ये धर्मा अशुभास्ते [y]शुभतो देशयामि । नापि ये [z]धर्माः [a]शुभास्ते अशुभातो देशयामि । नापि ये धर्मा रूपिणस्ते अरूपिणो देशयामि । नापि ये धर्माः [b]अरूपिणस्ते रूपिणो देशयामि । नापि ये [c]धर्माः कु[d]शलास्ते अकु[e]शलातो देशयामि । नापि [f]ये धर्माः अकुशलास्ते कुशलातो [g]देशयामि । नापि ये धर्मा अना[h]श्रवाः ते साश्रवा ति देशयामि । नापि ये धर्माः सा[i]श्रवास्ते अनास्रवा ति [j]देशयामि । नापि ये [k]धर्माः व्याकृतास्ते अव्याकृता इति देशयामि । [l]नापि ये धर्मा॰ अव्याकृतास्ते व्याकृता इति देश[m]यामि । नापि ये धर्मा हीनास्ते[n] प्रणीता इति देशयामि । [o]नापि ये धर्मा[p] प्रणीतास्ते हीना इति देशयामि । नापि ये [q]धर्माः गृहाश्रितास्ते [r]नैष्क्रम्याश्रिता इति देशयामि । नापि ये धर्मा नै[s]ष्क्रम्याश्रितास्ते गृहाश्रिता इति देशयामि ।

अथ खलु भो धुतधमधर[t] सम्यक्संबुद्धाः [u]सत्यवादि कालवादि [v]भूतवादि अथवादि तथावादि [w]अनन्यथावादि अवितथवादि धर्मंवादि विनयवादि इति ।

भूतपूर्वं भो धुतधर्मंधर तु[x]षितभवनका[y]यिको दे[z]वपुत्रो शिखरधरो नाम बोधिस[a]त्वः Sen. 174 [b]सम्यक्संबुद्धं [c]ऋषिवदनगतं [d]वाराणस्यां [e]वनवरे वरचक्रप्रव[f][g]र्तनदिवसे भगवन्तं संमुखा[h]भिरध्यभाषे स[i]गौरवः सप्रतीसः [j]प्रह्वः [k]कृतांजलिपुटः ।

[l]साधु [m]ते साधुरू[n]पस्य [o]वाचा न [p]प्रतिहन्यते ।
साधु अर्थान्विता साध्या वाचा तव मनो[q]रमा ॥१७०॥

[a]साधु [b]सुखरसंयोगा [c]वर्णसन्धिगुणान्विता ।
[d]साधु सत्यानि [e]चत्वारि [f]प्रवदसे [g]महामुने ॥१७१॥
[h]साधु ते देवगन्धर्वा पिबन्ति मधुरां गिरां ।
[i][j]साध्विहाप्रतिमं [k]चक्रं [l]प्रवर्तेसि [m]अनिर्वर्तिकं ॥१७२॥
[n]तुभ्यं [o]लोके [p]समो नास्ति [q]रूपे [r]वर्णे [s]कुले बले ।
[t]ईर्यापथे च वीर्ये च [u]ध्याने [v]ज्ञाने शमे दमे ॥१७३॥
[w]अद्य [x]हृष्टा दश [y]वीर [z]कोट्यो ते प्रथमे फले ।
विनीता देवपुत्राणां शासने प्रथमे मुने ॥१७४॥
[a]त्रिंश कोट्यो [b]प्रभो वीर विनेसि प्रथमे [c]फले ।
[d]द्वितीये शासने नर देवपुत्राण एव च ॥१७५॥
[e]पञ्चाश कोटीयो [f]भूयो शासने तृतीये मुने ।
[g]विनीता देवपुत्राणां [h]अपायेहि [i]विमो[j]चिता ॥१७६॥
Sen. 175 अशीति [k]कोटीयो [l][m]भूयो श्रोतापत्तिफले [n]विभू ।
[o]चतुर्थे [p]शासने दमेत्वा दुर्गतीहि [q]विमोक्षिता: ॥१७७॥
[r]तस्मात्ते सदृशो नास्ति मैत्राय [s]पुरुषोत्तम ।
[t]करुणाये [u]कारुणिको [v]भूतो भूयो [w]नरर्षभ ॥१७८॥
[x]हृष्टा पुरुषशार्दूला उत्पन्ना लोकसुन्दरा ।
हिताय [y]सर्वसत्वानां विचरन्ति महामुने ॥१७९॥
अतिचिरस्य राजसुत उत्पन्नो सि नरर्षभ ।
प्रणेता [z]विप्रनष्टानां आर्त्तानां नयनन्दनं ॥१८०॥
मा च [a]कदाचिद्भूतगुरु नाथो [b]अन्तरहायतु ।
अपर्यन्तं तव स्थानं [c]भवति [d]लोकबान्धव ॥१८१॥

अपाया [a]तनुकीभूता [b]स्वयम्भू तव तेजसा ।
[c]अनोकाशा कृता स्वर्गा त्वां प्राप्य [d]पुरुषोत्तम ॥१८२॥
[e]यस्य मिथ्यात्वनियतो राशिः [f]पुरुषपुद्गल ।
[g]एष वानियतं राशिं त्वां प्राप्य पूरयिष्यते ॥१८३॥
यस्याप्य[h]नियतो [i]राशिः त्वां [j]प्राप्य सुरवन्दित ।
[k]पूरयिष्यति सो राशि [l]सम्यक्तेजकुलोदित ॥१८४॥
[m]अद्भुतानां च धर्माणां [n]विशुद्धिरुपलभ्यते ।
[o]त्वां प्राप्य पुरुषादित्य [p]तमोन्तकरमच्युतं ॥१८५॥
तस्य ते [q]भाषमाणस्य भूतां [r]धर्मां [s]जिनर्षभ । Sen. 176
[t]अभिनन्दन्ति वाक्यन्ते सेन्द्रा लोका महामुने ॥१८६॥
[u]इति स्तुवन्दि देवगणा वरदं [v]प्रीतिमानसा ।
अनन्त[w][x]गुणसंपन्नं [y]संस्तवार्हं [z]नरोत्तममिति ॥१८७॥

[a]उपचारविधिसंपन्ना [b]भो धुतधमधरं [c]सम्यक्संबुद्धा कालज्ञानसमर्थका [d]विशुद्ध-[e]नेत्रा [f]अनुच्चावचदर्शना [g]पूर्वा[h]न्तनयसंपन्ना [i]उच्छ्रापित[j]धर्मध्वजा निष्प्रतिमान[k]ध्वजा [l][m]कलहरण[n]निशातका प्रवचनविदुषो [o]अनवसानज्ञानाः [p]समये च आवुसादयन्तो अनयनानां प्रवर्तकाः अपमार्गंककुत्सका इति । [q]तत्रेदमुच्यते ।

स[r]र्वाकारगुणोपेता सर्वे [s]सर्वार्थनिश्चिता ।
प्रनेतारो विनेतारो [t]बुद्धा [u]बुधजनार्चिताः ॥१८८॥
असंकीर्णेन ज्ञानेन [v]विशुद्धेन मनेन च ।
[w]त्रिषु लोकेषु भ्राजन्ते पूर्ण चन्द्र इव [x]नभे ॥१८९॥
चरणेन [y]मनोज्ञेन सतां कान्तेन [z]नायकाः ।
[a]नदन्ति च [b]महानादं सम्यक्कुशलसंभवाः ॥१९०॥

[a]शासन्ति जनतां [b]वीरा उपचारेषु नि[c]श्रिताः ।
[d]विवादं परसत्वानां [e]मथन्ति तत्वदर्शिनः ॥१६१॥
[f]लोके जाता नर[g]श्रेष्ठा [h]न च लोकेन [i]लिप्यथ ।
प्रज्ञप्तिसम[j]तिक्रान्ता गम्भीरवि[k]षया विभूः ॥१६२॥
Sen. 177 [l]गुरुं [m]धुरं [n]समारोप्य न विषीदन्ति प[o]ण्डिता ।
[p]यथावादी[q]तथाकारी [r]अनुपक्रु[s]ष्टचारणा ॥१६३॥
[t]दृष्टिविषं तं घोरं च दग्ध्वा ज्ञानाग्निना प्रभूः ।
[u]अनुत्रासि[v]तासन्त्र[w]स्ता पर[x]ं प्रदन्ति [y]प्राणिनां ॥१६४॥
कान्तारं समतिक्रम्य क्षेमं प्राप्यनर[z]र्षभाः ।
[a]आह्वायन्ति जनधीरा इहै[b]व निर्भयं इदं ॥१६५॥
जरामर[c]णरोगाणां उत्पत्ति नेह विद्यते ।
इह आयासशोकानां [d]प्रवृत्तिर्नोपलभ्यते ॥१६६॥
ते तस्य वचनं श्रुत्वा मधुरं देवमा[e]नुषा ।
[f]अनुशास्ति तथा कृत्वा प्रतिपद्यन्ति तत्सुखं ॥१६७॥
तेनास्ति कीर्तिविस्ती[g]र्णाः त्रिषु लोकेषु चो[h]त्तमाः ।
चरन्ति अ[i]र्चिता सद्भिः न [j]चैव [k]प्रशमन्ति ते इति ॥१६८॥

[l]परोपहारांश्च [m]भो धुतधर्मधर [n]उपहरन्ति सम्यक्संबुद्धाः सत्वानामनु[o]ग्रहार्थं । तद्यथा [p]कलिंगराज्ञः [q]कुसुमाये देव्या परोपहा[r]रं भगवां वृत्तवां ध्रु[s]वस्य श्रेष्ठिनो वचनोपहारं [t]भगवां [u]वृ[v]त्तवां ।

[w]तथैव च राज[x]गृ[y]हे पुरो[z]त्तमे
परोपहारं [a]भगवां प्रवृत्तवां ।

समुत्कर्षेसि[a] स्वविधानकोविदो[b] Sen. 178
उपालिनो[c] तं वचनोपहारं ॥१९९॥
तथापरं[d] मेरुतटे समागतां[e f]
स वादिसिंहो[g] वशिनां[h] वशी वशी ।
परोपहारं भगवां[i] स भिक्षु-
संघस्य[j] तं इदमवचा महामुनिरिति ॥२००॥
एतां सर्वां[k] प्रवक्ष्यामि[l] उपहारां[m] मनोरमां ।
तस्य सत्वप्रधानस्य श्रृणु[n] विक्रीडितं शुभं ॥२०१॥
उत्पन्ने पुरुषश्रेष्ठे[o] धर्मचक्रे[p] प्रवर्तिते[q] ।
कलिंगराजा कारयति[r] राज्यं स्फीतमकण्टकं[s t] ॥२०२॥
नामेन[u] अभयो नाम तस्येदं[v] दर्शनंअभूत्[w] ।
शुभाशुभानां[x y] कर्माणां[z] फलं नास्तीति[a] निश्चयः[b] ॥२०३॥
परलोको[c] तथा नास्ति दानफलं[d] क्वचिद्यत्र[e] ।
वीतरागो वीतदोषो वीतमोहो न विद्यते ॥२०४॥
सो[f] तं च दर्शनं[g] प्राप्य जनतां[h] सन्निपातयेत् ।
स्वकां[i] दृष्टिं[j] समाख्याति[k] पश्चाच्च[l] न निवर्तते ॥२०५॥
यदि[m] मह्यं[n] पिता ब्रूयात्प्रत्यक्षं मम अग्रतः ।
स्वयमुपगम्य[o] एवन्तच्छ्रद्दधे[p q] तदा तथा ॥२०६॥
सर्वदा[r] स तदा आसि[s] शीलवां मैत्रमानसो ।
यदि तस्य फलमस्ति[t] तस्य[u] देवपुरं गतिः[v] ॥२०७॥ Sen. 179
देवभूतो मम ज्ञात्वा इमां दृष्टिं[w] विमोचयेत् ।
इत्युक्त्वास्ति[x] परलोको[y z] दृष्टिं मुञ्चाहि[a] पापकां[b] ॥२०८॥

यस्य च परलोकस्य प्रवृत्तिर्नोपलभ्यते ।
[a]तस्मात्पिता [b]ममागत्वा [c]संप्रहर्षयतु [d]मानसं ॥२०९॥
ततो लोकानुकम्पार्थं [e]कारुणो महद्विशारदः ।
[f]कलिंगराजस्य रूपं [g]निर्मिणति स्वयं [h]मुनिः ॥२१०॥
[i]प्रासादवरमारुह्य [j]अन्तःपुरगतो तथा ।
अन्तःपुरस्य [k]दर्शेति यत्तं प्रकृतिदर्शनं ॥२११॥
[l]ततो स निर्मितो राजा [m]अन्तरीक्षगतस्थितः ।
[n]राजानमभयं धीरो उवाच पुरुषोत्तमः ॥२१२॥
परित्यज्य स्वकार्याणि परकार्येषु [o]व्यापृतः ।
[p]मिथ्यादर्शनसंयुक्त[q] अराज्यं [r]॰राज्यसंज्ञितं ॥२१३॥
[s]अद्य भवे गती तुभ्यं नरको दारुणो महत् ।
ये च ते [t]दर्शयिष्यन्ति तेषामपि च सा गति ॥२१४॥
[u]अन्यान् हि विहतो हन्ति नष्टो [v]नाशयते परां ।
[w]अन्धीकरोति [x]अन्यां पि स्वयमन्धव्य[y]पत्रपो ॥२१५॥
[z]सुमुष्टो मुषसे [a]अन्या मृतो च मारसे परां ।
[b]सुखि[c]तानपि सत्वा त्वं दुःखापयसि दुर्मते ॥२१६॥
निमग्नो [d]कामपंकस्मि [e]गृद्धु [f]कामेषु मूर्च्छितः ।
Sen. 180 [g]परलोकं द्रष्टुकामो धर्माणां [h]नयनं नृपः ॥२१७॥
[i]अस्था[j]नमेतं भूमिपति यस्त्वं [k]कामपरायणः ।
[l]असमर्थो तर्हि गन्तुं परलोकमिमं [m]प्रभो ॥२१८॥
[n]आस्वादं पि तु कामेषु [o]बुद्ध्वा दोषान्तथैव च ।
[p]कामे [q]निःसरणज्ञस्य [r]ते [s]वै [t]जाने परंपरां ॥२१९॥

एतच्छ्रुत्वा [a]नरश्रेष्ठो अभयो कम्पितो भयात् ।
प्रह्वो [b]इदमुवाच तं [c]अन्तरीक्षे सुदर्शनं ॥२२०॥
[d]श्रद्दधामि तं ते देव एवमेतं न अन्यथा ।
प्रसीद भव [e]मे नाथ अभयं परिमोचय ॥२२१॥
[f]तद्वशान्तः [g]पुरा[h]मात्यः शास्ता मे [i]अप्रति[j]पुद्गलः ।
[k]विनयवशी तवास्मि तथान्या [l]जनता बहु ॥२२२॥
परोपहार [m]इत्येषस्तेन [n]परमबुद्धिना ।
[o]वृत्तो अनुग्रहार्थाय सत्वानां [p]वरबुद्धिना ॥२२३॥
[q]देवी कुसुम्भराजस्य कुसुमा [r]इति [s]विश्रुता ।
[t]इष्टा कुसुम्भराजस्य [u]स्त्रीसहस्रा[v]णमुत्तमा ॥२२४॥
[w]तस्य माता पिता चैव [x]जीर्णा दण्डपरा[y]यणा ।
धीतरमेव[z]माहन्सु कुसुमे [a]पुत्रि हे शृणु ॥२२५॥
[b]वयं [c]जार्णा तुवं बाला [d]काम[e]प्रलुलिता असि ।
[f]इच्छेम प्रति[g]सृज्य[h]न्तौ इच्छेम मरणमात्मंनः ॥२२६॥ Sen. 181
एतच्च वचनं [i]श्रुत्वा कुसुमा लभते मतं ।
[j]अवर्णो यं मम अस्या [k]यद्यम्बातातो प्रघात्यते ॥२२७॥
[l]दास्यामि विषसंयुक्तं भक्तमेषां सुदारुणं ।
भुक्त्वा [m]येन उभावेतौ मरिष्यन्ति न संशयः ॥२२८॥
[n]यदास्या निश्चिता बुद्धि मातापितृषु [o]दारुणा ।
[p]ततो [q]उत्पादये शास्ता [r]कारुण्यं कुसुमां प्रति ॥२२९॥
ततः कुसुमाये शास्ता मातरं पितरं तथा ।
अपनामयति [s]संबुद्धो [t]अन्यौ [u]स्थापेति निर्मितौ ॥२३०॥

[a]कुसुमा [b]विषसंयुक्तं तं [c]भोजनमापद्यति ।
[d]निर्मितानाह भुंजन्तु अम्बा तातो च भोजनं ॥२३१॥
[e]अविकम्पमाना [f]भुंजन्ति भोजनं [g]जिननिर्मिताः ।
[h]न चैषां बाधते [i]किंचित्कायं [j]निर्मितका हि ते ॥२३२॥
द्वितीयं दिवसं [k]चैव [l]तृतीयं [m]चतुर्थं [n]पंचमं ।
[o]विषसंयुक्तं[p] [q]भुक्त्वान सुधां व यापेन्ति निर्मितौ ॥२३३॥
ततः [r]कृतांजली भूत्वा कुसुमा निर्मितां ब्रवीत् ।
आत्मानं मे निवेदयथ [s]अनुग्राह्या यदि अहं ॥२३४॥
तां याचमानां [t]प्राञ्जलिकां कुसुमां [u]निर्मिता ब्रवीत् ।
Sen. 182 [v]या तवापत्ति जानाथ [w]तथा च अनुतिष्ठथ ॥२३५॥
[x]बुद्धः [y]पुरुषशार्दूलः [z]द्वात्रिंशवरलक्षणः ।
उत्पन्नः [a]कुलसंपन्नः सर्वविद्यागुणान्वितः ॥२३६॥
तस्य [b]सर्वं [c]गुणाभूतं [d]अतीतानागतस्थितं ।
विदितं वादिसिंहस्य अत्र [e]विजह संशयं ॥२३७॥
प्रासादवरमारुह्य [f]सस्त्र्यागारो स पार्थिवः ।
[g][h][i]याचेद्दर्शनमिच्छाम [j]वयं सर्वार्थदर्शिनः ॥२३८॥
[k]तं सर्वगुणसंपन्नं वन्दित्वा शरणं [l]व्रजे ।
[m]ततो [n]अस्माकं यं [o]तत्रैव [p]पृच्छसि वक्ष्यते जिनो ॥२३९॥
साधूति [q]प्रतिश्रुत्वान निर्मितां [r]प्रति सो तदा ।
राजा [s]सान्तःपुरो शीघ्रं [t]प्रासादमभिरूढवां ॥२४०॥
[u]सत्वरं स [v]प्रह्वो राजा सस्त्र्यागारो [w]कृतांजलिः ।
इमां व्याहरते राजा वाचां कुसुमया [x]सह ॥२४१॥

ये सर्वगुणसम्[a]पन्ना लोकानामनुकम्पका ।
[b]गृहीता अत्यन्तं तेषां सा[c]ञ्जली सौमनस्यका ॥२४२॥
ततो [d]अमन्त्रये शास्ता श्रावकांछासने रतां ।
[e]चारुवर्णं सिंहहनुं दृढबाहुं अनिन्दितं ॥२४३॥
कीर्तिमन्तं [f]महानागं च चातुरन्तं महाबलं ।
नीलकेशं च बुद्धं च शान्तं शास्त्रविशारदं ॥२४४॥
तथा [g]शारसमतुल्यं गुप्तका[h]ममनिन्दितं ।
[i]सिंहनन्दि [j]विशालाक्षं लक्षणेयमनुत्तमं ॥२४५॥ Sen. 183
[k]एष [l]भिक्षवो गच्छामि शास्तारमनुब[m]न्धथ ।
कुसुमां प्रमुखां कृत्वा [n]विनेष्यामि ब[o]हुं जनं ॥२४६॥
साधूति ते प्रतिश्रुत्वा वशीभूता स्वयंभुवः ।
प[p]रिवारयित्वा संबुद्धं इदं वचनमाहु ते ॥२४७॥
अस्मा[q]कं पि पादो वीरा विहं[r]गमध्यमक्रमः ।
[s]अनुयास्यामः संबुद्धं यत्र गच्छति चक्षुमां ॥२४८॥
[t]निमेषान्तरेण संप्राप्तो भगवां शिष्यसंवृतः ।
[u]नगरं [v]कुसुमायास्तु अनुकम्पाय प्राणिनां ॥२४९॥
[w]आकारं [x]वज्रपाणिस्य ना[y]यको अभिनि[z]र्मिणे ।
देवसंघं च मनसा ध्याये ध्यानवि[a]शारदः ॥२५०॥
प्रभामण्डलमु[b]त्सृजे योजनानि चतु[c]र्दश ।
[d]देवता च अभिवादेन्ति[e] यात्रां परमबु[f]द्धिनः ॥२५१॥
ततो च कुसुमा दे[g]वी प्रह्वी सुगतमब्रवीत् ।
[h]एषा ते प्राञ्जली नाथ पादां इच्छामि व[i]न्दितं ॥२५२॥

ततः प्रतिष्ठितो शास्ता प्रासादवर[a]मूर्धनि ।
प्रभया च दिशा [b]सर्वा अभिभूय यशस्करः ॥२५३॥
ततो च कुसुमा [c]देवी सह राज्ञा जिन[d]क्रमां ।
वन्दते [e]परिवारो च [f][g]देविये [h]नरपुङ्गवं ॥२५४॥
[i]शरणं त्वां नरश्रेष्ठ गच्छाम सुरवन्दित ।
[j]मातरं पितरं हत्वा कीदृशं लभते फलं ॥२५५॥
Sen. 184 शृणोहि कुसुमे सत्यं मातापितृवधे फलं ।
[k]अनन्तरं महावीचिं [l]नरकं उपपद्यते ॥२५६॥
ततो बुद्धानुभावेन शास्ता वदर्थकोविदः ।
[m]कुसु[n]माया महावीचिं उपदर्शेति नायकः ॥२५७॥
[o]ततो च कुसुमा देवी [p]निरयं त्रस्य दारुणं ।
[q]अश्रु[r]वेगं प्रमु[s]ञ्चन्ती [t]इदं वचनमब्रवीत् ॥२५८॥
मातापितृभ्यां कारुणिका दुष्टचित्तस्य [u]कीदृशं ।
[v]परलोके फलं भवति यत्स[w]त्यं तदुदीरय ॥२५९॥
दुष्टचित्तस्य [x]कुसुमे तं [y]चित्तं स्यादमु[z]ञ्चियं ।
[a]तदेव परलोकस्मिं फलं सद्यं च [b]हिंसया ॥२६०॥
ततो [c]च [d]प्रतिनिःसृजति [e]कुसुमा दारुणं मनं ।
पुरतो धर्मराजस्य प्रीतिसुख[f]समर्पिता ॥२६१॥
ततो कामान आस्वादं भाषते सर्वकोविदः ।
[g]आदीनवं च [h]कामानां भाषते पुरुषोत्तमः ॥२६२॥
[i]ततो कामानां निःसरणं भाषते चिन्त्यविक्रमः ।
[j]गुणान्वदति निर्वाणे अद्भुतां भूत[k]दर्शिमान् ॥२६३॥

कुसुमां प्रमुखां कृत्वा कोटीयो द्वादश मुनिः ।
मानुषाणां विनयति उपहारो [a]अयं इति ।।२६४।।
ध्रुवो नाम अभूच्छ्[b]रेष्ठी नगरे [c]काशिवर्धने ।
[d]तस्येदं दर्शनं पापं मातापितृसमागमे ।।२६५।।
[e]यो मातरं च पितरं च [f]जीर्णकं [g]गतयौवनं ।
ज्ञातिपक्षं [h]समानेत्वा [i] [j]भक्ष्यभोज्येन तर्पयेत् ।।२६६।। Sen. 185
[k]अग्निस्कन्धे च ज्वलिते दाहयेय पितृनुभौ ।
उपहारो विघातव्यो तस्य [l]पुण्यमनन्तकं ।।२६७।।
राक्षसीनां सहस्राणि नायको [m]अभिनिर्मिमिणि ।
प्रासादवर[n]सुप्तस्य ध्रुवस्य पुरतः [o]स्थिता ।।२६८।।
[p]दण्डहस्ता [q]कशाहस्ता शक्तिहस्ता तथैव च ।
[r]कुठार[s]हस्ता [t]असि[u]हस्ता उल्काहस्ता तथैव च ।।२६९।।
अथ [v]तोमरहस्ता [w]च नाराचशत[x]पाणियो ।
[y]कुन्त[z]मुद्गर[a]हस्ताश्च [b]श्रेष्ठिस्य [c]पुरतः स्थिताः ।।२७०।।
धिक्कृतां धिक्कृतां [d]दृष्टि प्राप्तोऽसि पुरुषाधमा ।
[e]धिक्कृतं [f]मिथ्यात्वमासाद्य [g] न [h]श्रद्दधितुमर्हसि ।।२७१।।
[i]ये ते दुष्करकर्तारः ये ते [j]पूर्वोपकारिणः ।
[k]मैत्रचित्ता आपन्नेषु तेषु त्वं [l]वधमिच्छसि ।।२७२।।
येषां न शक्यं [m]प्रतिकर्तुं [n]अपत्येन [o]कथं [p]चन ।
सर्वरत्नं पि [q]ददता तेषां [r]त्वं वधमिच्छसि ।।२७३।।
[s]जीवितात्ते मृतं श्रेयो न च दर्शनमीदृशं ।
[t]यः त्वं सुपुरुषाचीर्णं दर्शनं प्रतिबाधसे ।।२७४।।

अद्य ते. जीवितं नास्ति सभार्यस्य सबन्धुनः ।
[a]सभृत्यस्य सपुत्रस्य[b] प्रेत्य च निरयं गतिः ।।२७५।।
इमंहि नाम एवं वा मारिष भद्रमस्तु[c] वः ।
मिथ्यादर्शनसम्पन्नं मूढापण्डितमानसं ।।२७६।।
Sen. 186 [d]परां [e]अन्यां पि जनतां ग्राहेन्तं पापदर्शनं ।
ध्रुवं [f]श्रेष्ठि [g]विनाशेम आर्यदर्शनकुत्सकं ।।२७७।।
एतन्तु वचनं श्रुत्वा ध्रुवो [h]उद्विग्नमानसः ।
[i]सस्विन्नगात्रो [j]प्रह्वश्च [k]बभूव त्रस्तमानसः ।।२७८।।
[l]भ्रान्तचित्तो दिशोवेक्षी त्रस्तो भवति मानसः ।
कृताञ्जलिपुटो भूत्वा[m] इदं वचनमब्रवीत् ।।२७९।।
रक्षोगणो [n]प्रसीदंतु परिवारस्य मह्य च ।
[o]युष्मे गतिश्च लेनश्च मम शरणमेव च ।।२८०।।
आज्ञापयथ किं कृत्वा [p]मह्याद्य अभयं [q]भवे ।
मम सबन्धुवर्गस्य [r]न चागच्छेय [s]दुर्गतिं ।।२८१।।
[t]ते च ब्रवीन्सु भूतगणा ध्रुवं [u]श्रेष्ठि नभे स्थिता ।
मा [v]अस्माकं शरणं गच्छ तमेव शरणं [w]व्रज ।।२८२।।
[x]हितैषिणं सर्वभूतानां बुद्धं [y]धुतजनार्चितं ।
सर्वलोको[z]त्तरं वादिं शाक्यसिंहं मनोरमं ।।२८३।।
[a]कहिन्नु सो······[b]भगवां [c]भूत[d]वन्दितो ।
[e]वयं पि तं [f]नरश्रेष्ठं [g]गच्छेम शरणं मुनिं ।।२८४।।
[h]एषो सर्वगुणोपेतः [i]पुरे [j]रतनखोलके ।
नाना [k]कुसुमसंछन्ने [l]उद्याने गन्धमादने ।।२८५।।

वशीभूतसहस्राणां नवतीहि पुरस्कृतो ।
विहार[a]कुशलो धीरो तत्र विहरते मुनिः[b] ॥२८६॥
तं त्वं शरणं[c] गच्छाहि[d] सर्वेहि ज्ञातिभिः सह[e] । Sen. 187
तं च पश्य[f] नरादित्यं[g] तां च दृष्टिं परित्यज ॥२८७॥
यं च सो देशते धर्मं[h] दृष्टान्त[i]विहितं[j] शुभं ।
तं च प्रज्ञाय[k] पश्याहि[l] एवन्ते जीवितं भवेत् ॥२८८॥
अगत्वा[m] च तुवं श्रेष्ठि[n] न ध्रुवं प्रतिपत्स्यसे[o] ।
इदन्ते मरणं सद्यं[p] तं श्रद्धानो समाचर[q] ॥२८९॥
ततः[r] श्रेष्ठि[s] सबन्धुजनो[t] भूत्वा सुदीनमानसो[u] ।
मूर्धिना[v] पतितो भूमौ यतो[w] सोपुरुषोत्तमः ॥२९०॥
सर्वाकारगुणोपेतो महाकारुणिको मुनि[x] ।
सबन्धुपक्षो[y] शरणं उपेमि[z] त्वा महायशा ॥२९१॥
भीतस्य भयान्तकर अभयं[a] दातुमर्हसि[b] ।
सपक्षो[c] भो महासत्व अहं[d] भयपरायणो[e] ॥२९२॥
इच्छामि[f] चरणं शास्तुः[g] वन्दितुं[h] वादिनां[i] वर ।
द्रष्टुमिच्छामि सत्पुरुषं[j] अनुग्राह्या यदि वयं ॥२९३॥
ततो[k] अभ्युद्गतो शास्ता वशीभूतपुरस्कृतः ।
निमेषान्तरेण[l] संप्राप्तो[m] सत्वानुकम्पाय नायकः ॥२९४॥
तं[n] दृष्ट्वा गगणे स्थितं[o] दान्तं क्षान्तं पुरस्कृतं ।
सौमनस्यं समुत्पन्नं श्रेष्ठिस्य[p][q] सह बन्धुभिः ॥२९५॥ Sen. 188
शरणं[r] वादिशार्दूलं[s] श्रेष्ठी[t] तत्र उपागतः[u] ।
सुजातदर्शनत्वं[v] च श्रेष्ठी[w] पर्यधिगच्छसि[x][y] ॥२९६॥

तस्यात्ययं[a] नरश्रेष्ठो[b] परिगृह्य तथागतो[c] ।
सत्यवादी[d] उदीरेति सत्यानि चतुरामुनिः[e] ॥२९७॥
शुभाशुभानां कर्माणां फलं विस्तरशो[f] विभुः ।
प्रकाशये[g] नरादित्यो[h][i] सिंहो वा[j] नदते वने ॥२९८॥
सिंहनादं[k] इमं श्रुत्वा श्रेष्ठि[l] परिजनैः[m] सह ।
प्राप्नोति मधुरं सत्यं फलं प्रथमके[n] क्षणे ॥२९९॥
यत्तस्य परिकर्म[o] तत्कृतं पन महर्षिणा ।
तमाहुरुपहारोति[p][q] सर्वधर्मविशारदाः ॥३००॥
तरुर्नाम[r] अभू[s] राजा द्वीपे[t] कस्मिं[u] चि सागरे ।
तस्य दर्शनमुत्पन्नं पापकं[v] बालिशप्रियं ॥३०१॥
यो[w] ब्राह्मणं[x] वा श्रमणं वा अन्यं[y] वापि वनीयकं ।
आमन्त्रेत्वा न भोजयते[z] तमाहुः[a] श्रष्ठलक्षणं[b] ॥३०२॥
महाजनं[c] निमन्त्रेत्वा बहुं च[d] शूद्रब्राह्मणां[e] ।
यो[f] बुभुक्षायमानेति[g] कृत्वा[h] कारानिबन्धनं ॥३०३॥
Sen. 189 उत्तरागमने[i] कुलवा महेशाख्यो[j] महायशाः ।
प्रभूतवस्त्राभरणो[k] तत्र[l] सो चोपपद्यते ॥३०४॥
ग्राहेति जनतां राजा[m] एवं पापेन[n] चेतसा ।
ते तस्य वचनं श्रुत्वा श्रद्दधाति[o] महाजनः ॥३०५॥
एतं दर्शनं[p] विज्ञाय देवगन्धर्ववन्दितः ।
पंच भिक्षुसहस्राणि[q] क्षणेन[r] निर्मिणे मुनिः ॥३०६॥
ते तं द्वीपमुपागम्य[s] तरुर्यत्र जनाधिपः[t] ।
राज्यं[u] पालयते तत्र चंक्रमिषु[v] वशीगणा[w] ॥३०७॥

ते तु नराधिपो[a] दृष्ट्वा[b] निर्मिता[c] भिक्षुवर्णिता[d] ।
वाहनतोतरित्वान[e][f] वन्दित्वा[g] पादमब्रवीत् ॥३०८॥
निमन्त्रयामि[h] ऋषयो प्रीतो भक्तेन तत्त्वतः[i] ।
अधिवासेन्तु[j][k] मे ऋषयो अनुग्राह्या यदि वयं ॥३०९॥
अधिवासितं[l] विदित्वा ततो निर्धावते[m] पुनः ।
पादां वन्दित्वा ऋषीणां[n] गतो[o] राजकुलं[p] स्वकं ॥३१०॥
रात्रिं प्रभातां विज्ञाय राजपुरुषमब्रवीत् ।
गच्छ[q] त्वं ऋषयोपगम्य[r] सिद्धेन त्वं निमन्त्रय[s] ॥३११॥
ते च प्रवेशिता[t] राज्ञा[u] ऋषि वेशमत्यद्भुतं[v] ।
शरण्यं[w][x] गुणसंपन्नं दृढार्गलसुयन्त्रितं[y][z] ॥३१२॥
सप्ताहे[a] समतिक्रान्ते[b] राजा[c] तां प्रत्यवेक्षते[d][e] ।
अदीनमुखवर्णाश्च[f][g] ध्यायन्ते[h] भिक्षुवर्णिता[i] ॥३१३॥ Sen. 190
सो भूयः परिवर्जेत्वा[j] निर्मिता मनुजाधिपः ।
द्वितीयं[k] समतिक्रम्य द्वितीये[l] प्रत्यवेक्षते ॥३१४॥
तृतीये[m] च चतुर्थे[n] च पंचमे षष्ठसप्तमे[o] ।
नवमे दशमे[p] सप्ताहे इदं वचनमब्रवीत् ॥३१५॥
देघा[q] च नागा गन्धर्वा यक्षा च गुह्यकासुरा ।
आगता[r] ऋषिरूपेण[s] मम संवेगकारणात् ॥३१६॥
निवेदयथ आत्मानमनुग्राह्या[t] यदि वयं ।
अथास्माकमनुग्राह्यो[u][v] आत्मानं[w] परिवेदये ॥३१७॥
अनुग्राह्योसि[x] भूमिपते इदं[y] वचनमुवाच[z][a] ते ।
यद्वयं वचनं[b][c] ब्रूम तथा[d] तमनुतिष्ठत[e] ॥३१८॥

[a]एषो काशीपुरे शास्ता वाराणस्यां [b]बने शुभे।
[c]पारगः सर्वधर्माणां [d]सर्वसंशयसूदनः ॥३१६॥
प्रासादवरमारु[e]ह्य याचे प्रह्वः सबान्धवः।
इच्छाम पुरु[f]षश्रेष्ठं [g]द्रष्टु[h]मप्रति[i]पुद्गलं ॥३२०॥
स एतद्वचनं श्रुत्वा [j]तथेति [k]उदपादयि।
अथ वैहायसं शास्ता तं द्वीपमु[l]पसं[m]क्रमीत् ॥३२१॥
वशीभूताश्च [n]चत्वारो कुंजरो करभोगजः।
Sen. 191 वारणो थ महा[o]ध्यायी [p]मनापो थ समा[q]गता ॥३२२॥
ते [r][s]पश्यितून संबुद्धं विरोचन्तं शशिप्रभं।
[t]तथा स्तुवन्ति प्रांजलियो भूतधर्मगु[u]रुं गुरु ॥३२३॥
प्रसन्नचित्ता सु[v]मना सर्वाकारगुणा[w]न्विता।
[x]नाथ मरुमनुष्याणां नमस्ते न[y]रलम्बक ॥३२४॥
को नाम त्वं महासत्व महातेजा महा[z]द्युते।
महाबुद्धि महा[a]बाहु [b]यथातथमुदीरय ॥३२५॥
रा[c]जवंशसमु[d]त्पन्नो धर्म[e]राज्य[f]प्रतिष्ठितः।
शरणं सर्वभू[g]तानां अहं [h]बुद्ध इति विदुः ॥३२६॥
अहं मरुमनुष्याणां [i]नाथो नेता चिकि[j]त्सकः।
अहं [k]संशयान्तकरः संबुद्धो देववन्दितः ॥३२७॥
एत[l]च्छ्रुत्वा तरु राजा संबुद्धमिदमब्रवीत्।
नमस्ते वा[m]दिशार्दूल सर्वसंशयसू[n]दन ॥३२८॥
प्रासादवर[o]मारुह्य सबन्धु[p]पक्षो [q]सज्जना।
[r]सराष्ट्रीं शरणं गच्छामि तस्य नो [s]शरणं भव ॥३२९॥

स्वकं च दर्शनं[a] राजा समाख्याति महर्षिणः ।
तच्छ्रुत्वा नरशार्दूलो[b,c] राजानमिदमब्रवीत् ।।३३०।।
न[d] ते लाभा[e] भूमिपते[f] यस्त्वं दुर्गतिगामिनं ।
पापं[g] श्रद्दधसे मार्गन्तां[h] दृष्टिं[i] प्रतिनिःसृज[j] ।।३३१।। Sen. 192
तां[k] दृष्टिं[l] प्रतिनिःसृज्य[m] राजा[n] वचनमब्रवीत् ।
धर्ममाख्याहि[o,p] मां धीर यत्र[q] दुःखं निरुध्यते ।।३३२।।
तस्य च धर्मसंयुक्तं भावये[r] पुरुषोत्तमः[s] ।
कुशलं सर्वसत्वानां बुद्धधर्मविशारदः ।।३३३।।
सो तं[t] धर्मं विजानित्वा[u] राजा परिजनैः[v] सह ।
त्रीणि संयोजनां[w] त्यक्त्वा[x] प्राप्तवां प्रथमं फलं[y] ।।३३४।।
असंख्येया च जनता प्राप्तवान्प्रथमं फलं ।
पश्य सत्पुरुषा राजं[z] मन्त्रिया[a] बलमुत्तमं[b] ।।३३५।।
ये[c] तत्र निर्मिता[d] भिक्षूः न चैते[e] भिक्षुणो[f] मता ।
उपहारं वदन्त्येतं[g,h] जिना शास्त्रविशारदाः[i,j] ।।३३६।।
अस्थानमेव[k,l] जिनपुत्र यदा[m] स्थूलाहि भूमिहि ।
तत्पुरे[n] अधिगच्छेयुः सवज्ञत्वं तथागताः[o] ।।३३७।।
कालं[p] व नातिनामेन्ति[q] परिपूर्णाहि भूमिहि ।
दर्शेन्सु[r] वादिशार्दूला[s] इत्येवं पुरुषोत्तमा[t] ।।३३८।।
वाराणसीं[u] वनं गत्वा बुद्धधर्मपुरस्कृतो ।
विस्तरेण[v] प्रकाशयति[w] नायको भूमयो[x] दश ।।३३९।।
नयानयज्ञाः[y] संबुद्धाः सर्वपरमतं विदुः ।
अध्याशयं परीक्षन्ति[z,a] जातका सर्वप्राणिनां ।।३४०।।

मधुरेण सुगीतेन नयेन[a] गुणदर्शिनः ।
Sen. 193 सुविनीता[b] बहु जनता[c] संबुद्धेन प्रजानता ॥३४१॥
न[d] जायन्ति न[e] जीर्यन्ति न म्रियन्ति[f] कथं चन ।
परमं मित्रमासाद्य विनीता वरबुद्धिना[g] ॥३४२॥
गम्भीरचरितं[h i] धीरा[j] प्रजानन्ति परस्परं ।
अनन्तप्रतिभानं च सर्वे सर्वाङ्गशोभना[k l] इति ॥३४३॥

इति श्रीमहावस्तुअवदाने अभिषेकवती नाम दशमा[m] भूमिः समाप्ता ॥

शिखरे गृध्रकूटस्मि[n] पञ्चानां वशीभूतशतानां[o] समवाये दशभूमिकं[p] नाम उपदेश-मुखं भाषितं । समाप्तं[q] दशभूमिकं । ये सत्वा[r] बुद्धत्वाय प्रणिधेन्ति[s t] तेहि उद्देशितव्यं[u v] दशभूमिकं बोधिसत्वानां च दृष्टसत्यानां[w] श्रद्दधानानां दातव्यं[x] नान्येषां एते[y] ह्यत्र श्रद्दधाना अन्ये विचिकित्सेयुः[z] ।

समाप्ता आदिर्भूमि[a] यावद्दशमा दशभूमयः महावस्तुपरिसरं[b] ।

दीपंकरवस्तुस्यादिः । इतो महामौद्गल्यायन[c] अपरिमिते[d] असंख्येये कल्पे[e] राजा अर्चिमां[f] नाम अभूषि[g] चक्रवर्ती कृतपुण्यो महेशाख्यो सप्तरत्नसमन्वागतो[h] चातुर्द्वीपो विजितावी अनुरक्तपौरजानपदो धार्मिको धर्मराजा दश कुशला कर्मपथा[i] समादायवर्ती। तस्य सप्त रतनानि अभूत्[j] । तद्यथा चक्ररत्नं हस्तिरतनं अश्वरत्नं मणिरतनं स्त्रीरतनं[k] गृहपतिरत्नं परिणायकरतनं एवं[l] सप्तरत्नं। पूर्णं चास्य पुत्रसहस्रं अभूषि[m] शूराणां वीराणां वराङ्गरूपिणां परसैन्यप्रमर्दकानां । सो इमां चत्वारि महाद्वीपां सागरगिरि-पर्यन्तां[n] अखिलां अकण्टकां अदण्डेनाशास्त्रेणानुत्पीडेन धर्मेणेमां अभिनिर्जिणित्वा[o p]
Sen. 194 अध्यावसि । अर्चिमतो खलु पुनः महामौद्गल्यायन[q] राज्ञो दीपवती[r] नाम राजधानी अभूषि[s] द्वादश योजनानि आयामेन पुरस्तिमेन[t] च पश्चिमेन[u] च सप्त योजनानि

विस्तारेण [a]दक्षिणेन च उत्तरेण च सप्तहि प्राकारेहि परिक्षिप्ता अभूषि सौवर्णेहि [b]सुवर्ण-प्रच्छन्नेहि। दीपवती खलु [c]पुन[d]र्महा[e]मौद्गल्यायन राजधानी सप्तहि [f]तालपङ्क्तिहि परिक्षिप्ता अभूषि चित्राहि दर्शनीयाहि सप्तानां रत्नानां सुवर्णस्य रूप्यस्य मुक्ताया [g]वै[h]डूर्यस्य स्फटिकस्य मुसारगल्वस्य [i]लोहितिकायाः। सौवर्णस्य तालस्कन्धस्य रूप्यमयं पत्रं च फलं च अभूषि। [j]रूप्यमयस्य तालस्कन्धस्य [k]मुक्ताया पत्रा च फला च अभूषि। मुक्तामयस्य तालस्कन्धस्य वैडूर्यमया पत्रा च फला च अभूषि। वैडूर्यमयस्य ताल-स्कन्धस्य स्फटिकस्य पत्रा च फला च अभूषि। स्फटिकमयस्य तालस्कन्धस्य मुसारगल्वमया पत्रा च फला च अभूषि। मुसारगल्वमयस्य तालस्कन्धस्य लोहिति-कामया पत्रा च फला च अभूषि। लोहितिकामयस्य तालस्कन्घस्य मुक्तामया पत्रा च फला च अभूषि। [l]तेषां खलु पुनः [m]महामौ[n]द्गल्यायन तालानां [o]वातेरितानां वातसंघट्टितानां घोषो निश्चरति वल्गु [p]मनोज्ञः [q]आसेचनको अप्रतिकूलो श्रवणाय। तद्यथापि नाम पंचाङ्गिकस्य तूर्यस्य कुशलेहि वादकेहि [r]सम्यक्सुप्रवादितस्य [s]घोषो निश्चरति वल्गु [t]मनोज्ञो आसेचनको अप्रति[u]कूलो श्र[v]वणाय। [w]एवमेव······[x]भो महामौद्गल्यायन तेन कालेन तेन समयेन दीपवतीये राजधानीये मनुष्या [y]अभूषि [z]शुण्डापेया ते तेन तालपत्रनिर्घोषेण पंचहि कामगुणेहि समर्पिता [a]समङ्गीभूता [b]क्रीडेन्सु रमेन्सु प्रविचारेन्सु।

[c]दीपवती खलु पुन[d]र्महा[e]मौद्गल्यायन [f]राजधानी सप्तहि वेदिकाजालेहि परिक्षिप्ता [g]अभूषि चित्राहि दर्शनीयाहि सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताया [h]वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य [i]लोहितिकाया। [j]सौवर्णस्य पादकस्य रूप्यमयी सूचिका आलम्बनमधिष्ठानकं चाभूषि। रूप्यमयस्य पादकस्य मुक्तामया सूचिका आलम्बन- Sen. 195
[k]मधिष्ठानकं च अभूषि। [l]मुक्तामयस्य वैडूर्यमयी वैडूर्यमयस्य स्फटिकमयी स्फटिकमयस्य मुसारगल्वमयी मुसारगल्वमयस्य लोहितिकामयी। लोहितिकामयस्य [m]पादकस्य सौवर्णिका सूचिका आलम्बनमधिष्ठानकं च अभूषि। [n]ते च खलु पुनर्महा[o]मौद्गल्यायन वेदिकाजाला

द्विहि हेमजालेहि प्रतिच्छन्ना अभूषि[a] सुवर्णमयेन च हेमजालेन[b] रूप्यमयेन[c] च। सौवर्णस्य[d][e] हेमजालस्य रूप्यमयीयो[f] किंकिणीयो अभूषि। रूप्यमयस्य[g] हेमजालस्य सौवर्णिका किंकिणिका अभूषि। दीपवतीयं खलु पुनः राजधानीयं[h] समन्ततो[i] त्रीणि त्रीणि द्वाराणि अभूषि[j] चित्राणि दर्शनीयानि सप्तानां रत्नानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य लोहितिकायाः। तेषां खलु पुनर्महामौद्गल्यायन[k] द्वाराणां[l] द्विन्नां वर्णानां व्यामोत्संगा[m] अभूषि[n] सुवर्णस्य च रूप्यस्य च। द्विन्नां[o] वर्णानां[p] तुला अभून्सुः सुवर्णस्य[q] च रूप्यस्य च। द्विन्नां[r] वर्णानां अनुवर्गा अभून्सुः सुवर्णस्य च रूप्यस्य च। द्विन्नां[s] वर्णानां फटिकफलकानि अभून्सुः सुवर्णस्य च रूप्यस्य च। द्विन्नां[t] वर्णानां[u] फलकस्तारा अभून्सुः[v] सुवर्णस्य च रूप्यस्य[w] च। चतुर्णां वर्णानां पटिमोदका अभुन्सुः[x] सुवणस्य च रूप्यस्य मुक्ताया वैडूर्यस्य[y]। तेषां[z] खलु पुनर्महामौद्गल्यायन[a] द्वाराणां[b] द्विन्नां[c] वर्णानां एलूका अभून्सुः[d] सुवर्णस्य[e] रूप्यस्य च। तेषां खलु पुनर्महामौद्गल्यायन[f] द्वाराणां चतुर्णां वर्णानां इन्द्रकीलका[g] अभुन्सु[h] सुवर्णस्य च रूप्यस्य च मुक्ताया वैडूर्यस्य च। द्विन्नां[i] वर्णानां कपाटानि अभून्सुः सुवर्णस्य च रूप्यस्य[j] च। द्विन्नां[k] वर्णानां अर्गल-
Sen. 196 पाशा अभुन्सुः सुवर्णस्य च रूप्यस्य च। तेषां खलु पुनर्महामौद्गल्यायन[l] द्वाराणां पुरतो इषिकानि मापितानि अभून्सुः[m] त्रिपौरुषनैखान्यानि[n] त्रिपौरुषपरिगोह्यानि[o] द्वादशपौरुषा[p] उद्वेघेन चित्राणि दशनीयानि सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य[q] स्फटिकस्य[r] मुसारगल्वस्य लोहितिकायाः। ते[s] खलु पुनमहामौद्गल्यायन[t] द्वारा[u] द्विहि द्विहि हेमजालेहि प्रतिच्छन्ना अभून्सुः सौवर्णिकेन[v] हेमजालेन रूप्यमयेन हेमजालेन[w]। सुवणस्य हेमजालस्य रूप्यमयीयो[x] किंकिणीयो[y] अभून्सुः[z] रूप्यमयस्य हेमजालस्य सौवर्णिका किंकिणीयो अभून्सुः। तेषां[a] खलु पुनर्महामौद्गल्यायन[b] हेमजालानां[c] वातेरितानां[d] वातसंघट्टितानां घोषो निश्चरति वल्गु मनोज्ञः आसेचनको अप्रतिकूलो श्रवणाय। ·········एवमेव महामौद्गल्यायन[e][f] तेषां हेमजालानां वातेरितानां वातसंघट्टितानां[g][h] घोषो

निश्चरति वल्गु मनोज्ञः आसेचनको अप्रतिकूलो श्रवणाय। दीपवती[a] खलु पुनर्भो महामौद्गल्यायन[b] राजधानी अशून्या अभूषि इमेहि एवंरूपेहि शब्देहि[c] सय्यथापि हस्तिशब्देहि रथशब्देहि[d] पत्तिशब्देहि भेरीशब्देहि मृदङ्गशब्देहि पणवशब्देहि शंख-शब्देहि वेणुशब्देहि वीणाशब्देहि गीतशब्देहि वादित्रशब्देहि[e] अश्नुथ खादथ पिबथ देथ दानानि करोथ पुण्यानि[f] धर्मं चरथ श्रमणब्राह्मणेषु भद्रमस्तु[g] वः ति शब्देहि। दीपवतीयं खलु पुनः राजधानीयं मध्ये वल्गुया नाम यष्टि अभूषि[h] चित्रा[i] दर्शनीया सप्तानां[j] वर्णानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य[k][l] स्फटिकस्य मुसारगल्वस्य लोहितिकाया द्वादशयोजनानि उद्वेधेन चत्वारि[m] योजनानि अभिनिवेशेन।

अर्चिमतो खलु पुनः[n] महामौद्गल्यायन[o] राज्ञः[p] सुदीपा नाम अग्रमहिषी अभूषि प्रासादिका दर्शनीया अक्षुद्रावकाशा[q] परमाये शुभाये वर्णपुष्कलताये समन्वागता।

द्वादशेहि[r] महामौद्गल्यायन[s] वर्षेहि[t] दीपंकरः बोधिसत्वो तुषितभवनातो
च्यविष्यति[u] शुद्धावासा देवा प्रत्येकबुद्धानां आरोचयन्ति[v][w]। बोधिसत्वो च्यविष्यति[x] Sen. 197
रिंचथ बुद्धक्षेत्रं।

तुषितभवनादतियशो[y] च्यविष्यति अनन्तज्ञानदर्शावी[z]।
रिंचथ बुद्धक्षेत्रं........................वरलक्षणधरस्य[a] ॥१॥
ते श्रुत्व[b] बुद्धशब्दं प्रत्येकजिनाः महेश्वरवराणां।
निर्वांसु[c] मुक्तचित्ता स्वयंभुनो चित्तवशवर्ती ॥२॥

द्वादशेहि महामौद्गल्यायन[d] वर्षेहि[e] दीपंकरो बोधिसत्वो तुषितभवनातो[f] च्यविष्यति शुद्धावासा देवा ब्राह्मणवेषं[g] निर्मिणित्वा[h] मन्त्रांश्च वेदांश्च[i] द्वात्रिंशच्च[j] महापुरुषलक्षणानि ब्राह्मनानां वाचेन्ति यथा बोधिसत्वे इहागते व्याकरेन्सुः[k]।

अथ खलु[l] महामौद्गल्यायन बोधिसत्वो च्यवनकाले तुषितभवनातो चत्वारि महाविलोकितानि[m] विलोकयति। तद्यथा कालविलोकितं देशविलोकितं द्वीपविलोकितं

कुलविलोकितं। द्विहि कुलेहि महामौद्गल्यायन[a] बोधिसत्वा[b] जायन्ति[c] क्षत्रियकुले ब्राह्मणकुले वा। यस्मि कुले महामौद्गल्यायन[d] बोधिसत्वा जायन्ति तं कुलं षष्टीहि अङ्गेहि[e] समन्वागतं भवति। कतमेहि षष्टीहि[f] अङ्गेहि[g] समन्वागतं भवति। अभिज्ञातं च महामौद्गल्यायन[h] तं कुलं भवति। परिज्ञातं च तं कुलं भवति। अक्षुद्रावकाशं च तं कुलं भवति। जातिसम्पन्नं च भवति[i]। गोत्रसम्पन्नं च पूर्वपुरुषयुगसम्पन्नं[j][k] च। अभिज्ञातपूर्वयुगसम्पन्नं च। महेशाख्यपूर्वयुगसम्पन्नं च। बहुस्त्रीकं[l] च। बहुपुरुषं च। अलोलं[m] च। अलुब्धं च[n]। अभीतं च। अदीनं च। प्रज्ञावन्तं च[o]। शीलवन्तं च[p]। स्वापतेयमप्रेक्षमाणं[q] च। तं कुलं भोगां च भुंजति[r]। दृढमित्रं च तं कुलं भवति[s]। कृतज्ञं च[t]। विधिज्ञं च।
Sen. 198 अच्छन्दगामी च। अदोषगामि[u] च। अमोहगामि[v] च। अभयगामि च[w]। अवद्यभीरु च। स्थूलभिक्षं[x] च। पुरुषकारमतिं च। दृढविक्रपणं[y][z] च[a]। चेतियपूजकं[b] च। देवपूजकं च[c]। पूर्वपितृपूजकं च[d]। क्रियाधिमुक्तं च[e]। त्यागाधिमुक्तं च[f]। व्रताधिमुक्तं[g] च। लब्धपूर्वापरं[h] च। अभिदेवघोषघुष्टं[i] च। कुलज्येष्ठं[j] च। कुलश्रेष्ठं च। कुलप्रवरं[k] च। कुलवशिप्राप्तं च। महेशाख्यं च[l]। महापरिवारं[m] च। अश्रमपरिवारं च। अनुरक्तपरिवारं[n] च। अभेद्यपरिवारं[o] च। मातृज्ञं च[p]। पितृज्ञं च। श्रामण्यं च[q]। ब्राह्मण्यं च। कुलज्येष्ठापचायकं[r] च। प्रभूतधनधान्यं च। प्रभूतकोशकोष्ठागारं[s] च। प्रभूतहस्त्यश्वगवेडकं[t] च। प्रभूतदासीदासकर्मकरपौरुषेयं[u] च। दुष्प्रधर्षं[v] च तत्कुलं भवति[w] परेहि प्रत्यर्थिकेहि प्रत्यमित्रेहि। यस्मि कुले महामौद्गल्यायन[x] बोधिसत्वा जायन्ति तत्कुलं इमेहि षष्टीहि अंगेहि समन्वागतं[y] भवति। ये ते सत्वा कुलसंपन्ना[z] भवन्ति एवंरूपा सत्वा महाकरुणां प्रतिलभन्ति।

अथ महामौद्गल्यायन[a] बोधिसत्वो च्यवनकाले महासंविधानं करोति। देवपुत्रसहस्राणि देवपुत्रेण उक्ता[b][c]। षोडशहि महाजनपदेहि मध्यदेशेहि उपपद्यथ[d] क्षत्रियमहाशालेषु च कुलेषु गृहपतिमहाशालेषु कुलेषु च राजकुलेषु च राजामात्यकुलेषु च। युष्मेहि[e] विनीतेहि महाजनकायो विनयं[f] आगमिष्यति।

बोधिसत्वो च्यवनकाले अवलोकयति कहिमुपपद्यामि। [a]अयं अर्चिमो राजा कतपुण्यो महेशाख्यो च [b]चक्रवर्ती चतुर्द्वीपाधिपतिः एषो मम [c]पिता योग्यो। मातर- Sen. 199
[d]मन्वेषति या प्रासादिका [e]भवेय कुलीना च [f]शुचिगात्रा च मन्दरागा च अल्पायुष्का च यस्या शेषा ससप्तरात्रा दश मासा आयुष्प्रमाणतो अवशिष्टा भवेन्सुः।

[g]सर्वेषां बोधिसत्वानां जनेत्वा पुरुषोत्तमां।
[h]चरमे सप्तमे दिवसे माता जहति जीवितं ॥३॥
अत्र किं कारणं [i]भवति यदि सर्वज्ञमातरो।
जनेत्वा [j]पुरुषश्रेष्ठं शीघ्रं जहन्ति जीवितं ॥४॥
[k]वसन्तो तुषिते काये बोधिसत्वो महास्मृतिं।
लभते [l]शुभकर्मेण परीक्षन्तो जनेत्रियं ॥५॥
यस्येह परिशेषं स्या नारीये जीवितं भवेत्।
दिवसानि सप्त [m]मासा च दश [n]तस्या [o]उरमोतरेत् ॥६॥
किं कारणं [p]अयुक्तं हि अस्मद्विधमनुत्तरं।
धारेत्वा उत्तरे काले मैथुनं परिसेवितुं ॥७॥
[q]अथापि प्रतिसेवेयुः कामां सुगतमातरि।
न पिता [r]देवसंघानां भिन्नवृत्तो ति वक्ष्यते ॥८॥
भगवां च नाम [s]कामानां दोषां सततं भाषति।
अथ च लोकनाथस्य [t]माता कामां निषेवति ॥९॥
[u]ये च [v]नृपतिनां वेश्मस्थानि [w]रत्न[x]करण्डका।
[y]रतनं [z]पुरुषश्रेष्ठा भाजनं जिनमातर [a]इति ॥१०॥

[b]समन्वेषन्तो महामौद्गल्यायन बोधिसत्वो अद्राक्षीत्। [c]दीप[d]वतीये राजधानीये राज्ञो अर्चिमस्य सुदीपा देवी प्रासादिका च कुलीना शुचिगात्रा च मन्दरागा च Sen. 200
[e]अल्पायुष्का च [f]ससप्तरात्राणि चास्या दश मासानि [g]आयुष्प्रमाणतो [h]अवशिष्टा।

[a]पश्यति [b]विलोकयन्तो लोकं अथ अर्चिमस्य ओरोधे ।
[c]नारीं अमरवधुनिभां विद्युल्लतानिभां इव सुदीपां ॥११॥
सो तां निशाम्य जननीं आमन्त्रयते अमरां च्यविष्यामि ।
[d]अन्तिममुपेष्यि वासं गर्भे मरुमानुषसुखार्थं ॥१२॥
[e]तं अवच देवसंघो कृतांजलिपुटो वराभरणधारी ।
ऋध्यतु [f]उत्तमपुद्गल तव [g]प्रणिधि अहीनगुणरूप ॥१३॥
[h]वयं अपि लोक[i]हि[j]ताय मनोरमामोशिरित्व कामरतिं ।
[k]पूजार्थं तव अतिदेव मनुष्यलोके [l]वसिष्यामो ॥१४॥
ते [m]विमलरुचिरवर्णं मन्दार[n]व[o]पुष्पवर्षमाकाशे ।
[p]प्रवर्षिन्सु उदग्रचित्ताः शुचिं सु[q]मधुराहि वा[r]चाहि ॥१५॥
[s]यम[t]मरवसना प्रशमनमनोरमा शोकदुःखविनिमिश्रा ।
न नन्द[u]सि न च [v]निषेवसि कामानिदमद्भुतं [w]तुभ्यं ॥१६॥
यं पि अभिभूय मरुगणं [x]जम्बूनदपर्वतोपमप्रकाशो ।
उद्योतयसि दश दिशां [y]सुरर्षभ इदं पि आश्चर्यं ॥१७॥
अभिभवसि [z]देवसंघां समहेश्वरदा[a]नवां [b]समारगणां ।
[c]तारागणां [d]खगचरां अमितमति इदं पि आश्चर्यं ॥१८॥
किं चापि विप्रयोगं त्वया न इच्छाम भूतसंघ[e]गुरु ।
Sen. 201 [f]अपि त्वर[g]विन्दनयना भविष्यसि गतिर्नर[h]मरूणां ॥१९॥
अथ च्यवनकालसमये विशुद्धशतपत्रपद्मनयनस्य ।
[i]आनन्दितो मरुगणः [j]घोषेति दिशाहि [k]सर्वाहि ॥२०॥
[l]एषा च वर्तति कथा तुषितपुरे सा च अप्रतिमा सुदीपा ।
[m]राज्ञोर्चिमस्य महिषी राजानमुपेत्य इदमा[n]ह ॥२१॥

सा हरिणवत्सनयना विशुद्धगन्धर्व[a]वधुनिभा[b] श्यामा।
सहितमिदं अर्चिमस्य[c] सुमधुरमिदमब्रवि सुदीपा ॥२२॥
आभरणस्तम्भितभुजा प्रवरवसनधारिणी[d] सखीहि सह।
त्वया विना राजर्षभ[e] रजनीमिमां क्षपयितुं[f] छन्दो ॥२३॥
शतरश्मिस्य[g] नरवरा[h] प्रासादवरस्य[i] उत्तमां भूमिं[j]।
शयनवरमारुहे[k] यत्र कुमुदवसनसन्निभं[l] विमलं ॥२४॥
तेन वचनेन तुष्टो देवीये अर्चिमां[m] मनापेन।
आमन्त्रयति[n] नरवरो परिवारमुदग्रसंकल्पो[o] ॥२५॥
प्रतिवेदयन्तु[p] मे[q] लघु शतरश्मि प्रवरकुसुमसंच्छन्नं।
मुक्तकुसुमावकीर्णं[r] करोथ दिवि देवभुवनं वा ॥२६॥
ओसक्तपट्टदामं[s][t] शतरश्मि शोभतां[u] चपलमेव।
वरहेमजालच्छन्नं[v] सुमेरुवरशृंगसंकाशं[w][x] ॥२७॥
चतुरंगिनी[y] च सेना[z] सशूलनाराचतोमरविचित्रा।
परिवारयतां[a] चपलं शतरश्मिमनोज्ञसंघातं[b] ॥२८॥
ओसृष्टा[c] येवाज्ञा नरपतिना सज्जं एव च सर्वं।
कृत्वा[d] तत्र स्वकुलं[e] राजानमुपेत्य इदमाहु ॥२९॥
वर्षसहस्रमनूनं[f] आयुः परिपालेतु महीपालो। Sen. 202
सज्जं[g] ति विमानवरं शोभति तव हर्षसंजननं ॥३०॥
अथ सा अमरवधुनिभा[h] देवी उत्थाय आसनवरातो[i]।
अब्रवीत्[j] महीपतिवरं[k] आदित्ये[l][m] अस्तमितमात्रे ॥३१॥
एषा समादियामि प्राणिषु[n] अविहिंसं ब्रह्मचरियं[o][p] च।
विरमामि[q] चाप्यदिन्नान्मद्यादनिबद्धवचनात्त्र[r][s] ॥३२॥

अखिल[a]वचनाच्च नरवर प्रतिविरमामि तथैवं पैशून्यात् ।
परुषवचनाच्च नरपति विरमामि[b] अयं मम च्छन्दो ॥३३॥
परकामेषु[c] च ईर्ष्यां न संजनेष्यं नापि अभिद्रोहं ।
भूतेषु उपजनेष्यं[d] विपरीतमतिं च विजहामि ॥३४॥
एकादशप्रकारं[e] शीलं सेवाम्यहं पृथिवीपाल ।
रजनी[f]मिमामनूनामेवं[g] मम जायते छन्दः ॥३५॥
अपि[h] च कखु भूमिपाला कामवितर्को मा मां प्रतिकांक्षि ।
प्रेषय[i] मा ते अपुण्यं भवेय मम ब्रह्मचारिणिये ॥३६॥
सर्वे तव संकल्पां परिपुरेमीति पार्थिवो अवचि[j] ।
अभिरम भवनवरगता[k] अहं[l] च राज्यं च ते वश्यं ॥३७॥
सा स्त्रीसहस्रमग्रचं[m] अनुरक्तं गृह्य तं विमानवरं ।
अभिरुह्य अभिनिषीदे[n][o] मनापपरिपूर्णसंकल्पा[p] ॥३८॥
सा कश्चिदेव[q] कालं तस्मि हिमकुमुदपुण्डरीकनिभे ।
शयने[r] प्रसमदमरता तुष्णींभावेन क्षेपयति ॥३९॥
Sen. 203 सा[s] दानि दक्षिणेन पार्श्वेन[t] परिन्यासे शरीरवरं ।
कुसुमलता[u] व द्रुमवरं[v] शयनं परिवेल्लियाशयिता ॥४०॥
अथ तां निशाम्य शयनोपगतां देवीं दिवि प्रमदारूपनिभां[w] ।
तुषितालया[x] च्यविय[y] देवगणाः प्रासादमूर्ध्नि प्रतिस्थिहिंसु[z] ॥४१॥
ते[a] मूर्धना अभिनता सर्वे हृष्टा कृतांजलिपुटाः अमरा ।
वन्दन्ति[b] तां विपुलपुण्यधरां देवीं जिनस्य जननीं शयने ॥४२॥
अथ कौतूहलपरं[c] संजनिया बहुदेवकन्या[d] शुचिमाल्यधरा[e] ।
जिनमातुरुपगता[f] द्रष्टुमना प्रासादमूर्ध्नि प्रतिष्ठिहिंसु[g] ॥४३॥

उपसंक्रमित्वा[a] शयनोपगतां देवीं निशाम्यवरविद्यु[b] निभां ।
प्रीतिसुखं[c] विपुलं संजनिया[d] अथ संप्रवर्षि दिविजंकुसुमं[e] ।।४४।।
मानुष्यकं[f] पि किल एद्दशकं रूपं सुजातमिदमाश्चर्यं[g] ।
कंचित्कालं[h] स्थिहियमन्तरतो[i] नायं समा[j] मरुवधूहि भवे[k] ।।४५।।
लीलां निशामयथ[l] हे सखिका प्रमदायिमस्य[m] यथ[n] ओपयिकां[o] ।
शयने विरोचति[p] मनं हरति विभ्राजते कनकमरीचिरिव ।।४६।।
अयन्तं धरेष्यति महापुरुषं[q] अत्यन्तदानदमशीलरतं ।
सर्वाश्रिवान्तकरणं[r] विरजं[s] किं हायते तव नरेन्द्रवधू ।।४७।।
चापोदरे[t] करतलप्रतिमे वररोमराजिविचित्रे[u] रुचिरे ।
इह[v] सो भविष्यति अनन्तमतिः[w]सततं[x] अलिप्त[y] अशुभेन शुचि[z] ।।४८।।
बहुदीर्घरात्रनिचितं[a] कुशलं प्रमदायिमस्य विपुलं परमं ।
या तं धरेष्यति[b] अनन्तगुणं चिररात्रसन्निचितपुण्यबलं[c] ।।४९।। Sen. 204
अनुरूपा[d] त्वं च प्रमदा प्रवरा माता स चैष पुरुषप्रवरो ।
पुत्रो प्रहीनवनथो[e] विरजो किं[f] हायते तव नरेन्दवधू ।।५०।।
अथ राक्षसा[g] विविधरूपधरा[h] आणत्ता दिवि परितो[i] चपलं ।
तिष्ठन्तु[j] भो प्रवरशस्त्रधराः सर्वदिशा कुरुथ असंवरणा ।।५१।।
तेषामनन्तर द्विजिह्वगणा[k] आरक्षहेतु दिशतासु स्थिताः[l] ।
वातं[m] पि येष[n] चलितं श्रुणिय[o] क्रोधं समुत्पतति[p] अग्निसमो ।।५२।।
तेषामनन्तरगताः[q] थपिता यक्षाः प्रदीप्तशिखरा[r] विकृता[s] ।
ये[t] दुष्टचित्ता[u] विनिवारयाथ[v] मा च वधं कुरुथ कस्यचापि ।।५३।।
तेषामनन्तरस्थिता बलवां[w] गन्धर्वसंघो शुभरूपधराः ।
आरक्षहेतु शुभचापधरा[x] वरलक्षणा[y] विपुलबुद्धिमतो ।।५४।।

चत्वारि[a] लोकपतिनो[b] स्थपिता गगने[c] स्वयंपरिवारेण सह ।
अद्य[d] च्यविष्यति किल भगवां लोकस्य अर्थसुखवृद्धिकरो ॥५५॥
त्रिदशेहि सार्धं त्रिदशप्रवरो स्थितु अन्तरीक्षे वरचक्रधरो[e] ।
अचिरं[f] च्यविष्यति[g] च्युतिं चरमां आकांक्षमाण[h] सुखं अप्रतिमं ॥५६॥
देवीय मूले[i] बहु[j] देवगणा[k] कृत्वा दशांगुलिं नताभिमुखा ।
समुदीरयन्ति वचनं मधुरं[l] उल्लोकयन्ति[m] तुषितेषु जिनं ॥५७॥
व्यवदानसन्निचितपुण्यबला[n] समयो खु अन्तिममुपेतु[o] भवं[p] ।
सज्जा[q] ताव[r] भवति ते जननी अनुकम्प दानि दुःखितां जनतां ॥५८॥
Sen. 205 एषो च्यवामि[s] इति मुंचि गिरां[t] शुभं वचनं उदीरयि...... ।
अथ सुपिनं[u] जननि[v] जिनस्य तस्मिं क्षणे पश्यते वरविपाकफलं ॥५९॥
हिमरजतनिभो[w] से षड्विषाणो सुचरणचारुभुजो[x] सुरक्तशीर्षो ।
उदरमुपगतो[y] गजप्रधानो ललितगतिः अनवद्यगात्रसन्धिः ॥६०॥

न खलु पुनर्महामौद्गल्यायन[z][a] बोधिसत्वा कालपक्षे मातुः कुक्षिमवक्रामन्ति । अथ पूर्णायां पूर्णमास्यां[b] पुष्यनक्षत्रयोगयुक्तायां[c][d] बोधिसत्वा मातुः कुक्षिमवक्रामन्ति । उपोषधिकायां आरोहसम्पन्नायां परिणाहसम्पन्नायां व्यक्तायां अग्रयौवनमण्डप्राप्तायां विनीतायां बहुश्रुतायां[e] स्मृतायां सम्प्रजानायां सर्वाकारप्रदक्षिणचित्तायां[f] सर्वाकारप्रतिरूपायां प्रमदोत्तमायां बोधिसत्वा[g] मातुः[h] कुक्षिमवक्रामन्ति । बोधिसत्वेन महामौद्गल्यायन[i] तुषितभवनगतेन च्यवनकाले प्रभा ओसृष्टा याये प्रभाये सर्वं बुद्धक्षेत्रं ओभाषितं ।

देवपुत्रो देवपुत्रं पृच्छति ।

किं कारणं[j] सुरवरेण प्रभा प्रमुक्ता
चन्द्रांशुशीतलतरा[k] कनकावदाता ।

[a]येनासुरेश्वरगणा मनुजेश्वराश्च
प्रह्लादिता च [b]नरका ज्वलनार्चिकल्पा ॥६१॥

सो [c]दानि आह ।

ये तत्र [d]तत्र जनतां प्रतिपालयन्ति
संसारपंजर[e]गतां मदनाभिभूतां ।
तेषां वि[f]मोक्षकरणेन महायशेन
आमन्त्रणार्थं अनघेन प्रभा प्रमुक्ता ॥६२॥

बोधिस[g]त्वो आह । Sen. 206

मुंचथ अमरा पुराणि न [h]किल प्रामोद्यस्य अयं कालः ।
जरामरणपुरं [i]भेत्तुं कालो ज्ञानप्र[j]हारेण ॥६३॥

बोधिसत्वो स्मृतो संप्रजानो प्रदक्षि[k]णचित्तो मातुः कुक्षिमवक्रान्तो इति ।

सो [l]नदिय [m]सिंहनादं नरसिंहो च्यवनकालसम[n]यस्मिं ।
अन्तरहितो क्षणेन नरेन्द्रभवने [o]समुत्पद्ये ॥६४॥
यो सो [p]तुषितं कायं [q]ओभासेति शुभेन वर्णेन ।
[r]देवपुराच्च्यवमानो अनतिवरो लोकप्रद्योतः ॥६५॥
[s]सब्रह्मकं च लोकं स[t]श्रमण[u]ब्राह्मणा प्रजा सर्वा ।
वर्णे[v]नोभासे[w]ति अनतिवरः [x]लोकप्रद्योतो ॥६६॥
आश्चर्यम[y]द्भुतमिदं पश्यथ यावत् महर्द्धिकः शास्ता ।
[z]स्मृतिमां सुसंप्रजानो मातुः कुक्षिस्मि [a]ओक्रान्तो ॥६७॥
[b]यावच्च [c]नरवरप्रवर उत्तमलक्षणसमंगि अस्थासि ।
माताये कुक्षिस्मि स्मृतिम[d]तिमां संप्रजानो च ॥६८॥

समनन्तरौक्रान्ते[a] च महामौद्गल्यायन[b] बोधिसत्वे[c] महासत्वे मातुः[d] कुक्षिस्मि इयं
महापृथिवी अतीव षड्विकारं[e] कम्पे संकम्पे प्रकम्पे संहर्षणीयं च कम्पे दर्शनीयं च
Sen. 207 हर्षनीयं च मोदनीयं च प्रेमनीयं च प्रह्लादनीयं च निर्वर्णनीयं[f] च उल्लोकनीयं च[g]
आसेचनकं च अप्रतिकूलं च प्रासादिकं[h] च प्रसरणीयं च निरुद्वेगं च निरुत्त्रासं[i] च।
कम्पमाना च पुनर्न कंचित्सत्वं व्याबाधति[j] यमिदं[k] जंगमं स्थावरं वा।

ततो अयं सागरमेरुमण्डला
प्रकम्पिता[l] षड्विधमासि[m] मेदिनी[n]।
कृतो[o] च लोको विमलो मनोरमो
महान्धकारा[p]पनुदस्य[q] तेजसा ॥६९॥
सोऽयं महानुभावो स्मृतिमां तुषितभवनाच्च्यवित्वान।
पाण्डर[r][s]वराहकनिभो[t] भवित्व[u] गजरूपी षड्दन्तो ॥७०॥
वीरशयने शयन्तिये[v] पोषधिकाये[w] विशुद्धवसनाये।
स्मृतो संप्रजानो कुशलो[x] मातुः कुक्षिस्मि ओक्रान्तः ॥७१॥
सा च रजनीप्रभाते[y] आख्यासि भर्तुनो मनापस्य।
राजवर पाण्डरो[z] मे गजराजा[a] कुक्षिमोक्रान्तो ॥७२॥
तं[b] शृणुय भर्तु राजा वैपंचनिकां[c] समागतां[d] अवचि।
सुपिनस्मि[e] अस्या सर्वे भणाथ भूतं फलविपाकं[f] ॥७३॥
ते[g] तत्रापि अवचिसु निमित्तिका[h] पृच्छिता[i] स्वयं राज्ञा।
द्वात्रिंशल्लक्ष[ण]धरो कुक्षि[j][k] देवीय ओक्रान्तो[l] ॥७४॥
हृष्टो[m] भवासि नरवर[n] यस्य तव कुलस्मि[o] प्रत्युत्पन्नो।
पृथिवीधर[p] वरगर्भो अनुपमसत्वो[q] महासत्वो ॥७५॥

[a]यथ मय [b]पौराणानामाचार्याणां [c]स्वयं समुपाहृतं।
[d]द्वेऽस्य गतयो अनन्या [e]भवन्ति [f]नरवीरशार्दूल ॥७६॥ Sen. 208
यदि आसि[g]ष्यति अगारे महीपति होति सरतनो महर्द्धिको।
नित्यानुबद्ध[h]विजयो राजशतसहस्रपरिवारो ॥७७॥
[i]अथ खलु प्रव्रजिष्यति चातुर्द्वीपां महीं विजहियान।
[j]होहिति [k]अनन्यनेयो बुद्धो नेता [l]नरमरूणां ॥७८॥

[m]यावत्तका नागराजानो नागाधि[n]पतयो ते सर्वे बोधिसत्वस्य रक्षावरणगुप्तीये [o]औत्सुक्यमापद्ये न्सुः। बोधि[p]सत्वे खलु पुनर्महामौद्गल्यायन मातुः कुक्षिगते याव[q]न्तो सुवर्णराजानो [r]सुवर्णाधि[s]पतयो ते सर्वे बोधिसत्वस्य रक्षावरणगु[t]प्तीये औत्सुक्य-मापद्ये न्सुः। चत्वारो पि महाराजानो बोधिसत्वस्य [u]रक्षावरणगुप्तीये औत्सुक्य-माप[v]द्ये न्सुः।

चतुरो पि लोक[w]पाला रक्षामकरिन्सु लोकना[x]थस्य।
[y]मा कोची अहितैषी नमु[z]चिबलनुदं विहिंसेय ॥७९॥

शक्रो देवानामिन्द्रो सुयामो पि देवपुत्रो [a]संतुषितो पि देवपुत्रो सु[b]निर्मितो पि देवपुत्रो वशवर्ती पि देवपुत्रो महाब्र[c]ह्मा पि शुद्धावासो पि देवपुत्रो बोधिसत्वस्य मातुः कुक्षिगतस्य रक्षावरण[d]गुप्तीये औत्सुक्यमापद्ये न्सुः।

सहस्राणि देवानाम[e]र्[f]चिमपुरमुपगतानि तु[g]ष्टानि।
आरक्षार्थं·········वरबु[h]द्धिनो अमरपुरमिव ॥८०॥
मनोरमं दीपवतीपुरमुत्तमं [i]कृतमनुविशन्तेहि।
मनोमयविक्रमगतेहि अमरग[j]णेहि अभिविरोचति ॥८१॥
[k]देवीं [l]परिवारेत्वा महेश्वरगणानां किल सहस्राणि। Sen. 209
अष्टौ गगण[m]तलगता आकाशगता अभि[n]निषण्णा ॥८२॥

तेषां [a]दानि पृष्ठतो इन्द्रसहस्राणि विमल[b]शिख[c]राणि ।
सुबहूनि बहुगुणस्य आरक्षा[d]र्थं निषण्णानि ॥८३॥
ते[e]षां दानि पृष्ठतो देवेन्द्राणां सहस्रनयु[f]तानि ।
कामाव[g]चरा देवा निषण्णा गगने नि[h]राल[i]म्बे ॥८४॥
तेषां दे[j]वगणानां पृष्ठतो असुरा असु[k]राणां च द्विजिह्वगणा ।
य[l]क्षाश्च विकृतरूपा रा[m]क्षससंघाश्च सन्नि[n]षण्णा ॥८५॥
एताये विधिये ग[o]गणं अमरशतसहस्रसंकुलं श्रीमं ।
अत्यन्तसुपरिशुद्धं कुशलमुपचितं हि विरजेन ॥८६॥

महाब्रह्मा आह ।

स्वप्नान्त[p]रे या प्रमदा ददर्श
सूर्यं [q]नभा कुक्षिमनुप्रविष्टं ।
प्रसूयते सा वर[r]लक्ष[s]णांगं
सो भवति राजा बलचक्रव[t]र्ति ॥८७॥
स्वप्नान्तरे या प्रमदा [u]ददर्श
चन्द्रं [v]नभा कुक्षिमनुप्रविष्टं ।
प्रसूयते सा नरदे[w]वगर्भं
सो भवति राजा वरचक्रवर्ती ॥८८॥
स्वप्नान्तरे या प्रमदा [x]ददर्श
श्वेतं गजं कुक्षिमनुप्रविष्टं ।
प्रसूयते सा गज[y]सत्त्व[z]सारं
सो भवति बुद्धो बुधिता[a]र्थधर्मो ॥८९॥

Sen. 210 [b]देवीं स पृच्छति । किं धरेसि । सा आह । च[c]क्र[d]वर्तिन्ति ।

कुक्षिं [a]प्रभासयन्तं कनकवपुं [b]प्रवरलक्षणसमंगिं ।
[c]धारेमि [d]चक्रवर्तिं वरपुरुषं राजशार्दूलं ॥६०॥

[e]देवा नभे भगवतो [f]घोषमुदीरयेन्सुः । बुद्धो [g]भविष्यति न राजा बल[h]चक्रवर्ती[i] । [j]महाब्रह्मा गाथां [k]भाषति ।

[l]गजं [m]रत्न[n]श्रेष्ठं मदनबल[o]वेगापनयनं
प्रदीपं लोकस्य तमतिमिरमोहापनयनं ।
गुणानां[p] कोषं त्वं अपरिमितरत्नाकरधरं
[q]धरेसि [r]राजर्षि अप्रतिहतचक्रं [s]अमररुचिं ॥६१॥

देवी आह ।

[t]यथा मम न रागदोषा प्रसहन्ति नरेन्द्रगर्भमुपलभ्य ।
निःसंशयं [u]भविष्यति समरुचि [v]यथ निश्चरति वाचा ॥६२॥

बोधिसत्वे खलु [w]पुनर्महामौद्गल्यायन मातुः कुक्षिगते [x]बोधिसत्वमाता सुखं गच्छति तिष्ठति [y]पि निषीदति पि शय्यामपि कल्पयति [z]बोधिसत्वस्यैव [a]तेजेन । शस्त्रं [b]काये न क्रमति न विषं नाग्निर्नाशनिः प्रसहति बोधिसत्वस्यैव तेजेन । बोधिसत्वे खलु [c]पुनर्महामौद्गल्यायन मातुः कुक्षिगते बोधिसत्वमातरं [d]देवकन्या दिव्येहि [e]उच्छादन-[f]परिमर्दनपरिष्कारेहि परिजागरन्ति । [g]दिव्य[h]वस्त्रसंवृतशरीरा दिव्याभरणधारिणा भवति बोधिसत्वस्यैव तेजेन । लाभिनी भवति दिव्यानां [i]गन्धानां दिव्यानां माल्यानां दिव्यानां विलेपनानां दिव्यानां [j]ओजानां बोधिसत्वस्यैव तेजेन । बोधिसत्वे खलु Sen. 211 [k]पुनर्महा[l]मौद्गल्यायन मातुः कुक्षिगते योऽस्या अभ्यन्तरपरिवारो सोऽस्या [m]अतीव शुश्रूषि-तव्यं [n]श्रोतव्यं मन्यति बोधिसत्वस्यैव तेजेन । [o]बोधिसत्वे खलु पुनर्महा[p]मौद्गल्यायन मातुः कुक्षिगते [q]बोधिसत्वमातरं ये पश्यन्ति ते [r]तामुपसंक्रमित्वा किंकरणीयकप्रति-[s]संयुक्तेहि व [t]निमन्त्रेन्ति बोधिसत्वस्यैव तेजेन । न किंचिदुपरिमेन [u]गच्छति

अन्तमशतो पक्षी पि बोधिसत्वस्यैव तेजेन। बोधिसत्वे[a] खलु पुनर्महामौद्गल्यायन[b] मातुः[c] कुक्षिगते बोधिसत्वमाता अल्पाबाधा भवति अल्पातंका। समाये विपाकनीय-[d]ग्रहणीये समन्वागता[e][f] नाप्यतिशीताये नाप्यतिउष्णाये सम्मापरिणामाये बोधिसत्वस्यैव तेजेन। बोधिसत्वे खलु पुनर्महामौद्गल्यायन[g] मातुः कुक्षिगते बोधिसत्वमाता लाभिनी प्रणीतानां खादनीयभोजनीयानामग्ररसानां प्रत्यग्ररसानां बोधिसत्वस्यैव तेजेन। बोधिसत्वे खलु पुनर्महामौद्गल्यायन मातुः कुक्षिगते बोधिसत्वमाता वीतरागा भवति। अखण्डमच्छिद्रमशबलमकल्माषं[h] परिशुद्धं परिपूर्णं ब्रह्मचर्यं चरति। मनसापि तस्याः प्रमोदोत्तमाया रागो[i] न उत्पद्यति[j] सर्वपुरुषेहि अन्तमसतो[k] राज्ञापि[l] अर्चिमता[m]। बोधिसत्वे खलु पुनर्महामौद्गल्यायन[n] मातुः कुक्षिगते बोधिसत्वमाता पञ्च शिक्षापदानि[o] समादाय वर्तते। तानि च[p] सपूर्वसमादिन्नानि भवन्ति[q]। बोधिसत्वे खलु पुनर्महामौद्गल्यायन[r] मातुः[s] कुक्षिगते यावता नागराजानो नागराजाधिपतयो अण्डजा वा [t]जरायुजा वा संस्वेदजा वा औपपादुका वा ते निवेशनमुपसंक्रमित्वा दिव्यानि चन्दनचूर्णानि प्रकिरन्ति। एवमगुरुचूर्णानि मुक्तकुसुमानि च प्रकिरेन्सुः[u] समाप्ताये[v] च नं[w] अर्चनाये अर्चयेन्सुः[x] परिपूर्णाये[y] च[z] नमर्चनाये अर्चयेन्सुः[a] परिशुद्धाये[b] च नमर्चनाये अर्चयेन्सुः[c]। ते दिव्यानि चन्दनचूर्णानि प्रकिरित्वा[d] केशरचूर्णानि[e] तमालपत्रचूर्णानि[f]
Sen. 212 मुक्तकुसुमानि प्रकिरेन्ति। समाप्ताये[g] नं अर्चनाये अर्चयेन्सुः[h] परिपूर्णाये[i] च नमर्चनाये अर्चयेन्सु[j] परिशुद्धाये[k] च नं अर्चनाये अर्चयेन्सुः। परिपूर्णाये अर्चनाये अर्चयित्वा परिशुद्धाये[l] अर्चनाये अर्चयित्वा दिव्येहि चन्दनचूर्णेहि प्रकिरित्वा दिव्येहि अगुरुचूर्णेहि केशरचूर्णेहि[m] तमालपत्रचूर्णेहि मुक्तकुसुमेहि ओकिरित्वा अध्योकिरित्वा[n] अभिप्रकिरित्वा बोधिसत्वमातां[o] त्रिखुत्तं[p] अभिप्रदक्षिणं कृत्वा येनकामं प्रक्रमिन्सुः[q] बोधिसत्वस्यैव तेजेन। बोधिसत्वे[r] खलु पुनर्महामौद्गल्यायन[s] मातुः कुक्षिगते यावता[t] सुवर्णराजानो सुवर्णाधिपतयो[u] अण्डजा वा जरायुजा वा संस्वेदजा वा उपपादुका वा ते निवेशनं

प्रविशित्वा दिव्यानि[a] चन्दनचूर्णानि प्रकिरन्ति दिव्यान्यनेकचूर्णानि प्रकिरन्ति दिव्यानि केशरचूर्णानि[b] प्रकिरन्ति दिव्यानि तमालपत्रचूर्णानि प्रकिरन्ति दिव्यानि कुसुमचूर्णानि प्रकिरन्ति । समाप्ताये[c] च नं अर्चनाये अर्चयेन्सु परिपूर्णाये च नं अर्चनाये अर्चयेन्सु परिशुद्धाये[d][e] च नं अर्चनाये अर्चयेन्सुः[f] । दिव्यानि चूर्णानि प्रकिरित्वा[g] अगुरुचूर्णानि केशरचूर्णानि तमालपत्रचूर्णानि प्रकिरित्वा दिव्यानि च मुक्तकुसुमानि प्रकिरित्वा बोधिसत्वमातां त्रिष्खुत्तं[h] प्रदक्षिणं[i] कृत्वा येनकामं प्रक्रमेन्सुः[j] बोधिसत्वस्यैव तेजेन । बोधिसत्वे खलु पुनर्महामौद्गल्यायन[k] मातुः कुक्षिगते बोधिसत्वमातां चतुर्महाराजकायिका देवाः[l] त्रायस्त्रिंशा यामा तुषिता निर्माणरतिपरनिर्मितवशवर्त्ती ब्रह्मकायिका शुद्धावासकायिका देवा तस्य निवेशनं प्रविशित्वा दिव्येहि चन्दनचूर्णेहि प्रकिरेन्सुः[m] दिव्येहि अगुरुचूर्णेहि[n] केशरचूर्णेहि तमालपत्रचूर्णेहि[o] दिव्येहि च मुक्तकुसुमेहि[p] प्रकिरेन्सुः[q] समाप्ताये[r] च नं अर्चनाये अर्चयेन्सुः[s] संपरिपूर्णाये च नमर्चनाये अर्चयेन्सुः परिशुद्धाये[t] च[u] Sen. 213
नं अर्चनाये अर्चयेन्सुः । ते दिव्येहि चन्दनचूर्णेहि ओकिरित्वा दिव्येहि अगुरुचूर्णेहि दिव्येहि केशरचूर्णेहि दिव्येहि तमालपत्रेहि[v] दिव्येहि मुक्तकुसमेहि[w] प्रकिरित्वा समाप्ताये[x] च नं अर्चनाये अर्चयित्वा परिपूर्णाये च नं अर्चनाये अर्चयित्वा[y] परिशुद्धाये[z] च नं अर्चनाये अर्चयित्वा बोधिसत्वमातां त्रिष्कृत्वो[a] प्रदक्षिणीकृत्य येनकामं प्रक्रमेन्सुः बोधिसत्वस्यैव तेजेन[b] ।

बोधिसत्वो[c] खलु पुनर्महामौद्गल्यायन[d][e] मातुः कुक्षिगतो[f] न चातिनीचं तिष्ठति[g] न चातिउच्चं[h] तिष्ठति[i] न च अवकुब्जको न[j] उत्तानको न वामपार्श्वे तिष्ठति न उत्कुटिको । अथ खलु मातुर्दक्षिणे[k] पार्श्वे पर्यङ्कमाभुंजित्वा[l] तिष्ठति । बोधिसत्वो[m] खलु पुनर्महामौद्गल्यायन मातुः कुक्षिगतो[n][o] न पित्तेन वा श्लेष्मेण[p] वा रुधिरेण वा अन्येन वा पुन[q] केनचिदशुचिनापरिशुद्धो तिष्ठति । अथ खलु[r] अच्छादितस्नापितविशदगात्रो

बोधिसत्वो मातुः कुक्षिस्मिं तिष्ठति। बोधिसत्वो खलु पुनर्महामौद्गल्यायन[a] मातुः कुक्षिगतो[b] मातरं पश्यति[c]। बोधिसत्वमातापि[d] कुक्षिगतं बोधिसत्वं पश्यति विग्रहमिव जातरूपस्य दृष्ट्वा च भवति आत्तमना [कुक्षिं[e] ओभासेन्तं[f] विग्रहमिव जातरूपस्य]। यथा[g] वेरुलियस्य मणि स्फाटिकसमुद्गस्मिं[h] निहितो अस्या[i] एवमेव[j] बोधिसत्वं पश्यति माता[k] कुक्षिमोभासेन्तं[l] विग्रहमिव जातरूपस्य।

Sen. 214 बोधिसत्वे खलु पुनर्महामौद्गल्यायन[m][n] मातुः कुक्षिगते देवसंघाः सुखरात्रिं सुखदिवसं पृच्छका आगच्छन्ति[o]। तां च बोधिसत्वो अभिनन्दति[p][q] दक्षिणकरमुत्क्षिप्य[r] मातरमबाधमानो[s]। बोधिसत्वं[t] खलु पुनर्महामौद्गल्यायन[u][v] मातुः कुक्षिगतं[w] देवा नागा यक्षा दानवा राक्षसा पिशाचा न जहन्ति दिवा[x] वा रात्रिं वा न चात्र[y] आसंगकथा कथीयति कामोपसंहिता[z] वा अन्या वा[a] असत्या कथा। नान्यत्र बोधिसत्ववर्णमेव[b] भाषन्ति[c] रूपतः सत्त्वतः तेजतः वर्णतः यशतः कुशलमूलतः। बोधिसत्वस्य[d] मातुः कुक्षिगतस्य पूजा[e] नोपरमति। दिव्यानि तूर्याणि[f] वाद्यन्ति दिव्यानि अगुरुधूपानि[g] धूपेन्ति दिव्यं पुष्पवर्षं[h] वर्षति दिव्यं चूर्णं वर्षति। अप्सरसहस्राणि च उपगायन्ति उपनृत्यन्ति पि। बोधिसत्वे खलु पुनर्महामौद्गल्यायन[i] मातुः कुक्षिगते[j] बोधिसत्वमातां[k] देवकन्यासहस्रेहि[l] सार्धं अभ्याभवति हास्यं च कथा[m] च। प्रसुप्तां[n] च पुनर्बोधिसत्वमातरं देवकन्या[o] मान्दारवदामेन परिवीजेन्ति[p] बोधिसत्वस्य तेजेन। अयं च पुनर्महामौद्गल्यायन[q][r] त्रिसाहस्रमहासहस्रायां लोकधातूयमनुत्तरा गर्भावक्रान्तिपारमिता।

अन्यं[s] च दानि पश्यथ आश्चर्यं[t] तस्या देवपर्षाये।
ताव विपुलाये[u] या कथा अभू परमहर्षसंजननी[v] ॥९३॥
न[w] च कामकथान्या वा नाप्यप्सरसां कथा न[x] गीतकथा[y]।
न[z] च वाद्यकथा[a] तेषां[b] न पि भुक्तकथा[c] न पानकथा[d] ॥९४॥

[a]नाभरणकथा [b]तेषां न पि [c]वस्त्रकथा [d]प्रवर्तति कदाचित् ।
[e]यानोद्यान[f]कथा वा मनसापि न जायते [g]तेषां ॥९५॥ Sen. 215
[h]साधू पुण्यबलवतो द्युती अनुपमा सदेवकं लोकं ।
[i]अभिभवति नायकस्य [j]विकसति एषा कथा [k]तत्र ॥९६॥
[l]साधुं [m]गर्भा[n]वक्रमणमनो[o]पमं रूपपारमिगतस्य ।
[p]इति विकसति बहुविधा कथा परिषामध्ये एतस्मि ॥९७॥
[q]साधूहि निरामिषेहि संज्ञापदेहि क्षपेन्ति तं [r]कालं ।
[s]वरबुद्धिनो [t]इयां अपि कथा विकसति परिषामध्ये ॥९८॥
[u]एवं च बहुप्रकारां कथां [v]कथेन्ता [w]रमन्ति देवगणा ।
रूपं [x]वर्णं तेजं बलं च विरजस्य कथयन्ता ॥९९॥

सर्वेषां बोधिसत्वानां मातरो परिपूर्णे दशमे मासे प्रसूयन्ति । दशमे मासे [y]पूर्णे सुदीपा नाम देवी राजानर्मचिमं आह । [z]देव अभिप्रायो मे पद्मवनं उद्यानं निर्गन्तुं । राजा देवीये सुदीपाये श्रुत्वा अमात्यानाह । पद्मवनमुद्यानं [a]सान्तःपुरो निष्क्रमिष्यामि क्रीडार्थमिति ।

[b]पद्मिनिवनं सुचपलं अपगत[c]तृणखण्डपत्रसंस्कारं ।
[d]वरसुरभि[e]कुसुमनिकरं करोथ [f]गन्धोदकसुगन्धं ॥१००॥
[g]पद्मिनिवने च वाता तमाल[h]पत्रगन्धवासितशरीरा ।
[i]सिञ्चन्तु [j]अमृतगन्धां [k]मद[l]जनना च पलायन्तु ॥१०१॥
[m]अगरु[n]वरधूपगर्भा [o]समोनमन्तु नभतो जलधरा तं ।
[p]पद्मिनिवनं छादेतुं वरचूर्णरसाकुलं क्षिप्रं ॥१०२॥
[q]एकैकं च द्रुमवरं [r,s]दुकूलपट्टोर्णकोशिका[t]रेहि । Sen. 216
[u]कल्प[v]यथ [w]कल्पवृक्षान् [x]यथ दिवि देवप्रधानस्य ॥१०३॥

देवा च दे[a]वकन्या च गन्धमाल्यां गृह्य पद्मिनिवनउद्यानमर्चिमतो आगच्छन्ति ।

स्फटिकम[b]णिकुण्डलधरा विगलितवसना प्रलम्बमणिहारा ।
आदाय गन्धमा[c]ल्यं गगनपथगता ओलीयन्ति ॥१०४॥
[d]मान्दार[e]वाण भरिता काचित्संगेरियो भरित्वान ।
हरिच[f]न्दनस्य काचित्काचि पुनः कल्पदु[g]ष्याणां ॥१०५॥
[h]स्थलजजलजं च माल्यं गृहीत्वा अप्सरा मुदितचित्ता ।
[i]रतना आभरणानि [j]च जम्बुद्वीपं अभिमुखीयो ॥१०६॥
चतुराशीतिमनूनं छत्रसह[k]स्राणि [l]देवक[m]न्यायो ।
कनक[n]रतनामयानि आ[o]दाय नभे प्रलीयन्ति ॥१०७॥
कूटागारशतेहि स्फटिकम[p]णिचित्रेहि लेपनलेपितैः ।
[q]भ[r]रितमपि अन्तरीक्षं दुष्यशतसमुच्छ्रितपताकं ॥१०८॥
[s]गजश्वसनसन्निकाशा शारदमेघा चाभिविरोचन्ति ।
[t]वरसुरभिकु[u]सुमगन्धा कमला[v]त्पलचम्पकविमिश्रा ॥१०९॥
भुजगपतिनो पि [w]मुदिता मेघेहि सुगन्धतोयभरि[x]तेहि ।
अभ्योकिरन्ति [y]गगणं अन्यानि च अद्भुतशतानि ॥११०॥

अथ महा[z]मौद्गल्यायन राजा अर्चिमो महता राजानुभावेन महता राज[a]ऋद्धिये महतीये विभूषाये सा[b]न्तःपुरो पद्मिनीवनमु[c]द्यानं निर्यासि ।

Sen. 217 [d]अवगाह्य तं वनवरं देवी [e]सखिपरिवृता जिनजनेत्री ।
विचरति चित्रर[f]थे देवी अमर[g]वधु यथा रतिविधिज्ञा ॥१११॥

अथ महा[h]मौद्गल्यायन सुदीपा [i]देवी सखीहि संपरिवृता [j]पद्मिनीये [k]पुरिमपश्चि[l]म-वेदिहि विततवितानेहि विचित्रदुष्यपरिक्षिप्तेहि ओसक्तपट्टदामकला[m]पेहि लेप[n]नलेपितेहि

धूपनधूपितेहि मुक्तपुष्पावकीर्णेहि वेदिकाजालसंप्रतिक्षिप्तेहि उच्छ्रितच्छत्रध्वजपताकेहि नावायानेहि [a]प्रक्रीडिता । अथ सुदीपाये देवीये [b]नावायानेन [c]कड्ढीय[d]न्तिये किल [e]चित्तं उत्पन्नं । नावातो ओतरिष्यामीति । [f]बोधिसत्वानुभावेन च [g]मध्ये तडागस्य द्वीपो प्रादुर्भूतो [h]समो अविषमो सुवर्णवालिकासंस्तृतो तृणानि च जातानि मृदूनि नीलानि तूलसंस्पर्शोपमानि मयूरग्रीवासन्निकाशानि [i]चतुरङ्गुलं पृथिवीतो [j]निक्षिप्ते पदे [k][l]ओनमन्ति वृक्षाणि चात्र [m]प्रादूर्भूतानि [n]फलोपेतानि सुमनोज्ञानि । [o]देवी तम्हि द्वीपे प्रतिष्ठिता । न खलु [p]पुनर्महामौद्गल्यायन [q]बोधिसत्वमाता शयाना निषण्णिका वा बोधिसत्वं जनेति । न खलु [r]महामौद्गल्यायन [s]बोधिसत्वमाता बोधिसत्वं पित्तेन वा श्लेष्मेण वा रुधिरेण वा अन्यतरान्यतरेण वा अशुचिनापरिशुद्धं [t]जनेति अथ [u]खलु [v]उच्छादितस्नापितविशदगात्रं [w]येव बोधिसत्वं जनेति ।

[x]सा [y]परिकिलन्तकाया [z]द्रुमस्य शाखां भुजाय [a]अवलम्ब्य ।
[b]प्रविजृम्भिता सलीला तस्य यशवतो जननकाले ॥११२॥
अथ [c]विंशति सहस्रा [d]मरुकन्या [e]आशुरेव [f][g]सन्निपतिता ।
[h]देवीं कृतांजलिपुटाः इदमवच [i]प्रसन्नसंकल्पाः ॥११३॥ Sen. 218
अद्य [j]जराव्याधिमथनं जनयिष्यसि अमरगर्भसुकुमारं ।
[k]देवी दिवि [l]भुवि महितं हितं हितकरं नरमरूणां ॥११४॥
मा खु [m]जनयी विषादं परिकर्म वयं तवं करिष्यामः ।
[n]यं कतव्यमुदीरय दृश्यतु कृतमेव तत्सर्वं ॥११५॥
[o]अथ चतुरि लोकपाला [p]सपरिवारा आशुरेव [q]सन्निपतिता ।
[r]दिव्यप्रवेणिहस्ता [s]देविमुपगता [t]प्रदक्षिणतो ॥११६॥
सर्वे पि देवसंघा देवीं [u]परिवारयित्व आकाशे ।
स्थिता माल्यगन्धहस्ता [v]सपरिवारेणो[w]पशोभन्ति ॥११७॥

बोधिसत्वी[a] स्मृतो[b] संप्रजानो मातरमबाधमानो दक्षिणेन पार्श्वेन प्रादुर्भवति ।

दक्षिणेन[c] हि पार्श्वेन जायन्ते पुरुषोत्तमाः ।
सर्वे[d] पुरुषशार्दूला[e] भवन्त्यत्रविहारिणः[f] ॥११८॥
किं तं न भिद्यते पार्श्वं तस्या[g] जिनजनेत्रिये[h] ।
जनेन्तिये[i] नरश्रेष्ठं[j] वेदना[k] च[l] न जायति ॥११९॥
मनोमयेन[m] रूपेण प्रादुर्भोन्ति तथागता ।
एवं[n] न भिद्यते पार्श्वं[o] वेदना च न जायते ॥१२०॥
गर्भावासपरिश्रान्तो[p] सप्तधा[q] विक्रमते भुवि ।
दिशां च प्रविलोकेति[r] महाहासं च ऊहति ॥१२१॥
अत्र किं[s] कारणमुक्तं[t] यं सप्त क्रमते क्रमान् ।
न च अष्ट न च षष्ठि अत्र आगमनं श्रृणु ॥१२२॥
Sen. 219 गर्भावासपरिश्रान्तो[u] सर्वलोकहितो मुनिः[v] ।
पश्चिमो गर्भावासो[w] यं अथ वेगेन प्रक्रमि ॥१२३॥
भूमौ[x] सप्तक्रमे न्यस्ते देवसंघा निलीयथ[y] ।
सहसा[z] लोकपालानामंकेहि[a] धरितो मुनिः ॥१२४॥
अथ[b] वर्षं समुत्पद्यि दिव्यकुसुमशीकरः[c] ।
मन्दारवरजाकीर्णं[d] दिव्यचन्दनसंकुलं ॥१२५॥
दीर्घकालं[e] उदग्राश्च[f] सुरमुख्याग्रधूपनं[g] ।
प्रमुंचिषु[h] विभूषार्थं[i] तस्य[j] उत्तमबुद्धिनः ॥१२६॥
यदर्थंश्च विलोकेति दिशां[k] अप्रतिपुद्गलः[l] ।
तत्राहमागमं[m] वक्ष्ये[n] उपदेशं मनोरमं ॥१२७॥

न सो [a]विद्यति [b]सत्वानां देवेषु मनुजेषु च ।
[c]यस्यैवं [d]संभवो भवेत् [e]गर्भोक्रमणमेव च ॥१२८॥
[f]खद्योतकनक[g]निर्भासं पार्श्वं जिनजनेत्रिये ।
जायते [h]यदा [i]सर्वज्ञः जायन्तो चरमे भवे ॥१२९॥
जातमात्र[j]स्य तच्चित्तं अभूत्प्रवरवादिनो ।
[k]अस्ति कश्चित्सम[l]बुद्धि मे च्चेतं तर्कं निर्वर्तितुं ॥१३०॥
[m]केचित्संसार[n]पाशेन अर्त्तियन्ते यथा अहं ।
[o]इत्यर्थं पुरुषा[p]दित्यो दिशां सर्वां निरीक्षति ॥१३१॥
अथ दिशा विलोकेन्तो [q]पश्यति वदतां वरो ।
देवकोटिसहस्राणि [r]तस्मात् हासं प्रमुंचति ॥१३२॥
तं जात[s]मात्रमित्याहु देवता मारका[t]यिका । Sen. 220
चातुर्द्वीपो महाकोशो [u]चक्रवर्ती भविष्यसि ॥१३३॥
अथास्य हासो [v]संभवति न मम सत्वाभिजानथ ।
सर्वज्ञो सर्वदर्शी च भविष्यं पुरुषोत्तमः ॥१३४॥
एवमेतं [w]प्रशंसन्ति [x]विशेषा उप[y]देशकाः ।
तथा हि नरसिंहानां [z]शासनं संप्रकाशितं ॥१३५॥
[a]यं तिष्ठन्ती जनये वीरं [b]संकुसुमितेषु शालेषु ।
[c]शरीरमवलम्ब्यमाना तं अनति[d]वरं जिनं वन्दे ॥१३६॥
संप्रति[e]जातो सुगतो समेहि पदेहि [f]धर्रणि अवतिष्ठेत् ।
सप्त च [g]पदानि अगमा सर्वां च दिशां विलोकेसि ॥१३७॥
[h]तं सामं चंक्रमन्तमन्वागमि [i]वीजनं च [j]च्छत्रं [k]च ।
मा वरविदुनो काये दंशा मशका च निपतेन्सुः ॥१३८॥

संप्रतिजातं [a]सुगतं देवा प्रथमं [b]जिनं प्रतिगृह्णे ।
पश्चाच्च तं [c]मनुष्याः [d]अनतिवरं अङ्के धारेन्सुः ॥१३९॥
[e]प्रत्यग्रहेन्सु [f]देवाः सुगतं [g]द्वात्रिंशलक्षणप्रदर्शि ।
पश्चाच्च तं [h]मनुष्या [i]अनतिवरं अंके धारेन्सुः ॥१४०॥
निर्वायेन्सु प्रदीपा [j]मानुषका ओभाषितभूल्लोकं ।
संप्रतिजाते सुगते [k]उल्काधारे नरमरूणां ॥१४१॥
संप्रतिजाते सुगते [l]ज्ञाती उदकार्थिका [m]प्रधाविन्सुः ।
अथ पुरतो [n]उदु[o]पाना पूरा मुखतो विष्यन्देन्सु ॥१४२॥
Sen. 221 द्वि वारिधारा उद्गमि [p]एका शीतस्य एका [q]उष्णस्य ।
यत्र [r]स्नपयेन्सु सुगतं विग्रहं इव [s]जातरूपस्य ॥१४३॥

संप्रतिजाते सुगते [t]बोधिसत्वमाता अक्षता चैव अभूषि अव्रणा च बोधिसत्वस्यैव तेजेन। सम्प्रतिजाते खलु [u]पुनर्म[v]हामौद्गल्यायन बोधि[w]सत्वे बोधिसत्वमातुः [x]कुक्षि प्रतिपूर्णा [y]येव अभूषि [z]अनारब्धा च बोधिसत्वस्यैव [a]तेजेन। संप्रति[b]जाते खलु पुनर्महा[c]मौद्गल्यायन बोधिसत्वे अन्तरद्वीपे चन्दनवनं [d]प्रादुर्भवे बोधिसत्वस्य उपभोगपरिभोगमागच्छे बोधिसत्वस्यैव तेजेन। तत्र देवपुत्रशतसहस्राणि सह [e]गच्छन्ति गन्धमाल्यहस्ता बोधिसत्वस्य [f]पूजार्थं। देवपुत्रो देवपुत्रं पृच्छति कहिं गमिष्यसीति। सो तानाह।

[g]एषा [h]प्रसूष्यति [i]नरेन्द्रवधूत्तमं तं
वत्सं [j]विबुद्धवरपुष्करगर्भगौरं ।
[k]यो प्राप्स्यते धरणिमण्डगतोत्तमार्थं
मारं [l]निहत्य सबलं [m]तमुपेमि वीरं ॥१४४॥
[n]अम्रक्षिता गर्भमलेन [o]गात्रा
जातं जले पंकजमुत्तमं वा ।

[a]वपुष्मतो [b]बालरविप्रकाशो
सब्रह्मकानमरानभिभोति ॥१४५॥
ततो [c]जातमात्रो [d]कुले अर्चिमस्य
अतिक्रम्य धीरो पदानीह [e][f]सप्त ।
[g]समोलोकयित्वा दिशां ऊहसासि
अयं दानिमेको भवो [h]पश्चिमो ति ॥१४६॥
ततश्च [i]च्छत्रं एकं विभ्राजमानं Sen. 222
मणीमुक्तश्रेष्ठं पराभाविभ्राजं ।
विधूतेन दामेन [j]मन्दारवाणां
बहू [k]देवपुत्रा [l]नभे धारयेन्सुः ॥१४७॥
[m]सबालार्कशंखप्रतीकाशवर्णं
वरं हेमच्छत्रं नभे धारयेन्सुः ।
ततो [n]वीजनीयो विसृष्टा भ्रमेन्सुः
करेण गृहीत्वा [o]जिनं [p]वीजयेन्सुः ॥१४८॥
ततो [q]पुण्यगन्धा सुखोष्णा प्रभूता
लहुं [r]प्रेमणीया हिता मानुषाणां ।
[s]शिवा नन्दनीया तुषारानुबद्धा
दुवे वारिधारा नभे उद्गतासुः ॥१४९॥
ततो [t]मेरुश्रृङ्गादनेकप्रकारा
[u]प्रमुक्तोत्तरीया समन्तोर्मिजाता ।
भृशं विश्वगन्धाधिवासानुवाता
दृढ़ं [v]षड्विकारं महीं कम्पयेन्सुः ॥१५०॥

सुवर्णस्य [a]रूप्यमणीनां शुभाना
विमानेषु [b]देवा सतूर्याविघुष्टा ।
[c]सुजातानुजातं [d]जिनं [e]प्रेक्षमाणा
सचन्द्रार्कतारं नभं शोभयेन्सुः ॥१५१॥
[f]अयं सो [g]सदेवं [h]सनागं [i]सयक्षं
Sen. 223 महोघं महर्षी जगं उत्तरित्वा ।
ततः क्षेममेकां [j]दिशं प्राप्स्यतीति
प्रहृष्टास्य देवा नभे व्याहरेन्सुः ॥१५२॥

राजा अर्चिमो [k]आणापेसि । कुमारं [l]इमाये व देवीये पादवन्दनं नेथ । कीदृशेन यानेन [m]कुमारो अभिनिषीदतीति । देवेहि [n]रतनामयी शिविका निर्मिता । को इमां शिविकां वहिष्यतीति । चत्वारो महाराजा [o]उपस्थिता । [p]वयं सत्वसारं वहिष्याम बोधिसत्वं सुदीपां च [q]देवीं धात्रीं च बोधिसत्वस्य । शिविकामारूढा [r]शक्रो च देवानामिन्द्रो महाब्रह्मा च [s]उत्सारणं [t]करोन्ति । एवं बोधिसत्वो [u]महतीये विभूषाये महतीये समृद्धीये महतीये देवऋद्धीये महतीये राजऋद्धीये पद्मिनीवनातो उद्यानातो दीपवतीं राजधानीं [v]प्रवेशीय[w]ति देवीये कलमुपनीतः ।

नरो चेतियेषु [x]प्रविष्टो अकामो
महालोकनाथो नरेन्द्राण शास्ता ।
यदा [y]उत्तमांगेन [z]वन्दापयेन्सुः
ततो अस्य पादानि [a]प्रादुर्भवेन्सुः ॥१५३॥
ततो [b]देवता देवतां इत्यवोचत्
न एषोऽनुरूपो ममं वन्दमानो ।

प्रणामं च एषो यद्यन्यस्य कुर्यात्
दृढं स[a]प्तधा अस्य मू[b]र्ध्न फलेया इति ॥१५४॥

जातमात्रे कु[c]मारेऽर्थ[d]सिद्धी सुखी सर्वे सत्वा अभूद्याव[e]दवीचिं। प्रणामं च कुर्वी देवाः। तस्य स[f]व प्रहृष्टाः।

राजकुलं च कु[g]मारे प्रविष्टे उवाच पुरोहितं नृ[h]पतिः। Sen. 224
लक्षणवि[i]धिगुणकुशलां विप्रान् पर्येषथ शीघ्रं ॥१५५॥
तं विज्ञाय च देवा महेश्वरा नाम चित्तवशवर्ती[j]।
मा [k]लक्षणा अकुशला विकल्पयिष्यन्ति [l]द्विजसंघा ॥१५६॥
[m]विगतमदमानदर्पाः अष्ट सहस्रा महेश्वरवराणां।
देवगणेहि गुरुकृतं संप्रति[n]जातं उपगमे[o]न्सुः ॥१५७॥
ते राजकुलद्वारे शुचिवसनवर[p]स्थिता स्तिमितशब्दा।
प्रतिहारर[q]क्षमब्र[r]वीत् सुमधुरकरविंकरुतघोषाः ॥१५८॥
राजवरं उपग[s]म्य ब्रूवीहि इमे लक्षणगुणविधिज्ञाः।
तिष्ठन्ति अष्टसहस्रं प्रवि[t]शेन्सुः यदि अनुमतन्ते ॥१५९॥
साधूति प्रतिश्रुत्वा [u]प्रतिहाररक्षो प्रविश्य राजकुलं।
[v]अब्रवीत्कृतांजलिपुटो प्रीतिमनसो पृथिवीपा[w]लं ॥१६०॥
[x]अतुलबल [y]दीप्तयशसा का[z]रय राज्यं चिरं निहतशत्रुः।
द्वारे ते अमरसदृशास्तिष्ठन्ति प्रवेष्टुमि[a]च्छन्ति ॥१६१॥
प्रतिपूर्णविमलनयना मधुरस्वरमत्तवारणविचारी।
[b]भवति मम [c]तेषु सं[d]का न ते मनुजा देवपुत्रा ते ॥१६२॥
[e]परिचंक्रमतां तेषां धरणिरजो क्रमवरा न संकिरति।
[f]न च सान पश्यामि पदं पृथिव्यामिदं अपि आश्च[g]र्यं ॥१६३॥

[a]गम्भीरस्तिमितचेष्टा आर्याकारा प्रशान्तदृष्टिपथा ।
[b]विपुलां जनेन्ति प्रीतिं जनस्य समुदीक्षमानस्य ॥१६४॥
[c]अन्यं च [d]दानि अद्भुतं शरीरच्छाया न दृश्यते तेषां ।
Sen. 225 न च [e]तेषु सन्धिशब्दो चंक्रमतां श्रूयते कश्चित् ॥१६५॥
निःसंशयं उपगता पुत्रवरं तव नरवराधिप [f]द्रष्टुं ।
[g]अभि[h]नन्द्य च अभिवन्द्य च [i]पश्यासि अयोनिजां देवां ॥१६६॥
वरमाल्यगन्धहस्ता लीला[j]चेष्टा मनोरमशरीरा ।
[k]दीप्यन्ता इव शिरिये असंशयं प्रवरमरुतस्ते ॥१६७॥
तं अर्चिमो निशाम्य वचनमिदं हर्षकम्पितशरीरो ।
अब्र[l]वीद्भ्रणे सुचपलं प्रविशन्तु निवेशनमुदारं ॥१६८॥
किं [m]कारणं न एदृशाः प्राकृतपुरुषाण भोन्ति आकाराः
[n]न पि मा[o]नुषाण [p]एदृशी ऋद्धि भवति यादृशीं भणसि ॥१६९॥
अथ सो प्रतिहाररक्षो उपगम्य [q]महेश्वरानिदमवोचत् ।
[r]प्रह्वो कृतांजलिपुटो प्रणम्य हृष्टो मुदितचित्तो ॥१७०॥
[s]अभिनन्दते नरपतिः प्रविशन्तु भवन्तो [t]देवपुरकल्पं ।
राजवृ[u]षभस्य वेश्मं नराधिपतिना अनुज्ञाताः ॥१७१॥
[v]एतं श्रुत्वा [w]वचनं अष्टसहस्रं महेश्वरव[x]राणां ।
प्रविशन्ति पार्थि[y]वकुलं अनिहतकुल[z]वंशमुख्यस्य ॥१७२॥
[a]अथ अर्चिमो पि राजा महेश्वरां दूरतो [b]निशामेत्वा ।
[c]प्रत्युत्थितो सप[d]रिवारो गौरवबलभावितशरीरो ॥१७३॥
[e]तानवच राजवृषभो स्वागतमनुरागतं वः सर्वेषां ।
प्रीतोऽस्मि दर्शनेन [f]प्रशमदमबलेन च भवतां ॥१७४॥

[a]संविद्यन्ते इमानि अस्माकं आसनप्रधानानि ।
आस्तां [b]ताव भवन्तो अस्माकमनु[c]ग्रहार्थाय ॥१७५॥
[d]अथ ते तेष्वासनेषु बहुरतनविशुद्धचित्रपादेषु ।
[e]विगतमदमानदर्पा निषीदिं अनवद्यकर्[f]मान्ताः ॥१७६॥ Sen. 226
[g]ते कंचिदेव कालं आगमयित्वा नराधिपमवोचत् ।
[h]शृण्वतु [i]भवां [j]प्रयोजनं यं अस्माकमिह [k]गमनाये ॥१७७॥
[l]सर्वानवद्यगात्रः [m]उत्पन्नो लोकसुन्दरो [n]तुह्यं ।
पुत्रो किल [o]मनुजपते लक्षणगुण[p]पारमीप्राप्तो ॥१७८॥
[q]वयमपि लक्षणकुशलाः समर्था गुणदोषलक्षणं ज्ञातुं ।
यदि न गुरुत्वं भवतो [r]पश्येम महापुरुषरूपं ॥१७९॥
[s]सो अवच हंत पश्यथ [t]सुव्यपदेशक्षेमं मम पुत्रं ।
मरुमनुजह[u]र्षजननं लक्षणगुणपा[v]रमिप्राप्तं ॥१८०॥
[w]अथ स [x]मृदु[y]काचिलिन्दिकप्रवेणियं [z]गुणधरं [a]ग्रहेत्वान ।
अंकेन [b]वादिचद्रं उपनामयति सुरवराणां ॥१८१॥
आलो[c]कयित्व दूरात् महेश्वराः वरक्रमान्दशबलस्य ।
[d]मूर्धनि विगलितमुकुटा निपतेन्सु महीतले [e]हृष्टा ॥१८२॥

ते दानि राजानमारो[f]चेन्ति । [g]लाभा ते महाराज सुलब्धा यस्य ते यं महापुरुषो कुले उत्पन्नो द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतो ।

[h]तद्यथा ।

[i]समा हेष्टा च दीर्घा च आयता च उच्छंग [j]पंचमा ।
एणि [k]बृहच्च तिष्ठन्तो कोश न्यग्रोध ते दशा ।।१८३।।

मृदु [a]जाला च प्रतिपूर्णा [b]एका ऊर्ध्वाग्र पंचमा ।
[c]श्लक्ष्णच्छवि हंसान्तरा च उत्सदा च [d]ते दश ॥१८४॥
Sen. 227 [e]रसं सुवर्ण सीहो च [f]समा शुक्ला च पंचमा ।
समा [g][h]प्रभूता ब्रह्मा च नीला गोपक्ष्म ते दश ।
ऊर्णा [i]उष्णीषशीर्षं च [j]नाथो द्वात्रिंशलक्षणो ॥१८५॥

ते दानि ब्राह्मणा [k]राज्ञा अर्चिमेन उच्यन्ति । यं कुमारस्य नामं अनुरूपं तं करोथ । ते ब्राह्मणा [l]आहन्सु । महाराज [m]कुमारे [n]जायमाने [o]दीपो प्रादुर्भूतो [p]महां ओभासो तस्मात् कुमारो दीपंकरो नाम भवतु । एवं कुमारस्य शुद्धावासेहि देवेहि [q]ब्राह्मणवेशं निर्मिणित्वा दीपंकरो ति नाम कृतं ।

तस्य सदृशीयो धात्रीयो कुमारं [r]उपस्थिहन्ति संवर्धयन्ति । यदा च बोधिसत्वो यौवनप्राप्तो राज्ञा त्रयो [s]प्रासादा कारिता कुमारस्य क्रीडार्थं परिचारार्थं विस्तीर्णं च अन्तःपुरं [t]उपस्थापितं । बोधिसत्वो महता राजानुभावेन महता [u]राजऋद्धीये महता [v]राजविभूषाये [w]सान्तःपुरो [x]पद्मिनीवनमुद्यानभूमिं निर्गतो [y]क्रीडार्थं । राज्ञा अर्चिमेनान्तःपुरमाणत्तं । [z]सुष्ठु कुमारं [a]क्रीडापेथ । बोधिसत्वो नावायानेहि [b]पुरिमपश्चिमवेदिहि वेदिकाजालेहि वेदिकाजालपरिक्षिप्तेहि विततवितानेहि चित्रदुष्यपरिक्षिप्तेहि [c]ओसक्त-[d]पट्टदामकलापेहि धूपनधूपितेहि मुक्तपुष्पावकीर्णेहि हारार्धहारचन्द्रसुचित्रेहि उच्छ्रित-[e]च्छत्रध्वजपताकेहि नावायानेहि निष्पुरुषे तटे ओतरति । [f]किलान्तं अन्तःपुरमासुप्तं कान्चि हनुकामुपग्रहियाण [g]काचित्पणदमुपगुह्य काचिद्वेणुं काचिद्वीणां [h]काचिद्वल्लकीं [i]काचित्सुघोषकीं [j]काचिन्नूपुरं काचित् [k]मृदंगं काचिल्लालाघरन्ति । बोधिसत्वस्य तां [l]दृष्ट्वा [m]श्मशानसंज्ञा प्रादुर्भूता । [n]मध्ये [o]पुष्करणीये पद्मं [p]प्रादुर्भूतं [q]रथचक्रमात्राहि
Sen. 228 कर्णिकाहि अपरेहि पद्मसहस्रेहि [r]अनुपरिवारितं । [s]बोधिसत्वो तत्पदुमे पर्यङ्केन

निषण्णो[a] तं च पद्मं[b] संकुचितं[c] कूटागारे संस्थितं। बोधिसत्वस्य सर्वं[d] गृहिलिंगमन्तर्हितं[e] काषायाणि[f] प्रादुर्भूतानि[g]।

अथ खलु महामौद्गल्यायन[h] दीपंकरो[i] बोधिसत्वो विविक्तं कामेहि विविक्तं पापकैरकुशलैर्धर्मैः[j] सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य[k] विहरेसि। सवितर्कविचाराणां[l] व्युपसमादध्यात्मसंप्रसादाच्चेतसः[m] एकोतीभावादवितर्कमविचारं[n] समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसंपद्य विहरेसि। स[o] प्रीतेर्विरागादुपेक्षकश्च विहरति स्मृतः[p] संप्रजानं सुखं च कायेन प्रतिसंवेदयति। यत्तं आर्या आचक्षते उपेक्षकः[q] स्मृतिमां सुखविहारी[r] निष्प्रीतिकं तृतीयं ध्यानमुपसंपद्य[s] विहरति। सुखस्य च प्रहाणा[t] दुःखस्य च प्रहाणात्पूर्वं[u] च सौमनस्यदौर्मनस्ययोरस्तंगमात् अदुःखासुखमुपेक्षास्मृतिपरिशुद्धं[v] चतुर्थं ध्यानमुपसंपद्य विहरेसि। सो तथा[w] समाहितेन चित्तेन परिशुद्धेन पर्यवदातेन अनंगणेन[x] विगतोपकिलेशेन[y][z] मृदुना कर्मण्येन[a] स्थितेनानिज्यप्राप्तेन रात्रीये पुरिमे यामे दिव्यचक्षुदर्शनप्रतिलाभाय[b] चित्तमभिनिर्हरेसि निर्णामेसि[c]।

सो दिव्येन चक्षुषा सत्वान्पश्यति[d] च्यवन्तां[e] उपपद्यन्तां सुवर्णां दुर्वर्णां[f] सुगतां दुर्गतान् यथाकर्मोपगान् सत्वान् प्रजानाति। सो तथा समाहितेन चित्तेन[g] परिशुद्धेन पर्यवदातेन अनंगणेन विगतोपक्लेशेन[h] मृदुना कर्मण्येन स्थितेनानिज्यप्राप्तेन रात्रीये मध्यमे यामे अनेकविधं पूर्वनिवासं समनुस्मरेत्। सय्यथीदं[i] एकां[j] वा जातिं द्वौ वा जातिं त्रयो वा जातिं[k] चत्वारि वा जातिं पंच वा जातिं दश[l] वा विंशद्वा त्रिंशच्चत्वारिंशं[m] वा पंचाशं वा जातीशतं[n] वा जातीसहस्रं वा अनेकानि च जातीशतानि अनेकानि Sen. 229
जातीसहस्राणि अनेकान्यपि जातीशतसहस्राणि संवर्तकल्पां[o] वा विवर्तकल्पां[p] वा संवर्तविवर्तकल्पां[q] वा अनेकां पि संवर्तां अनेकां पि विवर्तां[r] अनेका पि संवर्तविवर्तानि कल्पानि। अमुत्राहं आसिं[s] एवंनामो एवंगोत्रो एवंजात्यो[t] एवमाहारो एवमायुःपर्यन्तो

एवंसुखदुःखप्रतिसंवेदी इति साकारं सो[a]द्देशं अनेकविधं पूर्व[b]निवासं समनुस्मरति। सो तथा समाहितेन चित्तेन परिशुद्धेन पर्यवदातेन [c]अनंगणेन [d]विगतोपकिलेशेन स्थितेना[e]निंज्यप्राप्तेन रात्रीये पश्चिमे यामे नन्दीमुखायां रजन्यां अ[f]रुणोपघाटकाल[g]समये यत्किञ्चि[h]त्पुरुषनागेन पुरुषसिंहेन पुरु[i]षर्षभेण पुरुषपदुमेन पुरु[j]षपुण्डरीकेण पुरुषधौरेयेण पुरुषेण सत्पुरुषेण पुरुषाजानेयेन अनु[k]त्तरेण पुरुषद[l]म्यसारथिना गतिमेन स्मृतिमेन धृतिमेन मतिमेन सर्वशो सर्वत्रताये ज्ञा[m]तव्यं प्राप्तव्यं बो[n]द्धव्यं अभिसंबोद्धव्यं सर्व[o]न्तमेक-[p]चित्तक्षणसमायुक्तया प्रज्ञया अनु[q]त्तरां सम्यक्संबोधिमभिसंबुद्धो।

इयं च महापृथिवी षड्विकारं कम्पे संप्रकम्पे [r]भूम्या च देवा घोषमुदीरये[s]न्सुः शब्दं[t] नभे श्राव[u]येन्सु। एष मारिष [v]भगवां दीपंकरो अनुत्तरां सम्य[w]क्संबोधिमभिसंबुद्धो [x]भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपाय म[y]हतो जनकायस्यार्थाय हिताय सुखाय देवानां च म[z]नुष्याणां च। भूम्यानां देवानां घोषं श्रुत्वा अन्तरीक्षेचरा [a]देवा त्रायस्त्रिंशा यामा तुषिता निर्माणरतयः [b]परनिर्मित[c]वशवर्तिन इति तत्क्षणन्तन्मुहूर्तं यावद्[d]ब्रह्मकायं घोषमभ्युद्गच्छेत्। एष मारिष [e]भगवां दीपंकरो सम्यक्[f]संबुद्धो भविष्यति तं भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकाय-स्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च। अप्रमेयस्य [g]उदारस्य महतोऽवभासस्य लोके प्रादुर्भावो अभूषि। [h]यावता लोके लोकान्तरिका अन्धकारा अन्धकार[i]ार्पिता
Sen. 230 तमिस्रा तमसार्पिता अघा अघसं[j]भूतपूर्वा यत्र इमे पि चन्द्रमसूर्या एवं म[k]हर्द्धिका एवं म[l]हा[m]नुभावा आभया आभां नाभिसंभुणन्ति आलोकेन वा आलोकं न स्फरन्ति ते पि तेन [n]ओभासेन स्फुटा [o]अभून्सुः। ये पि तत्र सत्वा उप[p]पन्ना ते पि अन्यमन्यं संजानेन्सुः अन्ये पि किल इह भो सत्वा उपपन्ना अन्ये पि किल भो सत्वा उपपन्ना अन्ये पि किल भो सत्वा उपपन्नाः। एकान्तसुखसम[q]र्पिता च पुनस्तत्क्षणं [r]तं मुहूर्तं [s]सर्वे सत्वा [t]अभून्सु। ये पि अवीचे महानरके उप[u]पन्ना अतिक्रमे व देवानां देवानुभावं नागानां

नागानुभावं यक्षाणां यक्षानुभावं[a]। [b]ध्यामानि च अभून्सुः मारभवनानि निष्प्रभाणि निस्तेजानि निरभिरम्याणि। [c]क्रोशिकान्यपि तत्र खण्डानि प्रपतेन्सु[d] द्विक्रोशिकान्यपि तत्र खण्डानि प्रपतेन्सु[e] त्रिक्रोशिकान्यपि तत्र खण्डानि प्रपतेन्सु[f] योजनिकान्यपि तत्र खण्डानि प्रपतेन्सु[g] ध्वजाग्राण्यपि[h] प्रपतेन्सु। मारो च पापीमां[i] दुःखी दुर्मनो विप्रतिसारी [j]अन्तोशल्यपरिदाघजातो[k] अभूषि।

तत्रैव[l] च मौद्गल्यायन[m] पद्मकूटागारे[n] भगवां दीपंकरो चतुर्हि महाराजेहि शक्रेण च देवानामिन्द्रेण सुयामेन[o] च देवपुत्रेण संतुषितेन[p] च देवपुत्रेण वशवर्तिना[q] च देवपुत्रेण महाब्रह्मणा च अनेकदेवसंघपरिवारेहि[r] संवृतो। भगवतो दीपंकरस्य उदारा[s] पूजा कृता। दिव्येहि मन्दारवेहि कुसुमेहि महामन्दारवेहि कर्णिकारेहि[t] रोचमानेहि[u] भीष्मेहि महाभीष्मेहि समन्तगन्धेहि महासमन्तगन्धेहि चन्दनचूर्णेहि अगुरुचूर्णेहि केशरचूर्णेहि [v]तमालपत्रचूर्णेहि भगवन्तं दीपंकरं[w] ओकिरित्वा प्रकिरित्वा अभिप्रकिरित्वा दिव्येहि तूर्यसहस्रेहि संपूजयित्वा तत्रैव[x] महाब्रह्मणा[y] याचितो अनुत्तरं धर्मचक्रं प्रवर्तनाय[z]। अधिवासयति महामौद्गल्यायन[a] भगवां दीपंकरो महाब्रह्मणो[b][c] तुष्णीभावेन। देवा [d]अधिवासनां विदित्वा[e] हृष्टा तुष्टा आत्तमना प्रमुदितप्रीतिसौमनस्यजाता भगवतो Sen. 231 दीपंकरस्य पादां शिरसा वन्दित्वा त्रिष्कृत्यो[f] प्रदक्षिणीकृत्वा तत्रैवान्तर्हायेन्सु।

भगवान् तस्यैव[g] रात्र्या[h] अत्ययेन प्रतिसंलयनाद्व्युत्थाय[i] जनपदेषु चारिकां प्रक्रमेत्।

[j]आदित्यो वरवर्णो बालो अभ्युद्गतो[k] यथाकाशे[l]।
योजनशतं प्रभाये दीपंकरो[m] भरित्व[n] अस्थासि॥१८६॥

[o]भगवां दीपंकरो चारिकां चरमाणो महतो[p] जनकायस्य देवानां[q] मनुष्याणां च अर्थचर्यां चरमाणो अशीतिहि भिक्षुसहस्रेहि सार्धं दीपवतीं राजधानीं आगच्छति पितुः[r] अर्चिमतो ज्ञातीनां च अनुकम्पार्थं। [s]राज्ञा अर्चिमेन श्रुतं। भगवां दीपंकरो

अशीतिहि भिक्षुसहस्रेहि सार्धं[a] दीपवतीं राजधानीं आगच्छति ज्ञातीनामनुकम्पायेति । ते[b] च यावद्दीपवती याव[c] च पद्मिनीवनमुद्यानं[d] दशक्रोशमार्गं[e] प्रतिजागृहन्सुः अष्टापदसमं[f] अविषमं पाणितलसमं सिक्तं संमृष्टं विततवितानं[g] विचित्रदुष्यपरिक्षिप्तं ओसक्तपट्टदामकलापं धूपनधूपितं दशदिशेहि च नटनर्तक[h]ऋल्लमल्लपाणिस्वर्य[i]लंकृतं चक्रवर्तिपुरं[j] भूयस्य च शतपत्रालंकृतं । राज्ञा[k] अर्चिमेन प्रभूतं गन्धमाल्यं गृहीतं तथा गृहीतं महाजनकायेन समन्ताद्[l]द्वादशयोजनातो[m] गन्धमाल्यं समुदानीतं । राजा[n] अशीतिहि कोट्टराजसहस्रेहि सार्धं अन्याये च जनताये भगवन्तं दीपंकरं प्रत्युद्गतो[o] ।

अपरो श्रोत्रियो[p] षडङ्गवित्[q] त्रयाणां वेदानां पारगो साक्षरप्रभेदानामितिहासपंचमानां सनि[r]घण्ट[s]कैटभानां माणवकानां आचार्यो कुशलो ब्राह्मणेषु देवेषु[t] पंचमाणव-

Sen. 232 कशतानि वेदमन्त्रा वाचयति । तहिं[u] द्वे माणवका संमोदिका प्रियमाणा मेघो च नाम माणवको मेघदत्तो च । मेघमाणवको पण्डितो धीरो मेधावी तीक्ष्णबुद्धिको[v] । तेन नचिरस्यैव[w] सर्वे मन्त्रा अधीता । सो दानि अधीतवेदाध्ययनो अनुहिमवन्ता[x] जनपदं ओकस्तो[y] आचार्यस्य आचार्यधनं पर्य्येषयिष्यामि इति । यष्टि[z]कमण्डलु[a]च्छत्रं उपानहांश्च[b] स्नान[c]शाटिं[d] आदाय यस्य ग्रामस्य वा नगरस्य वा निगमस्य वा सीमामाक्रामति तं निरीतिकं निरुपद्रवं[e] च भवति[f] मेघस्य माणवकस्य तेजोधातुभावेन । तेन यायिना[g] पुरुषो विज्ञप्तो । तेनैवं पंच[h] पुराणशतानि दिन्नानि । तस्य दानि एतदभूषि । यं[i] नूनाहं आगतको येन दीपवती राजधानी चक्रवर्तिपुरं सप्तरतनामयं अभिरमणीयं[j] पश्येयं ति । सो दानि दीपवतीं[k] राजधानीं प्रविष्टो पश्यति च दीपवतीं राजधानीं अलंकृतां[l] । तस्य[m] एतदभूषि । किमिदं अद्य दीपवतीये राजधानीये पर्वं वा प्रयोगं वा उत्सवं वा । अथ राज्ञो[n] अर्चिमस्य[o] श्रुतं मेघो माणवको अधीतवेदाध्ययनो अनुहिमवन्तातो जनपदमोकस्तो सो दीपवतीं[p] राजधानीं आगमिष्यति । ततो इमं नगरवरमलंकृतं[q] ति । सो[r] पुरेगामी यो जनो प्रविशति सो[s] तं कंचित्पृच्छति । तहिं

अपरा [a]माणविका प्रासादिका दर्शनीया अ[b]चपला अनु[c]द्धता अप्रगल्भा उदकघटमादाय सप्त च उत्पलानि गच्छति। [d]सा तेन [e]पृच्छिता भवति। अद्य नगरे [f]उत्सवो। अथ खलु प्रकृति [g]माण[h]विका मेघं माणवकं गाथाभिरध्यभाषे।

[i]अपि तु नासि [j]माणवा इतो [k]अन्य[l]पुरादसि त्वं इहागतो।
यो [m]लोकहितं प्रभंकरं दीप[n]वतीं [o]प्राप्तं न बुध्यसे ॥१८७॥
[p]दीपंकर लोकनायको अर्चिमतो [q]तनयो महा[r]यशो। Sen. 233
[s]बुद्धो नगरं प्रवेक्ष्यति [t]तस्य कृते नगरं अलंकृतं ॥१८८॥

सा तेन [u]पृच्छिता। कथं ते [v]भवति [w]इमा उत्पलानि[x] क्रीतानि। [y]सा तं आह। पंचहि पुराण[z]शतेहि पंच उत्प[a]लानि क्रीतानि द्वे च मे मैत्राय लब्धानि[b]। मेघो माणवो आह। अहं ते पंचपुराण[c]शतानि देमि देहि मे तानि पंच उत्पलानि। अहं एतेहि पंचहि [d]उत्पलेहि भगवन्तं दीपंकरं पूजयिष्यामि। त्वं हि [e]द्वीहि पि अर्चय। [f]सा आह। समयतो ते पंच उत्पला[g]नि ददेहं। यदि मम भार्या[h]मुपादियसि यत्रयत्र उपपद्यसि अहं च तव भार्या भवेयं त्वं च मम स्वामिको भवेसि। मेघो माणवो आह। [i]अनुत्तराये सम्यक्सम्बोधये चित्तमुत्पादयि[j]ष्यामि कथं संयोगे चित्तमुत्पादयिष्यामि। [k]सा आह। [l]उत्पादेहि तुवं तव न अन्तरायं करिष्यामि। तेन मेघेन [m]माणवकेनाभ्युपगता। [n]उपादियामि तव भार्यां तेषामुत्पलानामर्थाये। भगवन्तं दीपंकरं पूजयिष्यामि अनुत्तराये[o] च सम्यक्सम्बोधये चित्तमुत्पादयिष्यामि[p]। तेन पञ्च पुराणशतानि [q]दत्त्वा पंचोत्पलानि गृहीता उदारं च से प्रीतिप्रामोद्यं काये उत्पन्नं बुद्धशब्दं प्रकृतिये माणविकाये श्रुत्वा।

[r]यदिच्छसि पूजितुं लोकनायकं
जलजेहि [s]माल्येहि मनोरमेहि।

[a]उपादियाहि मममद्य भार्या
प्रेम्णानुरक्ता [b]सत[c]तं ति भेष्यं ।।१८९।।
उदुम्बरस्य [d]यथ पुष्पं दुल्लभं
कदाचिदुत्पद्यति लोके माणव।
[e]एमेव बुद्धान महायशान
Sen. 234 कदाचिदुत्पादं तथा[f]गतानां ।।१९०।।
पूजेहि बुद्धं [g]नर[h]दम्यसारथिं
जलजेहि माल्येहि मनोरमेहि।
[i]बोधाय ते भेष्यति [j]हेतुभूतं
भार्या [k]च ते भेष्यि अहं तहिं तहिं ।।१९१।।

मेघ आह।

[l]उपादियामि तव अद्य भार्यां
जलजान अर्थाय मनोरमाणां।
पूजेष्यि बुद्धं नरदम्य[m]सारथिं
बोधाय मे भेष्यति हेतुभूतं ।।१९२।।
सा [n]हृष्टा संवृत्ता अ[o]दासि उत्पलां
स्नेहेन [p]प्रेम्णानुगतं विदि[q]त्वा।
[r]गच्छन्तमेनं अनुगच्छि चारिकां
शृंगाटके यत्र स्थितो हि माणवो ।।१९३।।

भगवानशीतिहि भिक्षुसहस्रेहि परिवृतो राज्ञा च अर्चिमेन अशीतिहि च कोट्टराजान सहस्रेहि अनेकेहि च क्षत्रियमहाशालसहस्रे[t]हि [u]श्रमणब्राह्मणतीर्थंकरेहि दीपवतीं राजधानीं संप्र[v]स्थितो।

गमनसमये भगवतो देवसहस्राणि सन्निपति[a]तानि ।
स[b]प्तरतनामयानि च्छत्रसहस्राणि आ[c]दाय ॥१९४॥
अथ [d]सो महागुणधरो संप्रस्थितो अग्रतो गणवरस्य ।
मत्तगजखेलगामी [e]मरीचिजाला[f]वततकायो ॥१९५॥
वेरुलिक[g]स्फाटिकमय[h]कांचनघनकनकसुकृतदण्डानि । Sen. 235
[i]छत्राणि देवपुत्रा धारेन्ति विशुद्धदेवस्य ॥१९६॥
[j]देवाभिनिर्मितानि नभे तरुणादित्यमण्डलनिभानि ।
तपनीयकिं[k]किणीयारुचिरा वरनन्दिघोषाणि ॥१९७॥
स[l]प्तरतनामयं पि च दिव्यं दिव्यकुसुममण्डित[m]च्छत्रं ।
छत्राधरस्य लोके धारयि च्छत्रं [n]त्रिदशराजा ॥१९८॥
त्रिसहस्राधिपतिं [o]पि च कांचनघनकनकसुकृतदण्[p]डाये ।
वरचामराये वि[q]रजं वीजेन्ति नरे[r]न्द्रं चानुगताः ॥१९९॥
अत्युन्नता च नमति [s]नतापि अत्युन्नता भवति भूमिः ।
[t]प्रविशन्तस्य भगवतो समं दशबलानुभावेन ॥२००॥
समनन्तरं च भ[u]गवां दक्षिणमेव चरणं कनककम[v]लं ।
परिहरति इन्द्र[w]कीले तत्र भवति अद्भुतो घोषो ॥२०१॥
आडम्बरा [x]मृदङ्गा पटहा असं[y]घट्टिता प्रवाद्यन्ति ।
[z]शंखा पणवा च वेणु प्रविशन्तस्मिं नरवरस्मिं ॥२०२॥
यानि [a]रतनानि नगरे [b]निहितानि पेटककरण्डगतानि ।
तानि [c]पि संघट्टेन्सुः [d]रतनवरविदुस्मिं प्रविशन्ते ॥२०३॥
अथ [e]महारहाणि [f]मृदूनि वस्त्रयुगा मार्गे संस्तरयेन्सु ।
[g]भगवतो [h]नानाविधानि रंगरक्ता काशि[i]कदुकूला ॥२०४॥

अलंकृतो लोकनाय[a]को[b] कोशिकारकं[c] क्षौमं यं तूला काचिलिन्दिक अजिनप्रवेणिं[d]
Sen. 236 च वनरुस्ता तम[e]कूटातपकोट्टवकसुभूमि [f]तोषलकोलमचिरावोकोद्भव[g] आमं रक्तक पञ्चविधा[h] नय···ल्लं ।

[i]याव च अग्रोद्यानं याव च अन्तःपुरं[j] महिपतिस्य[k] ।
[l]शोभति नरेन्द्रमार्गो दुष्यशतसहस्रसंस्तीर्णो ॥२०५॥
अथ च वन[m]खण्ड[n]रगता प्र[o]मदा अध्योकिरन्ति[p] नरसिंहं ।
कुसु[q]मनिकरकं[r] ग्रहे[s]त्व कनकगिरिनिभं अभिकिरन्ति ॥२०६॥
[t]यथयथ महानुभावो दीपवतीमभ्युपेति का[u]रुणि[v]को ।
तथातथा कु[w]सुमनिकरं मुंचन्ति यशस्विनो भवतो ॥२०७॥
तानि च करप्रमु[x]क्ता सुरभीणि पंचवर्णो······ ।
संस्थि[y]हति पुष्पकंचुको भगवतो लोकनाथस्य ॥२०८॥
[z]गगनपथे नि[a]रालम्बे अ[b]भ्यन्तरकण्टकानि सुरभीणि ।
स्था[c]तु प्रादक्षिणिये अ[d]भिदक्षिणं कुर्वि कुसुमानि ॥२०९॥
[e]गच्छति अनुगच्छन्ति तिष्ठन्ति स्थाति लो[f]कप्रद्योते ।
[g]ईर्यापथमृद्धिमतो स[h]र्वा[i]भिभुनो न विजहन्ते ॥२१०॥
सं[j]वर्तका पि वाता यदि विवहेन्सुः इमां त्रिसाह[k]स्रां ।
न विकोपये कुतो पुन वहेन्सु तं[l] पुष्पकंचुककं ॥२११॥
[m]भगवन्तं कनकनिभं कनकवरमुच्छुसमवर्णं दृष्ट्वा ।
[n]दिवि मरूण गणा तद उदीरयेन्सुः अहो धर्मं[o] ॥२१२॥
Sen. 237 प्र[p]मुक्तपुष्पावकीर्णं च अम्बरं ध[q]रणियं च कुसु[r]मोघा ।
[s]शोभन्ति जानुमात्रा पु[t]ष्पं च कञ्चुकमाकाशे ॥२१३॥

हिक्कारा तूर्यमिश्रा[a] समन्ततो वर्तन्ति अहो धर्मं।
ओनादेन्ति[b][c] पुरवरं नरवृषभस्मिं प्रविशन्तस्मिं ॥२१४॥
हंसकरविंक[d][e]वर्हिणपरभृतसुरवा च भृङ्गनिर्घोषा[f]।
दीपवतीये[g] निशाम्यति[h] निधिरतन[i]ध्वनितविमिश्रा ॥२१५॥

अद्दशासि[j] महामौद्गल्यायन[k] मेघो माणवो भगवन्तं[l] दीपंकरं दूरतो येव आगच्छन्तं द्वात्रिंशतीहि महापुरुषलक्षणोहि समन्वागतमशीतिहि अनुव्यंजनेहि[m] उपशोभितशरीरं[n] अष्टादशेहि आवेणिकेहि[o] बुद्धधर्मेहि[p] समन्वागतं दशहि तथागतवलेहि बलवं[q] चतुर्हि वैशारद्येहि समन्वागतं। नागो विय कारितकारणो[r] अन्तोगतेहि इन्द्रियेहि अवहिर्गतमानसेन स्थितो धर्मावस्थाप्राप्तः[s] शान्तेन्द्रियो शान्तमानसो उत्तमदमशमथपारमिप्राप्तो गुप्तो[t] नागो जितेन्द्रियो ह्रदमिव अच्छो अनाविलो विप्रसन्नो प्रासादिको दर्शनीयो आसेचनको अप्रतिकूलो[u] दर्शनाये[v] योजनगताये प्रभाये ओभासयन्तो। दृष्ट्वा च पुनरस्य[w] अद्वयसंज्ञा उदपासि। अहमपि बुद्धो लोके भविष्यामि[x]। अथ खलु[y] मौद्गल्यायन[z] मेघो माणवो ताये वेलाये इमां गाथामभाषि।

चिरस्य चक्षुं[a] उदपासि लोके
चिरस्य[b] उत्पादो तथागतानां[c]।
चिरस्य मह्यं[d] प्रणिधिः[e] समृद्धा
बुद्धो भविष्यामि न मेऽत्र संशयः ॥२१६॥

अथ[f] महामौद्गल्यायन[g] मेघो माणवो उदारं हर्षसंवेगं उदारं प्रीतिप्रामोद्यं Sen. 238
संजनयित्वा[h] तानि पंचोत्पलानि भगवतो दीपंकरस्य[i] क्षिपि। तानि पि प्रभाजालं मुखमण्डलमनुपरिवारेत्वा[j] अस्थासु[k]। प्रकृतिये पि माणविकाये[l] तानि दुवे[m] उत्पलानि क्षिप्तानि। तानि[n] पि अन्तरीक्षे अस्थान्सु। त्रीहि[o] प्रातिहार्येहि बुद्धा भगवन्तो सत्वां विनेन्ति ऋद्धिप्रातिहार्येण आदेशनाप्रातिहार्येण अनुशासनीप्रातिहार्येण।

भगवतो दीपंकरस्य[a] या च मेघेन[b] माणवेन[c] पंच उत्पलानि क्षिप्ता[d] या च प्रकृतिये[e] माणविकाये[f] या च अन्याये जनताये क्षिप्ता तं भगवतो पुष्पवितानमधिष्ठितं[g] सत्वानां वैनेयवशेन[h] मेघस्य[i] च माणवस्य प्रीतिप्रामोद्यसंजननार्थं[j] प्रासादिको दर्शनीयो चतुःस्थूणो चतुःद्वारो ओसक्तपट्टदामकलापो ।

मेघस्य[k] तानि जलजानि भगवतो प्रभामण्डलस्योपरि समन्तेन स्थितानि दृष्ट्वा प्रासादिकानि प्रसदनियानि प्रीतिप्रामोद्यं काये उत्पद्ये[l] उदारो च चेतनाप्रादुर्भावो । सो कमण्डलुमेकान्ते[m] निक्षिपित्वा अजिनं च प्रज्ञपेत्वा भगवतो दीपंकरस्य क्रमेषु प्रणिपतित्वा केशेहि[n] पादतलानि संपरिमार्जन्तो[o] एवं चित्तमुत्पादेति[p] । अहो पुनरहं पि भवेयं अनागतमध्वानं तथागतोऽर्हं सम्यक्संबुद्धो विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्य[q]सारथिः[r] शास्ता देवानां च मनुष्याणां च यथायं भगवां दीपंकरो एतर्हिं । एवं द्वात्रिंशतीहि[s] महापुरुषलक्षणेहि समन्वागतो भवेयं[t] अशीतिहि अनुव्यंजनेहि उपशोभितशरीरो अष्टादशहि आवेणिकेहि बुद्धधर्मेहि समन्वागतो दशहि तथागतबलेहि[u] बलवां चतुर्हि वैशारद्येहि सुविशारदो यथायं भगवां दीपंकरो[v] एतर्हिं । एवं च अनुत्तरं धर्मचक्रं[w] प्रवर्तेयं[x][y] यथायं भगवां दीपंकरो[z] एतर्हिं । एवं समग्रं[a] Sen. 239 श्रावकसंघं परिहरेयं । एवं च देवमनुष्याः श्रोतव्यं श्रद्धातव्यं[b] मन्येन्सुः[c] । एवं तीर्णो तारयेयं[d] मुक्तो मोचयेयं[e] आश्वस्तो आश्वासयेयं यथायं भगवां दीपंकरो[f] एतर्हि । भवेयं बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय[g] महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मषुष्याणां च । अथ[h] महामौद्गल्यायन[i] भगवान्दीपंकरो[j] मेघस्य माणवस्य[k] अनुत्तरेण बुद्धज्ञानेन महासमुदागमनं[l] च ज्ञात्वा कुशलमूलसम्भारं[m] च चेतोप्रणिधानं ज्ञात्वा अखण्डमच्छिद्रमकल्माषमव्रणं अनुत्तराये संम्यक्संबोधये व्याकार्षीत्[n] । भविष्यसि त्वं माणव[o] अनागतमध्वानं अपरिमिते[p] असंख्येये[q] कल्पे शाक्यानां कपिलवस्तुस्मि नगरे शाक्यमुनिर्नाम तथागतोऽर्हं सम्यक्सम्बुद्धो विद्याचरण-

संपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां[a] च यथाप्यहमेतर्हि द्वात्रिंशतीहि महापुरुषलक्षणेहि[b] समन्वागतो अशीतिहि अनुव्यञ्जनेहि उपशोभितशरीरो अष्टादशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतो दशहि तथागतबलेहि बलवां[c] चतुर्हि[d] वैशारद्येहि सुविशारदो। एवं तीर्णो तारयिष्यसि मुक्तो मोचयिष्यसि आश्वस्तो आश्वासयिष्यसि[e] परिनिर्वृतो परिनिर्वापयिष्यसि यथापि अहमेतर्हि। एवं चानुत्तरं धर्मचक्रं[f] प्रवर्तयिष्यसि। एवं च समग्रं[g] श्रावकसंघं परिहरिष्यसि। एवं च देवमनुष्या श्रोतव्यं श्रद्धातव्यं मनिष्यन्ति[h] यथापि अहमेतर्हि तं भविष्यसि बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च।

[i]समनन्तरव्याकृतो च महामौद्गल्यायन[j] भगवता[k] दीपंकरेण मेघो[l] माणवो अनुत्तराये सम्यक्संबोधये[m] तालमात्रं[n] वैहायसमभ्युद्गम्य[o] एकांशीकृतो प्राञ्जलीकृतो भगवन्तं[p] दीपंकरं सश्रावकसंघं नमस्यमानो। इयं च महापृथिवी तत्क्षणं तन्मुहूर्तं अतीव षड्विकारं[q] कम्पे संकम्पे[r]। भूम्या[s] च देवा घोषमुदीरयेन्सु[t] शब्दमनुश्रावयेन्सुः। Sen. 240
एवं मेघो माणवो भगवता दीपंकरेण अनुत्तराये[u] सम्यक्संबोधये[v] व्याकृतो तद्भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनकायस्यार्थाय[w] हिताय सुखाय देवानां च मनुष्याणां च। भूम्यानां देवानां घोषं श्रुत्वा अन्तरीक्षेचरा देवा चातुर्महाराजिका[x] देवा त्रायस्त्रिंशा यामा तुषिता निर्माणरतिनो परनिर्मितवशवर्तिनो[y] इति हि तत्क्षणं तन्मुहूर्तं याव[z] ब्रह्मकायं घोषमभ्युद्गमे। एवं मार्ष मेघो[a] माणवो भगवता दीपंकरेण अनुत्तराये[b] सम्यक्संबोधये[c] व्याकृतो तं भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां[d] च। अप्रमेयस्य च उदारस्य महतो[e] ओभासस्य लोके प्रादुर्भावो आसि। या पि[f] ता लोके लोकान्तरिका अन्धकारा[g] अन्धकारार्पिता[h] तमिस्रा तमसार्पिता अघा

अघसंभूतपूर्वा[a] यत्र इमे पि चन्द्रमसूर्या[b] एवं महर्द्धिका[c] एवं महानुभावा आभया[d] आभां नाभिसंभुणन्ति[e] आलोकेन वा आलोकं न स्फरन्ति[f] ते[g] पि तेन ओभासेन स्फुटा अभून्सुः[h]। ये पि तत्र सत्वा उपपन्नाः ते पि अन्योन्यं[i] संजानेन्सुः[j]। अन्ये[k] पि किल भो इह सत्वा उपपन्नाः अन्ये पि किल भो सत्वाः इहोपपन्ना[l]। एकान्तसुखसमर्पिता च तत्क्षणं तन्मुहूर्तं सर्वसत्वा अभून्सु[m]। ये पि अवीचे महानरके उपपन्ना[n] अतिक्रमे[o] च देवानां देवानुभावं नागानां नागनुभावं यक्षाणां[p] यक्षानुभावं[q]। ध्यामानि[r] च अभून्सुः मारभवनानि[s] निष्प्रभाणि[t] निस्तेजानि[u] निरभिरम्याणि। क्रोशिकान्यप्यस्य[v] खण्डानि प्रपतेन्सु। द्विक्रोशिकान्यप्यस्य खण्डानि प्रपतेन्सु[w]। त्रिक्रोशिकान्यप्यस्य खण्डानि प्रपतेन्सु[x]। योजनिकान्यप्यस्य खण्डानि प्रपतेन्सु[y]। ध्वजाग्राण्यप्यस्य प्रपतेन्सुः[z]। मारो[a] च पापीमां दुःखी दुर्मना विप्रतिसारी अन्तोशल्यपरिदाघजातो अभूषि।

Sen. 241 अजिनं प्रज्ञपयित्वा[b][c] कमण्डलुं[d] निक्षिपयित्व[e] एकान्ते।
क्षिपियानुत्पलहस्तं निपते[f] क्रमवरेहि चक्षुमतो ॥२१७॥
तानि च करप्रमुक्ता[g] सुरभीणि[h] पंचवर्णो[i]……[j]।
संस्थिहति[k] पुष्पकंचुको[l] भगवतो लोकनाथस्य ॥२१८॥
गगनपथे[m][n] निरालम्बे अभ्यन्तरकण्टकानि सुरभीणि।
स्थातु[o] प्रादक्षिणिये अभिदक्षिणं कृत्व कुसुमानि ॥२१९॥
गच्छति[p] अनुगच्छन्ति तिष्ठन्ति स्थाति[q] लोकप्रद्योते।
ईर्यापथमृद्धिमतो[r][s] सर्वाभिभुनो न विजहन्ते[t] ॥२२०॥
संवर्तका[u] पि वाता[v] यदि विवहेन्सुः इमां त्रिसाहस्रां।
न विकोपये[w] कुतो पुन[x] वहेन्सु तं पुष्पकंचुककं ॥२२१॥
भगवन्तं कनकनिभं कनकवरमुच्छुसमवर्णं[y] दृष्ट्वा[z]।
दिवि[a] मरूण[b] गणा तद उदीरयेन्सुः अहो धर्मं[c] ॥२२२॥

[a]अथ सागराम्बर[b]मही संकम्पे च दिवि देवसंघेषु ।
व्या[c]करणस्मि[d] व्याकृते अभ्युद्गमि अद्भुतो [e]घोषो ॥२२३॥
एषो मेघो [f]भवता [g]एकान्तसुभा[h]षितोच्छ्रितध्वजेन ।
दीपंकरेण मुनिना व्या[i]कृतो भवि[j]ष्यसि जिनो तुवं ॥२२४॥
तं [k]हितसुखाय काहसि सब्रह्मसुरासुरस्य लो[l]कस्य ।
हा[m]यिष्यन्ति अपाया नरका मरु संवि[n]वर्धन्ति ॥२२५॥
दीपं च लेनं त्र परायणं च Sen. 242
दीपंकरो नाम अभूषि शास्ता ।
इतो अ[o]संख्येयतरस्मि कल्पे
स्वाख्यातधर्म्मो भ[p]गवां नरेशो ॥२२६॥
[q]सो उत्तमार्थं अभिगम्य पण्डितो
वि[r]शारदं [s]वर्तयि धर्मचक्रं ।
सत्ये च धर्मे च स्मृतो प्रतिष्ठितो
मह[t]द्भयाद्विषमादुद्धरे प्रजां ॥२२७॥
मेघोऽद्दशा श्रमणगणस्य नायकं
दीपं[u]करं परमविचित्रलक्ष[v]ण[w]ं ।
चित्तं प्रसादेत्व जिनं अ[x]वन्दि च
सो वन्दमानो प्रणिधिं अ[y]कासि ॥२२८॥
एवं अहं लोकमिमं चरेयं
यथा अयं [z]चरति असंगमानसो ।
चक्रं प्रवर्तयमनन्यसा[a]दृशं
सुसंस्कृतं देवमनुष्यपूजितं ॥२२९॥

अर्थं चरेय[a] लोके[b] देवमनुष्या[c] देशेयं[d] धर्मं[e][f]।
एवं विनेय[g] सत्वा यथा अयं लोकप्रद्योतो ।।२३०।।
प्रणिधिं[h] च ज्ञात्वान[i] असंगसंगतं[j]
सवहि हेतूहि उपस्थितं जिनो ।
अखण्डमच्छिद्रमकल्माषाव्रणं[k][l][m]
मतिमां······व्याकरे[n] अर्थदर्शी[o] ।।२३१।।
Sen. 243 बुद्धो तुवं भेष्यसि मेघ माणव[p]
अनागते अपरिमितस्मि कल्पे ।
कपिलाह्वये ऋषिभवनस्मि[q] शाकियो
तदा त्वं[r] पि[s] प्रणिधिविपाकमेष्यसि[t] ।।२३२।।

तेन अपराणि पंचपुराणशतानि प्रेषितानि आचार्यस्य[u]। निर्यातित्वा[v] एवंविधं सर्वं मेघदत्तस्य आचिक्षति। एवं मये भगवां[w] दीपंकरः पूजितो अनुत्तराये सम्यक्संवाधये व्याकृतो[x]। गच्छामि[y] तर्हि भगवतो दीपंकरस्य सन्तिके ब्रह्मचर्यं चरिष्याम तां च समितिमनुभविष्यामः। सो आह। अहं ताव असमाप्तवेदो[z][a] तत्र न शक्यामि गन्तुं।

यथा काष्ठं[b] विवह्यते महन्ते उदकार्णवे ।
संघट्टितो[c][d] विनश्यति एवं प्रियसमागमो ।।२३३।।

मेघो गत्वा भगवतो दीपंकरस्य सन्तिके[e] प्रव्रजितो[f]। ते तादृशा[g] कल्याणमित्राण्यागम्य बुद्धसहस्रकोटियो अपरिमेयां[h] असंख्येयां आराधेत्वा[i] पूजयित्वा च सश्रावकसंघां[j] अप्रमेयानि च प्रत्येकबुद्धकोटिनियुता[k] पूजयित्वा दिव्यमानुषिकां संपत्तिमनुभवन्ति[l][m] यावदनुत्तरां[n] सम्यक्संबोधिमभिसंबुद्धा[o]। यो[p] रूपं नरदम्यसारथिं श्रुत्वा न[q] रूपं न उपादि गच्छेहं उपादेहं च। सो[r] त्वाह। शिरःप्रणामाये[s] एष अतीव प्रवणो

मेघो वर्तते। मेघस्य माणवस्य सकाशातो [a]बुद्धशब्दं श्रुणित्वा न हृष्टो। [b]पापमित्र-समंगिताये [c]पंचानन्तर्याणि कृतानि। परदारे [d]प्रसक्तो तत्र काले वा विकाले वा Sen. 244
[e]गच्छति। [f]तं माता पुत्रस्नेहेन [g]निवारेति मा तत्र [h]पारदारिको ति कृत्वा [i]घात[j]यिष्यति।

रक्तो अर्थं न जानाति रक्तो [k]धर्मं न पश्यति।
[l]अन्धकारे तदा [m]भवति यं रागो सहते नरः ॥२३४॥

सो तां मातरं [n]घातयित्वा तस्या इस्त्रिकाये सकाशं [o]गतो यत्र [p]प्रसक्तो हस्यैव तां [q]प्रकृतिमाचिक्षति। एवं त्वं मम इष्टा [r]यं मया तव कारणा माता जीविताद्व्यपरोपिता। सा स्त्री उद्विग्ना [s]संवृत्ता। [t]ताय [u]उक्तो। [v]मा मे भूयो आगच्छसि। [w]अपरमातरं प्रसक्तो। ततो तं सा अपरमाता आह। [x]एथ पितरं जीविताद्व्यपरोपेहि त्वं च मे स्वामिको भविष्यसीति। तेन दानि सो पिता [y]जीविताद्व्यपरोपितो। सो [z]तत्र अधिष्ठाने जुगुप्सितो [a]संवृत्तो। [b]मित्रज्ञातिका परिवर्जेन्ति। सो ततो [c]अधिष्ठानातो अन्यमधिष्ठानं [d]संक्रान्तो [e]अत्र मे न कोचि जानिष्यति। तस्य यो [f]मातापितॄणां भिक्षु कुलोपको आसि [g]अरहा [h]महानुभावो सो जनपदचारिकां चरमाणो तमधिष्ठानमनुप्राप्तो। [i]तेन दानि सो दानपतिपुत्रो भिक्षुणा तहिं अधिष्ठाने [j]दृष्टो। सो पि तं [k]भिक्षुं दृष्ट्वा शंकी संवृत्तो मा मे भिक्षु [l]इमंहि अधिष्ठानंहि [m]दूषयतीति। तेन दानि [n]सो पि अरहा भिक्षु [o]जीविताद्व्यपरोपितो। सो दानि यो तदा आसि सम्यक्संबुद्धो तस्य शासने [p]प्रव्रजितो। तेन दानि शासने प्रव्रजित्वा संघो च भिन्नो बुद्धस्य [q]रुधिरं उत्पादितं। एतानि [r]पंचानन्तर्याणि कर्माणि कृत्वा [s]महानर[t]केषूपपन्नो।

[u]सा अष्टसु [v]महानरकेषु षोडशोत्सदेषु सुचिरं दीर्घमध्वानं [w]संधावित्वा संसरित्वा [x]यदा भगवता शाक्यमुनिना [y]अनुत्तरा सम्यक्संबोधिरभिसंबुद्धा [z]धर्मचक्रो प्रवृत्तः सो Sen. 245
[a]महासमुद्रे [b]तिमितिमिंगिलो नाम [c]मत्स्यजाति आयामतो बहुयोजनशतिकेन आत्म-

भावेन। यदा थपर्कणि[a] गृहपति सयानपात्रो पंचशतपरिवारो तेन महासमुद्रं[b] ओकस्तो तदा तेन मकरभूतेन बुभुक्षितेन[c] मुखं[d] उच्छ्वासितं भोजनार्थिकेन। ततो[e] यानपात्राणि स्थपर्कणिकस्य[f] गृहपतिस्य येन तं मकरमुखं तेन प्रधाविता[g]। निर्यातमुख[h] आह। गृहपति इमानि यानपात्राणि बडवामुखे पतितानि यं दानि करणीयं तं करोथ नास्ति दानि वो जीवितं। ते दानि देवदेवतां नमस्यन्ति[i] स्वकस्वकानि। केचिच्छिवं केचिद्वै[j]श्रवणं केचित्स्कन्धं केचिद्वरुणं केचिद्यमं केचिद्धृतराष्ट्रं[k] केचिद्विरूढकं[l] केचिद्वि[m]-रूपाक्षं केचिदिन्द्रं केचिद्ब्रह्मं केचित्समुद्रदेवतां। यावदायुष्मां पूर्णको समन्वाहरति पश्यति स्थपर्कणिकं गृहपतिं पंचशतपरिवारं संशयप्राप्तं। सो तुण्डतुरिकातो पर्वतातो[o] वैहायसमभ्युद्गम्य महासमुद्रे थपर्कणिकस्य यानपात्रं[p] उपरि वैहायसमन्तरीक्षे अस्थासि। ते सर्वे पंच वाणिजशतानि प्राञ्जलिं[q] कृत्वा उत्थिता[r] भगवं भगवं तव शरणगता स्म। स्थविरो आह। नाहं भगवां[s] श्रावकोऽहमस्मि। सर्वे[t] एककण्ठा नमो बुद्धस्येति उदीरेथ[u]। तेहि सर्वेहि पञ्चेहि[v] वणिजशतेहि[w] नमो बुद्धस्येति विघुट्ठं[x]। तस्य तिमितिमिंगिलस्य[y] बुद्धशब्दः कर्णपथं गतो। तस्य तं शब्दं श्रुत्वा[z] यो अप्रमेये असंख्येये[a] कल्पे मेघस्य माणवस्य सकाशातो दीपंकरबुद्धशब्दो श्रुतो तं महासमुद्रे तिमितिमिंगिलभूतस्य आमुखीभूतो[b]। अमोघो बुद्धशब्दो[c][d] ति। तस्य दानि तिमिति-मिंगिलस्य[e] भूतस्य एतदभूषि[f]। बुद्धो लोके[g] प्रादुर्भूतो[h] वयं च अपायगता[i]। तेन दानि[j] संविग्नेन पुनरपि मुखं संमीलितं[k]। अनाहारो कालगतो[l] तं बुद्धशब्दं समनुस्मरन्तो[m] Sen. 246 समनन्तरकालगतो[n] श्रावस्त्यां महानगर्यां ब्राह्मणकुले उपपन्नो तेन कालेन तेन समयेन प्रजातो[o] दारको जातो[p]। यथोक्तं भगवता[q] नाहं भिक्षवो कर्मतोऽन्यद्वदेमि[r] इति।

तस्य दानि दारकस्य धर्मरुचिनाम[s] कृतं। यदा महन्तो[t] संवृत्तो तदा भगवतः शासने[u] प्रव्रजितो। प्रयुज्यन्तेन[v][w] घटन्तेन[x] व्यायमन्तेन[y] तिस्रो विद्या षड्भिज्ञा बलवशी-

भावं साक्षात्कृतं। त्रिखुत्तो[a] दिवसस्य[b] भगवतः पादवन्दने[c] उपसंक्रमति। यत्तकमुप[d]संक्रमति तत्तकं भगवां चोदेति स्मारेति चिरस्य धर्मरुचि सुचिरस्य धर्मरुचि। सो पि आह। एवमेतं[e] भगवं[f] एवमेतं सुगत। चिरस्य भगवं सुचिरस्य सुगत[g]। भिक्षु संशयेन भगवन्तं पृच्छन्ति। त्रिखुत्तो दिवसस्य धर्मरुचिर्भगवन्तमुपसंक्रमति भगवाश्च[h] तमेवमाह चिरस्य धर्मरुचि[i] सुचिरस्य धर्मरुचीति[j] भगवन्तमेवमाह एवमेतं भगवं एवमेतं[k] सुगत[l] चिरस्य भगवं[m] सुचिरस्य सुगत[n] न च पुनर्भगवं वयमिमस्य[o] भाषितस्य अर्थमाजानाम। तेषां भगवां[p] भिक्षूणां एतां प्रकृतिं[q] विस्तरेणारोचयति दीपंकरमुपादाय। अहं च मेघो माणवो[r] नामेन आसि एषो च धर्मरुचि मेघदत्तो। एवं भिक्षवो अमोघो बुद्धशब्दो यावद्दुःखक्षयाय[s] संवर्तति।

तेन समयेन स्थविरो[t] धर्मरुचि उपागमेसि शास्तारं।
पादौ जिनस्य वन्दति[u] आह पि सुचिरस्य धर्मरुचि ॥२३५॥
सुचिरस्य लोकनायक धर्मरुचि प्रतिभणाति[v] शास्तारं।
जानन्तं पृच्छति[w] जिनो किंकारणं ब्रुसि सुचिरस्य ॥२३६॥
सो पुनराह पुरे[x] अहं लवणजले तिमितिमिंगिलो आसि।
क्षुधादौर्बल्यपरिगतो[y] विपरिमुषं भोजनार्थिये ॥२३७॥
तत्र[z] बहु प्राणनयुता प्रविशेन्सुः तद शरीरदेहं मे। Sen. 247
वाणिजकशतानि पंच प्रविशेन्सु[a] तथैव[b] यानेन ॥२३८॥
पात्र[c] च प्रविशमाने अत्राणभयार्दिता व्यसनप्राप्ता।
सर्वे एकवाचमवचि[d] नमो दशबलस्य बुद्धस्य ॥२३९॥
बुद्धेति[e] श्रुत्व घोषं अश्रुतपूर्वमभूषिमहं प्रीतो।
हृष्टो उदग्रचित्तो त्वरितं संमीलयेसि[f][g] मुखं[h] ॥२४०॥

[a]सुनेन्सु प्राणन[b]युतानि तिर्यग्[c]योनिगता वणिजशतान ।
घोषेण दशबलस्य [d]व्युत्थितो [e]तदाहमपायेषु ॥२४१॥
तेन कुशलेन [f]भगवं इदं मे आरोपितं [g]मनुष्यत्वं ।
[h]सुचरितफलेन तेन [i]धर्मरुचीति मम [j]समाज्ञा ॥२४२॥
[k]तेनैवाहं हेतुना प्रव्रजितो तव [l]स्वयंभु प्रावचने ।
नचिरस्य प्रव्रजित्वा अभूषि अरहां धुतक्लेशो ॥२४३॥
बहुकल्पकोटिनयुता [m]संसारं संसरित्वान अनन्तं ।
[n]अनुस्मारेन्तो सुगतं भणामि सुचिरस्य लोकहित ॥२४४॥
सुचिरस्य धर्मचक्षुर्विशोधितं धर्मसंशयं [o]छिन्नं ।
[p]मोहतिमिरावनद्धं उषितो स्मि चिरं [q]अपायेषु ॥२४५॥
[r]तेन [s]कुशलेन तिमिरं प्रहीनं [t]रागद्वेषा च [u]ऊहता ।
[v]अशेषा भवनेत्रिसरिता उच्छोषिता अयमिह जातिः ॥२४६॥
[w]अस्य पि तिमितिमिंगिलस्य बुद्धश्रवणं महत्फलं आसि ।
[x]किं पुन इदानि [y]भगवं [z]इदं श्रुतं [a]नावहेदमृतं ॥२४७॥
Sen. 248 तस्माद्विवर्जयित्वा [b]नीवरणा पंच चेतसावरणा ।
श्रोतव्यं [c]बुद्धवचनं [d]दुल्लभसंज्ञामुपजनेत्वा [e]॥२४८॥
[f]कृच्छ्रो मनुष्यलाभो [g]विवर्जना च [h]असाररूपवनात् ।
[i]बुद्धान च उत्पादो [j]श्रद्धा च भवेय च [k]निर्वृतिः ॥२४९॥

इति श्रीमहावस्तुअवदाने दीपंकरवस्तु समाप्तं ।

इतो [l]महामौद्गल्यायन भद्रकल्पातो अपरिमिते अप्रमेये असंख्येये [m]कल्पे दीपंकरातो अनन्तरं मङ्गलो नाम तथागतोऽर्हं सम्यक्सम्बुद्धो उदपासि । [n]मङ्गलस्य महामौद्गल्यायनं[o]

सम्यक्संबुद्धस्य वर्षकोटीशतसहस्रं मनुष्याणामायुःप्रमाणमभूषि। मङ्गलस्य महा[a]मौद्गल्यायन[b] सम्यक्संबुद्धस्य त्रयः श्रावकसन्निपाता अभून्सुः। प्रथमे श्रावकसन्निपाते[c] कोटीशतसहस्रमभूषि[d] सर्वेषामर्हतां[e] क्षीणाश्रवाणामुषितव्रतानां[f g h] सम्यगाज्ञासुविमुक्तचित्तानां परिक्षीणभवसंयोजनानामनुप्राप्तस्वकार्थानां[i j]। द्वितीयो श्रावकसन्निपातो नवति कोटीयो[k] अभून्सुः सर्वेषां[l] अर्हतां क्षीणाश्रवाणां उषितव्रतानां[m] सम्यगाज्ञासुविमुक्त[n]चित्तानां परिक्षीणभवसंयोजनानां अनुप्राप्तस्वकार्थानां। तृतीयो श्रावकसन्निपातो अशीति कोटीयो अभुन्सु[o] सर्वेषामर्हतां क्षीणाश्रवाणामुषितव्रतानां सम्यगाज्ञासुविमुक्त[p]चित्तानां परिक्षीणभवसंयोजनानां अनुप्राप्तस्वकार्थानां। मङ्गलस्य खलु पुनर्महा[q]मौद्गल्यायन सम्यक्सम्बुद्धस्य सुदेवो च धर्मदेवो च नाम श्रावकयुगो अभूषि अग्रयुगो च भद्रयुगो च। एको अग्रो[r] प्रज्ञाये अपरो अग्रो ऋद्धीये। मङ्गलस्य[s] खलु पुनर्महा[t]मौद्गल्यायन सम्यक्संबुद्धस्य[u] शीवाली च नाम भिक्षुणी[v] अशोका च अग्रश्राविका[w] अभून्सुः। एका अग्रा[x] प्रज्ञाये अपरा ऋद्धीये। मङ्गलस्य[y] खलु महामौद्गल्यायन[z a] सम्यक्संबुद्धस्य पालितो[b] नाम भिक्षु उपस्थायको अभूषि। मङ्गलस्य खलु पुनर्महा- Sen. 249
[c]मौद्गल्यायन सम्यक्संबुद्धस्य नागवृक्षो अभूषि[d] बोधि। मङ्गलस्य खलु[e f g] महामौद्गल्यायन सम्यक्संबुद्धस्य उत्तरं नाम नगरं अभूषि। द्वादश योजनानि आयामेन पुरस्तिमेन[h] पश्चिमेन च सप्त योजनानि विस्तारेण[i] दक्षिणेन[j] उत्तरेण च। सप्तहि प्राकारेहि परिक्षिप्तं[k] सौवर्णेहि सौवर्णच्छदनेहि[l]। सप्तहि दीर्घिकाहि परिक्षिप्तं अभूषि[m] चित्राहि दर्शनीयाहि सप्तानां वर्णानां[n] सुवर्णस्य रूप्यस्य मुक्तायाः वैडूर्यस्य स्फटिकस्य मुसागल्वस्य लोहितिकाया। तासां खलु पुनर्महामौद्गल्यायन[o] दीर्घिकानां[p] द्विन्नां वर्णानां सोपाना अभून्सुः सुवर्णस्य रूप्यस्य[q]। चतूर्णां वर्णानां सोपानफलका अभून्सु[r] सुवर्णस्य रूप्यस्य च मुक्ताया वैडूर्यस्य[s t] च। तायो[u] दीर्घिकायो छन्नायो अभून्सुः[v] उत्पलपदुमकुमुदपुण्डरीकनलिनीसौगन्धिकेहि[w]। तायो[x] दीर्घिकायो इमेहि[y] एवंरूपेहि वृक्षेहि

प्रच्छन्नायो[a] अभुन्सुः। सय्यथीदं अम्रजम्बुपनस[b]लकुचभव्यपालेवत[c]प्रच्छन्नायो। तासां खलु पुनर्दीर्घिकानां[d] तीरेषु इमानि एवंरूपाणि स्थलजजलजानि माल्यानि अभुन्सु[e]। सय्यथीदं अतिमुक्तक[f]चम्पकवार्षिकावातुष्कारइन्दीवरदमनकदेवोपसंहिता। उत्तरं खलु पुनर्महामौद्गल्यायन[g] नगरं सप्तहि तालपंक्तिहि[h] परिक्षिप्तमभूषि। विस्तरेण दीपवती राजधानी[i] यथा वर्णयितव्यं। मङ्गलस्य[j] खलु पुनर्महामौद्गल्यायन[k] सम्यक्सम्बुद्धस्य[l] सुन्दरो नाम क्षत्रियो पिता अभूषि[m] राजा चक्रवर्ती[n o]। मङ्गलस्य खलु पुनर्महामौद्गल्यायन[p q] सम्यक्सम्बुद्धस्य शिरी[r] नाम देवी[s] माता अभूषि। तदाहं[t] महामौद्गल्यायन[u] अतुलो[v] नाम

Sen. 250 नागराजा कृतपुण्यो महेशाख्यो उत्सदकुशलसंचयो[w]। ततो मया सो भगवां मंगलो[x] सश्रावकसंघो[y]······सत्कृत्वा गुरुकृत्वा मानयित्वा पूजयित्वा दुष्ययुगमाच्छादं दत्त्वा बोधाय अनुप्रणिहितं[z]। तेनाप्यहं व्याकृतो भविष्यसि[a] त्वमनागताध्वाने[b] अपरिमिते असंख्येये कल्पे शाक्यमुनिर्नाम तथागतोऽहं सम्यक्संबुद्धो।

दीपंकरस्य ओत्तरेण मङ्गलो[c] नाम नायको।
तमं लोके निहत्वान धर्मोल्कामभिज्वालयेत् ॥१॥
अतुला[d] आसि प्रभा तस्य जिनेहि अन्येहि उत्तरा
कोटिसूर्यप्रभां हत्वा[e] सहस्रारैः विरोचते ॥२॥
सो च बुद्धो[f] प्रकाशेति[g] चत्वारि सत्या उत्तमां।
ते तं सत्यरसं पीत्वा विनोदेन्सु[h] महातमं[i] ॥३॥
बोधिं बुद्ध्वा[j] अतुलां देवा प्रथमे धर्मदेशने।
कोटिशतसहस्राणां प्रथमाभिसमयो अभूत् ॥४॥
यदा [सुनन्दश्चक्रवर्ती सम्बुद्धमुपसङ्क्रमीत्]।
तदा आहनि संबुद्धो धर्मभेरीं वरमुत्तमां ॥५॥

[a]पुनरपि देवसमये यदा सत्यां प्रकाशयेत् ।
द्वितीये नवति कोटी द्वितीयाभिसमयो अभूत् ॥६॥
यदा सुनन्दो चक्रवर्ती बुद्धधर्म[b]मुपागमि ।
[c]तदा आहनि संबुद्धो धर्म[d]भेरीं वरमुत्तमां ॥७॥
सुनन्दानुचरा [e]जनता [f]नर्वति आसि कोटियो ।
सर्वे ते निर[g]वशेषा अभूद्बुद्धस्य श्रा[h]वका ॥८॥
पुनरपि देवसमये यदा सत्यां प्रकाशयेत् । Sen. 251
अशीतिं तृ[i]तीये कोटी तृ[j]तीयाभिसमयो अभूत् ॥९॥
[k]यदा उत्तरो गृहपति बुद्धदर्शन[l]मुपागमि ।
तदा आहनि संबुद्धो धर्मभेरीं वरमुत्तमां ॥१०॥
उत्तरानुचरा [m]जनता अशीतिं आसि कोटियो ।
सर्वे ते निर[n]वशेषा अभूद्बुद्धस्य श्रावकाः ॥११॥
सन्नि[o]पाताः त्रयो आसि मङ्गलस्य महर्षिणो ।
क्षीणाश्रवाणां विरजानां शान्त[p]चित्तानुतापिनां ॥१२॥
कोटीशतसहस्राणां प्रथ[q]मो आसि समागमो ।
[r]द्वितीयो [s]नर्वति कोटी अशी[t]तिं तृ[u]तीयो अभूत् ॥१३॥
[v]अहं तेन समयेन नागराजा मह[w]र्द्धिको ।
अतुलो नाम नामेन उत्सद[x]कुशलसंचयो ॥१४॥
ना[y]गानां दिव्येहि तूर्येहि मङ्गलस्य महर्षिणो ।
[z]अर्चये [a]दुष्याणि दत्त्वान शरणं तमुपागमि ॥१५॥
सो मे [b]बुद्धो वियाकार्षीत् मङ्गलो लोकनायको ।
[c]अपरिमेये इतो कल्पे बुद्धो लोके भविष्यसि ।

शाक्यानां [a]नगरे रम्ये स्फीते कपिलसाह्वये ।।१६।।
तस्य ते जननी माता माया [b]नामेन भेष्यति ।
पिता शुद्धोदनो नाम तव [c]भविष्यति गौतमः ।।१७।।
[d]कोलितो उपतिष्यो च अग्रा भेष्यन्ति श्रावकाः ।
[e]क्षेमा उत्पलवर्णा च अग्रा भेष्यन्ति श्राविका ।।१८।।
आनन्दो नाम नामेन [f]उपस्थायको भविष्यति ।
Sen. 252 [g]बोधि भविष्यति तुह्यं अश्वत्थो वरपादपः ।।१९।।
तस्य व्याकरणं श्रुत्वा मङ्गलस्य महर्षिणः ।
[h]विरियं प्रग्रहेत्वान दृढं [i]कृत्वान मानसं ।
[j]चरन्तो [k]बोधिचर्याणि नाहं कंचित्परित्यजे ।।२०।।
[l]उत्तरं नाम [m]नगरं[n] सुन्दरो नाम क्षत्रियो ।
[o]शिरिका नाम जनिका मङ्गलस्य [p]महर्षिणो ।।२१।।
सुदेवो धर्मदेवो च [q]अभुन्सुः अग्रश्रावकाः ।
[r]शीवाली च अशोका च अभुन्सु अग्रश्राविका ।।२२।।
पालितो नाम [s]उपस्थाको मंगलस्य महर्षिणो ।
[t]बोधि [u]तस्य नागवृक्षो बोधिवृक्षं [v]सुपुष्पितं ।।२३।।
[w]कोटीशतसहस्राणां[x] संघो [y]आसि [z]महर्षिणो ।
तिष्ठमानो [a]महावीरो [b]तारेसि [c]जनतां बहुं ।।२४।।
[d]तारयि बहुजनतां वैस्तारिकं [e]कृत्व शासनं ।
[f]ज्वलितो अग्निस्कन्धो[g] वा सुरियो वा समुद्गतो ।।२५।।
[h]यथा सागरस्य [i]ऊर्मियो न [j]शकियं गणयितुं ।
[k]तथैव भगवतो पुत्रा न [l]शकियं गणयितुं ।।२६।।

सो च बुद्धो महाभागो[a] सद्धर्मो च गणोत्तमो।
सर्वे[b] समनन्तरातीता[c] अनुरिक्ता एव संस्कारा: ॥२७॥

इति श्रीमहावस्तुअवदाने[d] मंगलस्य[e] वस्तुं समाप्तं ॥

अथ छत्रवस्तुके आदि। अनुहिमवन्ते कुण्डला[f] नाम यक्षिणी प्रतिवसति। Sen. 253
सा दानि समं[g] समं च पुत्रशता[h] पंच[i] प्रजायति। पुत्रसहस्रं[j][k] प्रजाता सा कालं करोति। ते[l] पि वैशालिं ओजोहारका प्रेषिता। वैशालिं गत्वा मनुष्याणामोजं हरन्ति[m]। रोगजाता[n] आर्द्धा मण्डलको च अधिवासो च। मण्डलको रोगजातो[o] यहिं कुले निपतति[p] न किंचि[q] शेषेति सर्वं हरति[r]। अधिवासो नाम रोगजातो प्रदेशं हरति। तदानि वैशालिका[s] अधिवासेन रोगजातेन स्पृष्टा[t] मरन्ति। ते देवदेवां नमस्यन्ति। तेषामेतदभूषि[u]। कस्मिन्नु[v] खल्वागते वैशालकानामाबाधो प्रतिप्रशाम्येया[w]। तेहि दानि काश्यपस्य पूरणस्य प्रेषितं[x]। आगच्छाहि[y] वैशालकानाममनुष्यव्याधि[z][a] उत्पन्नो त्वयि आगते प्रतिप्रश्रब्धो[b] भविष्यति। काश्यपपूरणो[c] वैशालिमागतो नच तं व्याधिं प्रति-[d]प्रस्रभ्यति। तेषामेतदभूषि। आगतो[e] काश्यपो नैव च वैशालकानाममनुष्यव्याधिः प्रतिप्रस्रभ्यति[f]। तेहि दानि मस्करिस्य[g] गोशालिपुत्रस्य प्रेषितं। सो पि आगतो न च वैशालिकानाममनुष्यव्याधिः प्रतिप्रस्रभ्यति[h]। तेहि[i] दानि ककुदस्य कात्यायनस्य प्रेषितं। सो पि आगतो न च वैशालिकानाममनुष्यव्याधिः[j] प्रतिप्रस्रभ्यति[k]। तेहि दानि अजितस्य[l] केशकम्बलस्य प्रेषितं[m]। सो पि आगतो न च वैशालकानाममनुष्यव्याधि[n] प्रतिप्रस्रभ्यति। तेहि दानि संजयिस्य[o] वैरट्टिपुत्रस्य[p] प्रेषितं। सो[q] पि आगतो न च वैशालकानाममनुष्य-[r]व्याधि प्रतिप्रस्रभ्यति[s]। तेहि[t] दानि निर्ग्रन्थस्य[u] ज्ञातिपुत्रस्य प्रेषितं[v]। सो पि आगतो न च वैशालकानाममनुष्यव्याधिः प्रतिप्रस्रभ्यति[w]। तेषां वैशालकानां ज्ञातिसालोहिता[x] कालगता देवेहि उपपन्ना[y]। तेषामन्यतरा देवता वैशाल-

Sen. 254 कानामारोचयति। ये एते [a]तुभ्येहि[b] आनीता [c]अशास्तारो [d]अशास्तारवादिनो न एते
शक्ता वैशालकानाममनुष्यव्याधिं [e]प्रतिप्रस्त्रंभयितुं। एष बुद्धो [f]भगवां असंख्येहि कल्पेहि
समुदागतो अर्हन्सम्यक्संबुद्धो अपरिशेषज्ञानदर्शनो महर्द्धिको महानुभावो सर्वज्ञो
[g]सर्वदर्शावी यत्र [h]ग्राम[i]क्षेत्रसीमायां प्रतिवसति [j]सर्वं तत्र [k]ईतिकलहं कलकलं उपद्रवा
[l]उपसर्गा प्रशाम्यन्ति। [m]तमानेथ। तेन [n]आगतेन वैशालकानाममनुष्यव्याधिः
[o]प्रतिप्रस्रभ्यते इति।

राजगृहे मन्दिरपुरे विहरति वरकमल[p]ग[q]र्भसुकुमारो।
[r]सर्वा कलिकलहानि प्रशमयितानि जितक्लेशेन ॥१॥
सोपद्रवं काञ्चननिभो यं प्राप्तो [s]ग्रामनिगमनगरं[t] वा।
[u]शामयति तत्र ईतयो रजमिव [v]बलवां स[w]लिलवृष्टिः ॥२॥
[x]पाण्डरवर्णं काञ्चननिभं [y]दिनकरपरिपूर्णचारुमुखं।
[z]वरसुरभिशील[a]गन्धं [b]आनेथ शाम्यति तु व्याधि ॥३॥

वैशाल्यां [c]तोमरो नाम लेच्छविमह[d]त्तरको [e]महापक्षो महापरिवारो पण्डितो च।
सो गणेन [f]अध्येष्य प्रेषितो। गच्छ राजगृहं तहिं बुद्धो भगवां प्रतिवसति। श्रेणियस्य
[g]बिम्बिसारस्य याचित[h]वासो प्रतिवसति। [i]तं गत्वा वैशालकानां लिच्छवीनां वचनेन
वन्दनां वदेसि सपरिवारस्य अल्पाबाधतां च अल्पातंकतां च [j]सुखस्पर्शविहारतां च
पृच्छेसि [k]एवं च [l]वदेसि। [m]वैशालकानां [n]भगवं लिच्छवीनाममनुष्यव्याधि[o] उत्पन्नो
Sen. 255 बहूनि प्राणसहस्राणि अनयव्यसनमापद्यन्ति। [p]साधु भगवान[q]र्थकामो [r]हितैषी वैशालि-
[s]मागच्छेया अनुकम्पामुपादाय। अथ [t]तोमरो [u]लेच्छविगणस्य प्रतिश्रुत्वा [v]यथानुरूपेण
परिवारेण [w]सार्धं भद्राणि यानानि आरुहित्वा वैशालितो नगरातो निर्गम्य येन राजगृहं
[x]नगरं तेन प्रयासि। अथ खलु तोमरो लेच्छवि राजगृह[y]नगरं गत्वा प्रविशित्वा

राजगृह[a]नगरं येन वेणुवनं कलन्दकनिवा[b]पं तेन प्रक्रमि भगवन्तं दर्शनाय उपसंक्रमणाय पर्युपासनाय। तेन खलु पुनः समयेन भगवान्तदहो पो[c]षधे पंचदश्यां [d]पूर्णायां पूर्णमास्यां पंचानां भिक्षुशतानां अन्याये च जनताये अनेकसहस्राये परिषाये धर्मं देशयति आदौ कल्याणं म[e]ध्ये कल्याणं पर्यवसाने कल्याणं [f]स्वर्थं सुव्यञ्जनं [g]केवलपरिपूर्णं परिशुद्धं पर्यवदातं [h]ब्रह्मचर्यं प्रकाशयति। अथ तोमरो लेच्छवी [i]यावत्तका यानस्य भूमिः तावद्यानेन गत्वा यानादवतीर्य [j]पद्भ्यामेव येन भगवांस्तेनोपसंक्रमि। सो दानि [k]महेशाख्यां परिषां सन्निपतितां न श[l]क्नोति प्रसह्य भगवन्तमुपसंक्रमितुं। सो दानि एकां[m]समुत्तरासंगं कृत्वा येन भ[n]गवांस्तेनांजलिं प्रणामेत्वा भगवन्तं गाथाये अध्यभाषि।

उपोष[o]धे पंचदशीविशुद्धये
उपासितुं ते ऋषयो समागता।
[p]शक्रो च देवो त्रिदशान इन्द्रो
पुरस्कृतो [q]तेषु असह्यसाहि ॥४॥
विरोच[r]मानो भाषसि उत्तमं पदं
धर्मेण तर्[s]पेसि ब[t]हुं इमां प्रजां।
[u]महां व मेघः सलिलेन मेदिनीं
ते तुह्य श्रुत्वा मधुरामिमां गिरां ॥५॥
अनेलि[v]कां धारयतो महामु[w]ने
नमस्[x]कृत्वा अंजलिं वन्दमाना।
शरणन्ते ग[y]च्छाम असह्यसाहि Sen. 256
[z]तेषां सुलब्धं च सुआगतं च ॥६॥
स [a]तोमरा[b]णामहमन्तिके भवं
ये ते प्रसन्ना शरणं उपेन्ति।

अथ[a] अप्रमत्ता सुगतस्य शासने
काहिन्ति जातीमरणस्य अन्तं ।।७।।

गाथापर्यवसाने महता जनकायेन[b] अन्तरो दिन्नो । अथ खलु तोमरो[c] लेच्छवी येन भगवांस्तेनोपसंक्रमित्वा[d] भगवतः पादौ शिरसा वन्दित्वा भगवन्तमेतदवोचत् । वैशालिका[e] भगवं[f] लेच्छवियो समृद्धबाला[g] अभ्यन्तरवैशालका च बाहिरकवैशालका च भगवतः[h] पादा शिरसा वन्देन्ति सश्रावकसंघस्य सुखं च स्पर्शविहारतां च पृच्छेन्ति एवं च वदेन्ति। वैशाल्यां भगवन्नमनुष्यव्याधि[i] उत्पन्नः बहूनि प्राणिसहस्राणि अनयव्यसनमापद्यन्ति[j] भगवां[k] च अनुकम्पको कारुणिको सदेवकस्य[l]। साधु[m] भगवां वैशालिमागच्छेय वैशालिकानामनुकम्पामुपादाय। भगवानाह। तथागतो तोमर राज्ञो श्रेणियस्य बिम्बिसारस्य[n] याचितवासो वसति गच्छमनुजानापेहि[o]। अथ खलु तोमरो लच्छवि[p] भगवतो[q] पादौ शिरसा वन्दित्वा भगवन्तं[r] च त्रिष्खुत्तं प्रदक्षिणीकृत्वा भिक्षुसंघं च येन राजगृहं तेन प्रक्रामि[s]। अथ खलु तोमरो लेच्छवि येन राजा श्रेणियो बिम्बिसारस्तेनोपसंक्रमित्वा[t] राजानं श्रेणियं बिम्बिसारं साधु च सुष्टु च प्रतिसंमोदेत्वा एतदुवाच। वैशालीयं महाराज अमनुष्यव्याधि उत्पन्नो बहूनि प्राणिसहस्राणि अनयव्यसनमापद्यन्ति[u]। तर्हि[v] षच्छास्तारो[w] संमता आनीता काश्यपो च[x] पूरणो मस्करी[y]
Sen. 257
च गोशाली[z] अजितो च केशकम्बली[a] ककुदो च कात्यायनो संजयी च वेरट्टिकपुत्रो निर्ग्रन्थो[b] च ज्ञातिपुत्रो। एतेहि आगतेहि वैशालकानाममनुष्यव्याधि नोपशाम्यति[c]। ततो महाराज लेच्छवानां[d] देवताहि आरोचितं। एष बुद्धो भगवानसंख्येये[e] धर्मानुभावेन[f] हि समुदागतो[g] सदेवकस्य लोकस्य[h] लेनो[i] त्राणो शरणो परायणो देवातिदेवो[j] शास्ता देवमनुष्याणां नागानामसुराणां यक्षाणां राक्षसानां पिशाचानां कुम्भा[ष्मा]ण्डानां[k]। सो यं ग्रामक्षेत्रसीममाक्रमति[l] तत्र सर्वे[m] ईतिकलिकालकर्णी प्रशाम्यन्ति बुद्धानुभावेन

धर्मानुभावेन संघानुभावेन। [a]तमानेथ तेन आगतेन [b]वैशाल्यानाममनुष्यव्याधिः प्रशाम्यतीति। साधु महाराज भगवन्तमनुजानाहि वैशालिं गमनाये अनुकम्पामुपादाय। [c]एवमुक्तो राजा श्रेणियो [d]बिम्बिसारो तोमरं लेच्छविमेतदुवाच। [e]सचे [f]वासिष्ठ वैशालका लेच्छवयो भगवतो राजगृहातो वैशालिं गच्छन्तस्य एवं प्रत्युद्गमनं करोन्ति यावत्स्वकं विजितं [g]य[h]थाहमनुयानं करोमि यावत्स्वकं विजितं एतस्ये हं भगवन्तमनु[i]-जानये राजगृहातो वैशालिं गमनाय। अथ खलु तोमरो लेच्छवी राज्ञो [j]श्रेणियस्य [k]बिम्बिसारस्य प्रतिश्रुत्वा वैशालिं गणस्य [l]दूतां प्रेषयसि। [m]एवं [n]वासिष्ठाहो राजा श्रेणियो बिम्बिसारो जल्पति। अथ खलु ते दूता [o]तोमरस्य लेच्छविस्य प्रतिश्रुत्वा वैशालिं गत्वा लेच्छविगणस्य आरोचेसि। एवं [p]वासिष्ठाहो राजा [q]श्रेणिको बिम्बिसारो तोमरस्य [r]लेच्छविस्य जल्पति। [s]सचे वैशालका लेच्छवयो भगवतो राजगृहातो वैशालिं गच्छन्तस्य एवं प्रत्युद्गमनं [t]करोन्ति यावत्स्वकं विजितं यथा अहमनुयानं करोमि यावत्स्वकं [u]बिजितं एतस्ये हं भगवन्तमनुजा[v]नेयं राजगृहातो वैशालिं गमनाय। [w]एवमुक्ते वैशालेयका लेच्छवयः तां [x]दूतां……। [y]एतद्वक्तव्यो [z]वासिष्ठाहो राजा श्रेणियो बिम्बिसारो लेच्छविगणस्य वचनेन। [a]करिष्यन्ति महाराज [b]वैशालका [c]लेच्छवयो भगवतः Sen. 258 प्रत्युद्गमनं यावल्लेच्छवीनां विजितं। अथ खलु ते दूता लेच्छविगणस्य प्रतिश्रुत्वा राजगृहं गत्वा तोमरस्य [d]आरोचेन्सुः। [e]अथ खलु तोमरो लेच्छविः दूतानां वचनं प्रतिश्रुत्वा येन राजा श्रेणिको बिम्बिसारो [f]तेनुपसंक्रमित्वा राजानं श्रेणियं [g]बिम्बिसार-मेतदुवाच। करिष्यन्ति महाराज वैशालका लेच्छवयो [h]भगवतः [i]प्रत्युद्गमनं। साधु भगवन्तमनुजानाहि वशालिं गमनाय अनुकम्पामुपादाय। भगवां दानि राज्ञा श्रेणियेन [j]बिम्बिसारेण अनुज्ञातो वैशालिं [k]गमनाय अमात्या च आणत्ता [l]याव च राज[m]गृहं याव च गंगायाः तीर्थं मार्गं प्रतिजागृथ अष्टपदस[n]ममविषमं पाणितलजातं विततवितानं चित्र-दुष्यपरिक्षिप्तं ओसक्तपट्टदामकलापं धूपितधूपनं [o]सिक्तसंमृष्टं [p]मुक्तपुष्पावकीर्णं।

नावासंक्रमं बन्धापेथ[a] येन भगवां सश्रावकसंघो गंगायां तरिष्यति[b] वैशालि गमनाय।
अर्धयोजनिके[c] च अन्तरे मण्डपसंविधानं का[रापेथ अन्नपान] संविधानं[d] कारापेथ
शय्यासनसंविधानं[e] च भगवतः सश्रावकसंघस्य सर्वं सुखोपधानं[f] यथा भगवां[g] सश्रावक-
संघो राजगृहातो सुखं वैशालि गच्छेय भिक्षुसंघश्च।

मनसा देवानां[h] वचसा पार्थिवानां।
नचिरेणाढ्यानां[i] कर्मणा दरिद्राणामिति ।।८।।

राज्ञा च आणत्तं अमात्येहि च सर्वं[j] प्रतिजागृतं यथा आणत्तं।

भगवां[k] संप्रस्थितो सार्धं भिक्षुसंघेन। राजा श्रेणियो बिम्बिसारो[l] सयुग्यबल-[m]
वाहनो सदेवीकुमारामात्यपरिजनो[n] राजार्हेहि[o] पंचहि च्छत्रशतेहि धार्यमाणेहि ओसक्त-
पट्टदामकलापेहि सध्वजपताकेहि[p] महता राजानुभावेन महता राजऋद्धीये महताये
विभूषाये भगवन्तं वैशालि गच्छन्तं समनुयाति[q] अर्धयोजनिकेनान्तरावासेन[r][s] यावत्स्वकं
Sen: 259 विषयं[t] गंगायाः तीरं। अश्रोषुः[u] वैशालका लेच्छविका[v] एद्दशाये विधीये राजा श्रेणियो
बिम्बिसारो भगवतो अनुयानं करोति राजगृहातो वैशालिमागच्छन्तस्येति। श्रुत्वा च
पुनः याव च वैशाली[w] याव च गङ्गातीर्थं वैशालकानां लेच्छवीनां विजितमत्रान्तरे मार्गं
प्रतिजाग्रंसु[x] अष्टपद[y]सम[z]मविषमं[a] पाणितलजातं[b] सिक्तसंमृष्टं[c] मुक्तपुष्पावकीर्णं विततवितानं
चित्रदुष्यपरिक्षिप्तं ओसक्तपट्टदामकलापं धूपितधूपनं[d]। देशदेशेहि[e] च नटनर्तनऋल्ल-[f]
मल्लपाणिस्वर्या स्थापयेन्सु[g]। अर्धयोजनिकेन च अन्तरेण मण्डपसंविधानं च कारयेन्सु[h]
शय्यासनसंविधानं[i] च पानीयसंविधानं च भक्तसंविधानं च भगवतः सश्रावकसंघस्य।
अभ्यन्तरवैशालीतो[j] चतुरशीति रथसहस्राणि योजापयित्वा द्वे चतुरशीति रथसहस्राणि
योजापयित्वा सवैजयन्तिकानि[k] सनन्दिघोषाणि सपुष्पमालानि सच्छत्रध्वजपताकानि
प्रभूतं च गन्धमाल्यमादाय स्वकस्वकानि भद्राणि यानान्यभिरुहित्वा महता राजानु-
भावेन[l] महता[m] राजऋद्धीये[n] महतो जनकायस्य हक्कारहिक्कारभेरीमृदंग[o]मरुपणवशंखसन्नि-

नादेन वैशलीतो नगरातो निर्याता[a] भगवन्तं प्रत्युद्गच्छेन्सु[b] यावद्गङ्गातीर्थं[c] भगवतः[d] पूजार्थं[e]। तेषां[f] पि तं एवं संविधानरूपं अभूषि। सन्त्यत्र लेच्छवयः[g] नीलाश्वा नीलरथा नीलरश्मिप्रतोदा[h] नीलयष्टी[i] नीलवस्त्रा नीलालंकारा[j] नीलउष्णीषा नीलच्छत्रा नीलखङ्गमणिपादुकवालव्यंजना[k]। तत्रेदमिति उच्यते।

[l]नीलाश्वा नीलरथा नीला रश्मिप्रतोदमुष्णीषा[m]।
[n]नीला च पंच ककुदा नीला वस्त्रा अलंकारा ॥९॥

सन्त्यत्र लेच्छवयः[o] पीताश्वाः पीतरथा पीतरश्मिप्रतोदयष्टी[p] पीतवस्त्राः पीतालंकारा पीतोष्णीषा पीतच्छत्रा पीतखङ्गमणिपादुका[q]। तत्रेदमुच्यते।

पीताश्वा[r] पीतरथा पीता रश्मिप्रतोदमुष्णीषा[s][t]। Sen. 260
पीता[u] च पंच ककुदा पीता वस्त्रा[v][w] अलंकारा[x] ॥१०॥

सन्त्यत्र लेच्छवयो मंजिष्ठाश्वा[y] मंजिष्ठरथा मंजिष्ठप्रतोदयष्टी[z][a] मंजिष्ठवस्त्रा मंजिष्ठअलंकारा[b][c] मंजिष्ठउष्णीषा[d] मंजिष्ठच्छत्राः मंजिष्ठमणिपादुकवालव्यंजनाः। तत्रेदमुच्यते।

मंजिष्ठा[e] अश्वरथा मञ्जिष्ठ रश्मिप्रतोदयष्टी च।
मंजिष्ठ पंच ककुदा मंजिष्ठ[f] वस्त्रअलंकाराः ॥११॥

सन्त्यत्र लेच्छवयो[g] लोहिताश्वा लोहितरथा लोहितप्रतोदयष्टी[h] लोहितवस्त्रा लोहितालंकारा[i][j] लोहितउष्णीषा लोहितच्छत्राः लोहितखङ्गमणिपादुकवालव्यंजनाः[k]। तत्रेदमुच्यते।

[l]लोहिता अश्वा रथा च लोहित रश्मिप्रतोदयष्टी[m][n] च।
[o]लोहित च पंच ककुदा[p] लोहित वस्त्रा[q] अलंकाराः[r] ॥१२॥

सन्त्यत्र[a] लेच्छवयो श्वेताश्वा श्वेतरथा श्वेतप्रतोदयष्टी[b] च श्वेतवस्त्रा[c]: श्वेतालंकारा: श्वेतोष्णीषा: श्वेतच्छत्रा[d]: श्वेतखड्गा: श्वेतमणिपादुक[e]वालव्यंजना:। तत्रेदमुच्यते।

श्वेताश्वा[f] श्वेत रथा श्वेत[g] रश्मिप्र[h]तो[i]दयष्टी च।
श्वेता[j] च पंच ककुदा श्वेता वस्त्रा अलंकारा[k]:॥१३॥

सन्त्यत्र लेच्छवयो[l] हरिताश्वा हरितरथा: हरितरश्मिप्रतोदयष्टी च हरितवस्त्रा
Sen. 261 हरितालंकारा हरितोष्णीषा हरितच्छत्रा हरितखड्गा हरितमणिपादुक[m]वालव्यंजना:। तत्रेदमुच्यते।

हरिताश्वा हरित रथा हरिता[n] रश्मिप्रतो[o]दय[p]ष्टी च।
हरिता च पंच ककुदा हरिता[q] वस्त्रा अलंकारा[r]:॥१४॥

सन्त्यत्र लेच्छवयो व्यायुक्ताश्वा व्यायुक्तरथा व्यायुक्तरश्मि[s]प्रतोदयष्टी व्यायुक्तवस्त्रा व्यायुक्तालंकारा व्यायुक्तउष्णीषा व्यायुक्तच्छत्रा व्यायुक्तखड्गा व्यायुक्तमणि[t]पादुकवालव्यंजना:। तत्रेदमुच्यते।

व्यायुक्ता[u] अश्वरथा व्यायुक्त रश्मिप्र[v]तोदय[w]ष्टी च।
व्यायुक्त पंच ककुदा व्यायुक्त वस्त्र[x][y]अलंकारा:॥१५॥

सन्त्यत्र लेच्छवयो सुवर्ण[z]च्छत्रेहि कुंजरेहि नानालंकारभूषितेहि। सन्त्यत्र लेच्छवयो सुवर्ण[a]शिविकाहि सर्वरतनभूषिताहि। सन्त्यत्र लेच्छवयो सुवर्णमयेहि[b][c] रथेहि सवैजयन्तेहि सनन्दिघोषेहि सखुर[c]प्रवाशीहि उच्छ्रितच्छत्रध्वजपताकेहि। एवंरूपेण[d] अनुभावेन एवंरूपाये विधिये[e] एवंरूपेण समुदयेन एवंरूपाये राजऋद्धीये एवंरूपाये समृद्धीये एवंरूपाये[f] संवृत्ताये एदृशाये विभूषाये वैशालका लेच्छवयो द्वे चतुरशीतिहि यानसहस्रेहि[g] गोश्रृङ्गी[h] च आम्रपालिका[i] त्र तद्यथा सो पि महाजनकायो[j] भगवन्तं प्रत्युद्गता[k] यावद्गङ्गाया तीर्थं[l]।

भगवां गंगाये पारिमे[a] कूले राज्ञो श्रेणियस्य बिम्बिसारस्य[b] मागधकानां ब्राह्मणकानां धर्मया कथया[c] संदर्शयित्वा[d] समुत्तेजयित्वा[e] संप्रहर्षयित्वा[f] मागधकानां ब्राह्मणकानां चतूरशीति सहस्राणि धर्माभिसमये प्रतिष्ठापेत्वा येन वैशालका लेच्छवयो Sen. 262
तेन विलोकेत्वा भिक्षूणां आमन्त्रेति[g]। भिक्षवो न दृष्टपूर्वा देवा[h] त्रायस्त्रिशाः सुदर्शनातो नगरातो उद्यानभूमिमभिनिष्क्रमन्ता[i]। ते एतरहि[j] वैशालका लेच्छवयो[k] पश्यथ। तत्कस्य हेतोः। तादृशाये[l] व भिक्षवो ऋद्धिये[m] देवा त्रायस्त्रिशा सुदर्शनातो नगरातो उद्यानभूमिमभिनिष्क्रमन्ति।

स्फातानि राज्यानि प्रशाम्यमाना[n]
सम्यक् राज्यानि करोन्ति ज्ञातयो।
तथा इमे लेच्छवि[o]मध्ये[p] सन्तो
देवेहि शास्ता उपमामकासि ॥१६॥

त्रायस्त्रिशा[q] ये[r] हि[s] न दृष्टपूर्वा
उद्यानभूमिं[t] अभिनिष्क्रमन्ता।
एतादृशी समिति अभूषि तेषां
यथा[u] इयं समृद्धि लेच्छवीनां ॥१७॥

सुवर्णच्छत्रेहि च कुंजरेहि[v]
शिविकाहि[w] सौवर्णमयीहि चान्ये।
रथेहि सौवर्णमयेहि चान्ये
प्रत्युद्गमं[x] लेच्छविनो करोन्ति ॥१८॥

सर्वे समेत्वा सह ज्ञातिबन्धवो[y]
दहरा च मध्या च महल्लका च।
अलंकृता[z] लक्तकरक्तवस्त्रा
प्रत्युद्गता ते च विचित्रचारी ॥१९॥

[a]तहिं दानि गंगायां राज्ञो श्रेणियस्य [b]बिम्बिसारस्य नावासं[c]क्रमं अभ्यन्तर- Sen. 263 [d]वैशालकानां नावासंक्रमं [e]बाहिरवैशालकानां नावासंक्रमं गांगेयेहि नागेहि कम्बलाश्वतरेहि नावासंक्रमो कृतो। [f]भगवानस्मदीयेन उत्तरिष्यतीति।

शुकेन [g]गोश्रृंगीये वचनेन [h]भगवां [i]सश्रावकसंघो शुवेतनाय भक्तेन उपनिमन्त्रितो तस्य च भगवता [j]तूष्णीभावेनाधिवासितं। तेन शुकेन भगवतस्तूष्णीभावेनाधि[k]वासना बुद्धानुभावेन विज्ञाता। [l]सो भगवतः [m]पादा शिरसा वन्दित्वा [n]भगवन्तं [o]भिक्षुसंघं च प्रदक्षिणीकृत्वा [p]प्रत्यागतो। येन [q]गोश्रृंगी [r]भगवती तेनोपसंक्रमित्वा आह। निमन्त्रितो सो भगवां [s]तथागतोऽर्हं सम्यक्संबुद्धो [t]सश्रावकसंघो शुवेतनाये भक्तेन [u]त्वद्वचनेन अधिवासितं तेन भगवता तूष्णीभावेन।

भगवां [v]नावासंक्रमे [w]आरूढा। [x]राजा श्रेणियो बिम्बिसारो [y]स्वके नावासंक्रमे भगवन्तं पश्यति। [z]अभ्यन्तरवैशालका च स्वके नावासंक्रमे भगवन्तं पश्यन्ति [a]सश्रावकसंघं। बाहिरवैशालका स्वके नावासंक्रमे भगवन्तं पश्यन्ति [b]सश्रावकसंघं। कम्बलाश्वतरा पि गांगेयमहानागा स्वके नावासंक्रमे भगवन्तं पश्यन्ति सश्रावकसंघं तरमाणं। तेहि [c]कम्बलाश्वतरेहि गांगयेकेहि [d]राज्ञो श्रेणियस्य [e]बिम्बिसारस्य पंचच्छत्र-शतानि दृष्ट्वा वैशालकानां पि पंचच्छत्रशता दृष्ट्वा तेहि भगवतों तरन्तस्य पंचच्छत्र-शतानि प्रगृहीतानि। यक्षेहि पि पंचच्छत्रशतानि प्रगृहीतानि। चातु[g]र्महाराजकेहि पि पंचच्छत्रशतानि [h]प्रगृहीतानि। [i]सुनिर्मितेनापि देवपुत्रेण [j]ततो विशिष्ठतरं छत्रं प्रगृहातं। परनिर्मितवश[k]वर्तिहि पि चतुर्हि पि महाराजेहि पंचच्छत्रशतानि प्रगृहीतानि। त्राय[l]स्त्रिंशेहि पि देवेहि पंच च्छत्रशतानि [m]प्रगृहीतानि। शक्रेणापि देवानामिन्द्रेण च्छत्रं प्रगृहीतं। सुयामेनापि देवपुत्रेण च्छत्रं प्रगृहीतं। तुषितेहि देवेहि पंच [n]च्छत्रशता [o]प्रगृहीता। संतुषितेन [p]देवपुत्रेण ततो विशिष्टतरं छत्रं प्रगृहीतं।

ब्रह्मकायिकेहि[a] देवेहि पंच च्छत्रशतानि प्रगृहीतानि। महाब्रह्मणापि[b] ततो विशिष्टतरं छत्रं प्रगृहीतं। शुद्धावासेहि देवेहि[c] भगवतो गंगाये तरन्तस्य च्छत्रपंचशतानि[d] Sen. 264
प्रगृहीतानि। महेश्वरेणापि[e] देवपुत्रेण च्छत्रं प्रगृहीतं[f] भगवतो गंगाये तरन्तस्य[g]। केन[h] तानि सर्वाणि देवमनुष्यकाणि च्छत्रसहस्राणि समभिभूतानि।

आह्निककर्मिक[i]पार्थिवराजान[j] वंशनिर्वृत्ताहन्ति[k]।
अर्हति च महाभागो[l][m] स एष पुरुषर्षभो छत्रं[n] ॥२०॥
ये बाहिरा[o] जयित्वा रिपुसंघा अश्नन्ति अजितराज्या।
............संपन्ना ते पि नरा छत्रमर्हन्ति ॥२१॥
किं पुन[p] येन समन्ता सर्वक्लेशा जिता निरवशेषा।
अपि च नमुचि[q] ससैन्यो[r] न तु च्छत्रशतारहो भगवां ॥२२॥
तारकतरलप्रकाशान्तारकरूपानप्रतिभासां[s][t]।
वैडूर्य[u]रतनदण्डां च्छत्रशतां[v] पंच आदाय ॥२३॥
राजा बिम्बिसारो[w][x] अण्वति पृष्ठतो दशबलस्य[y]।
संप्रस्थितो[z] च भगवां वज्जि अभिमुखो सहगणेन ॥२४॥
नावाय समभिरूढो[a] भगवां भवति भवौघं उत्तीर्णो।
पारे[b] च लेच्छविगणाः छत्रशतां पंच[c] धारेन्सुः ॥२५॥
अथ पश्यिया[d] महीपतिं[e] महामहीधरमहाबलनिकेता[f]।
नागा पि गंगनिलया छत्रशता पंच धारेन्सुः[g] ॥२६॥
ऋद्धिमन्तो[h] द्युतिमन्तो[i] धरणिपथगता महाबलनिकेता।
यक्षा[j] पि तत्र असुरा मुदिता छत्रशता पंच धारेन्सु ॥२७॥
आगलितमाल्यमुक्ता[k] उडुपतिपरिपूर्णचारुचन्द्रमुखा[l]।

Sen. 265 देवा पि तत्र मुदिता छत्रशतां[a] पंच धारेन्सुः[b] ॥२८॥
चतुरो पि लोकपाला प्रमुदितमनसा विगतमदनमाना[c] ।
नटकरजविधमनकरा[d][e] धारेन्सु धरणिधरसमस्य ॥२९॥
अथ सो त्रिदशाधिपतिः कांचनमणिरत्नसुकृतवरजालं[f][g] ।
रक्तकुसुमसुकृतदामं छत्रं[h] जगाग्रस्य धारेसि ॥३०॥
यमवरुणनागवन्दितं[i][j] यामाधिपतिं उपेत्य[k] वसुयामा[l] ।
शरदजलाभ्रपाण्डरं[m][n] धारयि[o] घनपवनगतिस्य ॥३१॥
तुषितभवनाधिवासी[p] पुन[q] भगवतो उपगतो अप्रमोहो ।
संवर्तितखरसमवपु[r][s][t] धारयि[u] च्छत्रं प्रसन्नमनो ॥३२॥
वडूयसुकृतदण्डं[v][w] प्रावाडदशशतशलाकाचित्रं[x] ।
फुल्लकुसुमास्थिततलं[y][z] सुनिर्मितो[n] धारये छत्रं[b] ॥३३॥
परनिर्मितवशवर्ती[c] निर्मिणे वरकनकभारसंछन्नं ।
रत्नहारलम्बदामं[d][e] छत्रं त्रैलोक्यकीर्तिस्य[f] ॥३४॥
ब्रह्मा[g] प्रसन्नमनसो पवनपथविशुद्धहृदयस्य ।
धारेसि चन्द्रसन्निभं छत्रं[h] परवादिमथनस्य ॥३५॥
सप्तरतनामयं पुन[i] दिव्यकुसुमामयं दाममण्डितं[j] ।
छत्रं छत्रारहस्य[k][l] महेश्वरो धारये छत्रं ॥३६॥
इत्येष[m][n] सुराधिपेन कामावचरो संघो सन्निपतितो ।
महा[o] अभु[p] महेश्वरेण अतुलबलधरस्य पूजार्थं ॥३७॥

Sen. 266 भगवता यत्तकानि[q] तानि च्छत्राणि तत्तका बुद्धा[r] निर्मिता । ते अन्यमन्यस्य न पश्यन्ति भगवन्तं[s] । तेषां प्रत्येकं[t] प्रत्येकं एतदभूषि । मम[u] येव[v] च्छत्रे नाथो[w] तिष्ठति

सुगतो तिष्ठति ध्वजो[a] तिष्ठति। देवा[b] च मनुष्या च याव अकनिष्ठभवनं पश्यन्ति[c] बुद्धानुभावेन।

अथ[d] भगवां पुरुषचन्द्रो[e] तानभिनिर्मिणेसंबुद्धानृद्धि।

भगवां विदर्शये[f] न च अन्यमन्यस्य पश्यन्ति ॥३८॥
अकनिष्ठभवनगता[g] तु दशबलबुद्धा[h] अम्बरं प्रसदनियं[i] ।
शोभेन्ति[j] गगणतलगता यूपमिव यथा रतनचित्रं ॥३९॥
सर्वे सुवर्णवर्णा[k] सर्वे द्वात्रिंशलक्षणसमंगी[l] ।
सर्वे कनकगिरिनिभाः[m] सर्वे[n] वरवारणगतीकाः[o] ॥४०॥
सर्वे मनापाकारा[p] सर्वेषां शोभते प्रभाजालं ।
सर्वे अमितगुणधराः सर्वे प्रामोद्यसंजननाः[q] ॥४१॥
दृष्ट्वान देवमनुजा गगनतलं शोभन्तं दशबलेहि[r] ।
अतिरिव उद्बिल्यहर्षा[s] हाहाकारं उदीरेन्सुः ॥४२॥
आस्फोटित[t]प्रक्ष्वेडित[u] कलकलसमाकुला[v] अभिवतन्ति ।
मुंचेन्सुः[w][x] अम्बरगता[y] वरचूर्णरजाकुलं[z] सुरभि ॥४३॥

तं भगवतस्तादृशं[a] बुद्धविकुर्वितं ऋद्धिप्रातिहार्यं[b] दृष्ट्वा अतीव देवा भगवतः पूजां करेन्सुः[c] मान्दारवेहि महामान्दारवेहि कर्कारवेहि महाकर्कारवेहि रोचमानेहि महारोचमानेहि भीष्मेहि महाभीष्मेहि[d] समन्तगन्धेहि महासमन्तगन्धेहि[e] पारियात्रक- Sen. 267
पुष्पेहि सुवर्णपुष्पेहि रूप्यपुष्पेहि रजतपुष्पेहि चन्दनचूर्णेहि अगरुचूर्णेहि केशरचूर्णेहि[f] भगवन्तमोकिरेन्सु[g] अभ्योकिरेन्सु[h] समन्तात्षष्टि[i] योजनां दिव्येहि च गन्धचूर्णेहि[j] जानुमात्रमोघो[k] संवृत्तो[l]। भिक्षू भगवन्तमाहन्सुः। किमयं भगवन्देवानुभावो नागानुभावो यक्षानुभावो[m] येन इमानि दानि च्छत्रसहस्राणि देवेहि च नागेहि च राजानेहि च प्रगृहीतानि ? भगवानाह। तथागतस्यैष भिक्षवः पौराणस्य कुशलधर्मस्य

अनुभावो। यदि तथा[a]गतोऽनुत्तरां सम्यक्संबोधिमभिसं[b]बुद्धो न भविष्यति संसारे संसरन्तो भ[c]गवन्तो य[d]त्तका एतानि च्छत्राणि तत्तकानि चक्रवर्तिराज्यानि कारयिष्येत्। [e]अथ च पुनस्तथागतस्य सर्वपुण्यपापक्षयतो परिनिर्वाणं भविष्यति।

भगवानिदानि आयुष्मन्तं वागीशमाम[f]न्त्रेसि। प्रतिभातु ते [g]वागीश तथागतस्य पूर्वयोगो। [h]साधु [i]भगवन् आयुष्मां [j]वागीशो भगवतः प्रतिश्रुत्वा ताये वेलाये इमां गाथां [k]बभाषे।

अभूच्छा[l]स्ता अतीतस्मिं ब्राह्मणो अकुतोभयो।
[m]प्रहीणजाति ब्राह्मणो ब्रह्मचर्यस्मिं केवली ॥४४॥
सत्वां दुःखितां [n]दृष्ट्वान दुःखधर्मसम[o]र्पितां।
धर्म[p]चक्रं प्रवर्तेसि आभां [q]कासि अनुत्तरां ॥४५॥
धर्मचक्रं प्र[r]वर्तित्वा आभां कृत्वा अनु[s]त्त[t]रां।
संबुद्धो परिनिर्वायेत् महर्षिः क्षीणपुनर्भवो ॥४६॥
तस्य स्तूपमकरेन्सुः श्रा[u]वका अकु[v]तो[w]भया।
[x]शैक्षा उत्तमा दान्ताश्च अक[y]रेन्सु कीर्ति[z]हेतवे ॥४७॥
[a]क्षत्रिय[b]ब्राह्मणवैश्या पूजां [c]कासि महर्षिणो।
Sen. 268 [d]नृत्यवादित्रगीतेन नानामाल्य[e]समागता ॥४८॥
ब्राह्मणो पि विचिन्तेति पिता बुद्धस्य पण्डितो।
यं नूनं [f]छत्रं [g]कारेयं रत्नाकृतं [h]शुभपाण्डरं ॥४९॥
[i]विमलं छत्रं [j]स्तूपस्मिं अधिरोपिय संचिते।
[k]अश्रूणि च प्रवर्तेन्तो पिता पुत्रमपूजयि ॥५०॥
सो तं कर्मं करित्वान कल्याणं [l]बुद्धवर्णितं।
ब्राह्मणो अकरि कालं [m]जातानामेव धर्मता ॥५१॥

[a]संवर्ताश्च विवर्तांश्च अशीतिन्तेन कर्मणा ।
दुर्गतिं [b]नोपलभते एतत्च्छत्रस्य तत्फलं ॥५२॥
[c]मनुष्येषु तदा राज्यं धर्मेण अनुशासयं ।
पृथिव्यां [d]चक्रवर्त्यासि विजितावी महाबलो ॥५३॥
[e]चित्रा जनपदा आसि [f]अनुयात्रा[g]सि क्षत्रिये ।
[h]तमेव [i]अपचायेसि श्वेतछत्रं [j]ददत्सुखं ॥५४॥
[k]ततो चापि च्यवित्वान [l]देवेषु उपपद्यिथ ।
मरूणां [m]प्रवरो आसि [n]देवकायान पूजितो ॥५५॥
पूजितो [o]मरुसंघानामैश्वर्य[p]कम्बलस्थितो ।
[q]वसन्तत्रापि वर्तेसि श्वेतच्छत्रस्य तत्फलं ॥५६॥
[r]देवानामुत्तमो आसि मनुष्याणां पि उत्तमो ।
[s]सर्वत्र उत्तमो आसि देवानां [t]मनुजान च ॥५७॥
[u]देवानामुत्तमः भूत्वा मनुष्याणां च उत्तमो ।
तं भवञ्च [v]विजहित्वान आगत्वा पश्चिमं भवं ।
संबुद्धो पि [w]प्रजायासि ऋषि क्षीणपुनर्भवा ॥५८॥ Sen. 269
सो तं [x]मार्गं [y]वाभिज्ञाये [z]दुःखप्रशमगामिनं ।
यस्य मार्गस्य प्रतिलाभा दुःखस्यान्तं [a]करीयति ॥५९॥
[b]तं चात्र अतीता [c]बुद्धा तं च [d]वीरो प्रतापवां ।
सर्वे [e]समशीलप्रज्ञा नास्ति [f]बुद्धान अन्तरं ॥६०॥
ये च ते [g]हि कालेकाले [h]संबुद्धा नात्र संशयं ।
सर्वे ते सुगतिं यान्ति आत्मकर्म[i]फलोपगाः ॥६१॥

चक्षुमां ब्राह्मणो[a] आसि अन्तेवासिश्च ते अहं ।
त्वयाहं चोदितो वीर [b]पूर्वां जातिमनुस्मरेत् ॥६२॥
[c]एवमेव [d]एतदासि यथा भाषसि [e]वागीश ।
[f]ब्राह्मणोऽहं तदा आसि [g]अन्तेवासी च मे भवं ॥६३॥
मया त्वं [h]चोदितः सन्तो [i]पूर्वां जातिमनुस्मरेत् ।
[j]तस्मा ध्वजपताकां च श्वेतच्छत्रं च कारयेत् ॥६४॥
वेदिकां चैव [k]स्तूपेषु [l]कुर्यात्पंचांगुलानि च ।
[m]साधु [n][o]पुण्यवरं [p]विपुलं [q]दायकमधिवर्तति ॥६५॥
[r]एषा [s]चान्या च या पूजा [t]बुद्धमुद्दिश्य क्रियते ।
[u]सर्वा अबन्ध्या [v]सफला भवति अमृतोपगा ॥६६॥
[w]न हि अर्चनां समां लोके पश्यामि विशिष्टतरां [x]कुतो ।
[y]यं च अन्यं पूजयन्तो पुण्यं यासि [z]महत्तरं ॥६७॥
[a]सचे कोचिमस्मि [b]लोकस्मि सर्वा पि देवता सदा ।
Sen: 270 पूजेय [c]सर्वरतनैः [d]नैवं से [e]प्रतिकृतं सिया ॥६८॥
एवं महायशा महाकारुणिका अनुकम्पा[f]हितामिता ।
ओदुम्बरमिव कुसुमं [g]न हि सुलभदर्शना संबुद्धाः ॥६९॥

अथ मे [h]भणन्ति वर्णं समाधितो च शीलतो च [i]प्रज्ञातो च अधिगमनतो च निष्क्रमणतो च प्रयोगतो च जात्यतो च भूततो च भवन्ति [j]महेशाख्या च [k]कृतपुण्या तासु तासु जातीषु [l]आदेयवचना च भवन्ति कीर्तनीया च बहुजनस्य ।

[m]तेनैव कुशलमूलेनारोपितेन [n]उत्तरि ।
[o]प्रावरणं [p]अल्पकिसरं तेषां भवति [q]कायिकं ॥७०॥

तस्मात्पुण्यानि [a]कुरियात् निचयं सांपरायिकं ।
पुण्यानि [b]परलोकस्मि निष्ठा भवति प्राणिनां ।।७१।।

[c]भगवां गंगामुत्तीर्णो वैशालीये [d]च सीमामाक्रान्तो। भगवता ते [e]अमनुष्यका [f]पलाना। मारेण पापीमता भगवतो गच्छन्तस्य यत्तं लेच्छवीहि [g]मार्गं [h]मुक्तपुष्पावकीर्णं [i]सिक्तसंमृष्टं प्रतिजाग्रितं तं [j]सर्वं [k]प्राणकेहि [l]स्फुटं। निर्मितो [m]कुण्डलो नाम परिव्राजको। सो भगवतो तेन मार्गेण गच्छन्तस्य आह। [n]निवर्तोहि।

बहूहि प्राणेहि मही संवृता
अणूहि स्थूलेहि च मध्येहि च।
बुद्धो यदा गच्छति [o]भूतसंस्तृते
[q]व्यथा ततो उपपद्यति [r]आक्रमे ।।७२।।

भगवानाह। Sen. 271

मृदु [s]संस्पर्शः यो [t]तथागतानां
[u]तूर्णं [v]यथा ओतरितमारुतानां।
न हि [w]बुद्धश्रेष्ठान तथागतानां
शरीरमागम्य वधो [x]प्रजायति ।।७३।।
[y]भयचेतना नास्ति [z]विहेठना वा
प्राणेषु सो गच्छति [a]अप्रतिघो [b]भगवान्।
सर्वेहि भूतेहि [c]निवापषण्डं
भगवता [d]हरितशाद्वलं निर्मितं ।।७४।।

भगवां उपविष्टो भिक्षुसंघो च। ते लेच्छवयो भगवन्तं [e]पृच्छन्ति। कस्य [f]भगवता [g]शुवे आगारमधिवासितं [h]अभ्यन्तरवैशालकानां बाहिरवैशालकानां वा ?

भगवानाह। न हि वासिष्ठाहो[a] अभ्यन्तरवैशालकानां तथागतेनाधिवासितं न बाहिरवैशालकानां। गोश्रृंगीये[b] मनुष्यालापिको शुको प्रेषितो गंगाये[c] पारं। तेन तथागतो[d] सश्रावकसंघो[e] गोश्रृंगीये वचनेन शुवेतनाय[f] भक्तेन उपनिमन्त्रितो। तथागतेनाधिवासितं। ते दानि लेच्छवयो अभ्यन्तरवशालका[g] च[h] दुवेचतुरशीति[i] राजान सहस्राणि अन्यो[j] च महाजनकायो[k] क्षत्रियमहाशाला गृहपतिमहाशाला[l] विस्मयसम्पन्नाः कथं शुको जल्पतीति[m]? भगवानाह। किमत्राश्चर्यं गोश्रृंगीये शुको जल्पति मानुषिकाय वाचाय। अन्येहि[n] पि वासिष्ठाहो पक्षिभूतेहि राज्यं व्यवहरितं।

भूतपूर्वं वासिष्ठाहो[o] अतीतमध्वाने नगरे बाराणसी[p] काशिजनपदे ब्रह्मदत्तो नाम राजा राज्यं कारयति कृतपुण्यो महेशाख्यो महाबलो[q] महाकोशो महावाहनो। तस्य च
Sen. 272 राज्यं ऋद्धं च स्फीतं च क्षेमं[r] च सुभिक्षं च आकीर्णजनमनुष्यं[s t] च बहुजनमनुष्याकीर्णं च सुखितजनमनुष्यं च प्रशान्तदण्डडमरं[u] सुनिगृहीततस्करं व्यवहारसम्पन्नं। विस्तीर्णो च अन्तःपुरो अपुत्रो[v] च। तस्य राज्ञो भवति[w]। कथं मे पुत्रो भवेया[x]? स श्रृणोति[y] अमात्यानां[z]। अनुहिमवन्ते आश्रमे ऋषयो महानुभावा[a] प्रतिवसन्ति पंचाभिज्ञा चतुर्ध्यानलाभिनो ते पृच्छितव्या[b] कथं पुत्रो भवेय। ते महानुभावा[c d] ऋषयो आचिक्षिष्यन्ति[e f] यथा देवस्य पुत्रो भविष्यति। सो दानि राजा सान्तःपुरो सकुमारामात्यो[g] सबलवाहनो येन तेषामृषीणामाश्रमस्तेन संप्रस्थितो। अन्तरमार्गे[h] वासमुपगतो राजा सबलवाहनो[i] सान्तःपुरो। तेन तहिं दृष्टा[j] साम्बलीकोटरातो[k] त्रयो पक्षियो[l] निर्यान्तायो उलूकी शारिका शुकी। तस्य दानि राज्ञो[m n] दृष्ट्वा कौतूहलं संजातं। तेन पुरुषो आणत्तो[o] गच्छ जानाहि किमत्र कोटरे[p]? सो आरुह्य निध्यायति पश्यति[q] त्रीणि[r] अण्डकानि। सो आह। देव[s] त्रीणि अण्डकानि[t]। राजा आह। पृथक् पृथक्[u] पुटके बन्धिय[v] ओतारेहि[w] यथा न विपद्यन्ते[x]। तेन पुरुषेण पुटकस्मि[y z] पृथक्पृथग्बन्धिय[a b] ओतारिता

अविपन्नाः। अमात्या पृच्छीयन्ति। कस्येमानि[a] अण्डकानि ? अमात्या आहुः। एतेषां[b] खु शाकुन्तिका पृच्छीयन्ति। एतेषामत्र[c] विषयो। शाकुन्तिका शब्दापिता[d]। शाकुन्तिका राज्ञा[e] पृच्छीयन्ति। राजा आह[f]। भो भणे जानाथ[g] कस्य[h] इमान्य-ण्डकानि[i] ? ते तत्र चरिता शाकुन्तिकाः सर्वेषां पक्षीजातीनां[j] अण्डकानां विधिज्ञा पक्षिणां पि विधिज्ञा यो यादृशो पक्षीति।[k] ते आहन्सु। महाराज[l] इमानि त्रीण्यण्डकानि एकमुलूकीये[m] द्वितीयं शारिकाये[n] तृतीयं शुकीये। राजा आह। किं भव्यान्येतानि अण्डकानि[o] अभिनिर्भेदाय[p] ? ते आहन्सुः। भव्यानि[q] महाराज ओतारितानि अवि- Sen. 273
पन्नानि। राजा पृच्छति[r]। को[s] एतेषामण्डकानामुपचारो यथैते उपचीर्णा विद्येन्सुः[t] स्वस्तिना[u] च अभिनिर्भेदं गच्छन्ति ? शाकुन्तिका आहन्सुः[v]। महाराज[w] विहतं[x] कार्पासं उभयत्राश्रये[y] संस्तरितव्यं। तत्र[z] एतानि अण्डकानि मधुसर्पिषा म्रक्षित्वा निक्षिप्तव्यानि[a] उपरि विहतं[b] कार्पासन्तमेते मातृकार्थं[c] पोषिष्यति[d]। यथा तेहि शाकुन्ति-केहि आणत्तं तथा तानि अण्डकानि[e] निक्षिप्तानि। राजा तं ऋषीणामाश्रममनुपूर्वेणा-[f]नुप्राप्तो। एकान्तेन[g] बलवाहनं स्थापयित्वा सान्तःपुरो[h] ऋषीणामाश्रममुपसंक्रान्तो[i]। ऋषयो राजानं दृष्ट्वा प्रत्युद्गताः[j] यथा ऋषीणां समुदाचारो। स्वागतं महाराज[k] अनुरागतं महाराज निषीदतु महाराजा[l] इमान्यासनानि। राजा[m] सान्तःपुरो[n] ऋषीणां[o] पादा वन्दित्वा निषण्णो[p]। ऋषीणां महत्तरको कुलपती[q]। सो तं राजानं प्रतिसंमोदेत्वा[r] पृच्छति। किं महाराज आत्मनो[s][t] प्रयोजनं ऋषीणां सकाशातो[u]। राजा आह। मम विस्तीर्णो[v] अन्तःपुरो[w] न कस्याचित्पुत्रो[x] अपुत्रोऽस्मि[y] यं इच्छामि संदिशयतु यथा मे पुत्रो भवेय। ऋषीणां महत्तरको आह। महाराज यानि तानि त्रीणि अण्डकानि[z] अमुकातो शाम्बलीकोटरतो ओतारितानि[a] तानि[b] वेष्टावेहि ततो[c] ते पुत्रा भविष्यन्ति। राजा विस्मितो[d]। महाभागा[e] इमे ऋषयो यन्तं[f][g][यं तं]नाम यं इमानि अमुकातो शाम्बलीकोटरातो[h][i][j] त्रीणि अण्डकानि[k] ओतारापितानि इमेषामिह आश्रमे प्रतिवसन्तानां विदितं[l]। महाभागा[m]

इमे ऋषयो[a]। सो ऋषीणां पादा वन्दित्वा भूयो वाराणसीं[b] संप्रस्थितो। अनुपूर्वेण वाराणसीं[c] प्रविष्टो[d]। तानि अण्डकानि[e] कालेन समयेन सर्वाणि त्रीणि[f] प्रभिन्नानि[g]। Sen. 274 एकतो उलूकपोतको[h] जातो द्वितीयातो[i] शारिकपोतको[j] जातो[k] तृतीयातो शुकपोतको[l] जातो। राजाणत्तीये उन्नीयन्ति वर्धीयन्ति[m]। यत्र वेलाये[n] संवृद्धा सर्वे त्रयो पण्डिता मेधाविनो मनुष्यालापिनो मनुजाये वाचाये आलापसंलापं करोन्ति परस्परं। सो[o] दानि राजा ब्रह्मदत्तो तेषां बुद्धिबलं ज्ञात्वा पृथक्पृथक् राजधर्मं पृच्छति। ते[p] च ज्ञात्वा व्याकरोन्ति[q]। तेषां व्याकरणं श्रुत्वा सर्वेषां त्रयाणां राजा ब्रह्मदत्तो प्रीतो संवृत्तो।

वाराणस्यामभूद्राजा ब्रह्मदत्तो प्रतापवान्।
तस्य राज्ञो[r] अभूत्पुत्रा[s] सकुना त्रीणि पण्डिताः ॥७५॥
प्रथमो कौशिको[t] आसि द्वितीयो आसि शारिको[u]।
तृतीयो च शुको आसि[v] सर्वे पण्डितजातिकाः ॥७६॥
तेषां[w] बुद्धिबलं ज्ञात्वा तुष्टो राजा जनाधिपः।
राजधर्माणि[x] पृच्छेयं[y] सर्वां[z] प्रत्येकशो रहे ॥७७॥
कौशिकं तावं[a] पृच्छामि शकुन्त भद्रमस्तु ते।
राज्यं प्रशासमानस्य[b] किं कृत्यं पुत्र मन्यसे ॥७८॥

कौशिको आह।

चिरस्य[c] वत मां तातो राजधर्माणि पृच्छति।
हन्त तेऽहं प्रवक्ष्यामि[d] एकाग्रमनसो श्रृणु ॥७९॥
न[e] क्रोधस्य वसं गच्छे स तु क्रोधं निवारयेत्।
न हि क्रुद्धस्य अर्थो वा धर्मो वा क्रमति[f] पार्थिव ॥८०॥
अक्रुद्धस्य हि राजस्य अर्थो धर्मो जनाधिप[g]।
प्रज्ञा क्रमति सर्वत्र तस्मा[h] क्रोधं निवारयेत् ॥८१॥

ततो [a]विवादे उत्पन्ने उभौ पक्षौ स[b]माहितः । Sen. 275
उभाभ्यां वचनं श्रुत्वा यथा[c]धर्मं समाचरेत् ॥८२॥
मा च च्छन्दा च दोषा च भया मोहा च पा[d]र्थिव ।
उभाभ्यां वचनं श्रुत्वा यथा[e]धर्मं समाचरेत् ॥८३॥
न त्र ग[f]च्छति सो हानिं पण्डितो ह्यर्थकारणात् ।
[g]यशकीर्तिश्च रक्षन्तो स्व[h]र्गं मार्गेति पार्थिव ॥८४॥
ततो अधर्मं [i]वर्जेत्वा राजधर्मेहि पार्थिव ।
अनुशास महीपाल [j]एवं तत्र गमिष्यसि ॥८५॥
रञ्जनीयेषु कामेषु मातिवेलं प्रमोद्यहि ।
प्रमत्तस्यहि कामेहि परशत्रु [k]वलीयति ॥८६॥
[l]ततो नगरवृत्तानि सर्वाणि अनुव[m]र्तये ।
[n]अथ जान[o]पदवृत्तं धर्मेण अनुवर्तयेत् ॥८७॥
पौरजानपदं [p]राष्ट्रं गुणेहि अभिधारयेत् ।
भोगद्रव्य[q]प्रदानेन [r]कृत्यानां करणेन च ॥८८॥
ततः परिजनं [s]सर्वं वट्टेन अभिधारयेत् ।
भो[t]गद्रव्यप्रदानेन अभेद्यपुरुषो भवे ॥८९॥
[u]अनुरक्तं विरक्तं च [v]सर्वं जानेसि पार्थिव ।
[w]बलाग्रे उपजीविषु पौरजानपदेषु च ॥९०॥
प्रत्यवेक्षित्वा कर्मान्ता [x]भूतां ह[y]र्षाणि दापयेत् ।
[z]सर्वेषु हिंसां वर्जेत्वा धर्मेण फलमादिशेत् ॥९१॥
यथा [a]पूर्वकेहि राजेहि [b]आगतां जनतां बहुं ।
यथा राष्ट्रं [c]निवेशेय तथा कुरुहि पार्थि[d]व ॥९२॥

अनुग्रहं च दीनानां[a] आढ्यानां परिपालनं ।
Sen. 276 सदा विजितवासीनां करोहि मनुजाधिप[b] ॥९३॥
धनक्रीडारतो[c] राजा परदारनिरतस्सदा[d] ।
राष्ट्रस्य[e] अप्रियो भवति क्षिप्रं जहति जीवितं ॥९४॥
अलुब्धो[f] पुनर्मेधावी परदारविरतः[g] सदा ।
राष्ट्रस्य[h] प्रियो[i] भवति सुचिरं तात जीवति ॥९५॥
वरबन्धं[j] च मा कुर्या[k] पाटिराजेहि पार्थिव ।
यो[l] वैरी हि महीपाल[m] वैरमर्पेन्ति[n] वैरिणः ॥९६॥
मित्रबन्धं[o] च कुर्यासि[p] पाटिराजेहि पार्थिव ।
दृढमित्रां[q] हि राजानो पूजेन्ति[r] अपरा प्रजा ॥९७॥
प्रकीर्णोच्चारणो[s][t] मासि सर्वार्थेहि जनाधिप[u] ।
हेतुकारणसंयुक्तं[v][w] मन्त्रं कालेन व्याहरे ॥९८॥
गुह्यमर्थं[x][y] च धारेहि सदा वारेहि[z] पार्थिव[a] ।
भिन्नमन्त्रा[b] हि राजेन्द्रा अनुभोन्ति[c] व्यसनं बहुं ॥९९॥
गुह्यमर्थं धारयित्वा लभते[d] विपुलां शिरिं ।
न[e] चामित्रवसमेति पश्चात्त्र नानुतप्यति ॥१००॥
येऽमूढमन्त्रा[f][g] अविकीर्णवाचा[h]
युक्ताश्च कार्यार्थे जना नरेन्द्र ।
न तेषु[i] शत्रू जनयन्ति[j] क्रोधं
मणिविषाणां यथा शतघ्नीयो ॥१०१॥
गुह्यकमर्थसंबन्धं[k] संधारयति यो नरः ।
Sen; 277 सत्रु[l] भेदभयात्तस्य दासभूतो[m] व वर्तति ॥१०२॥

धर्मस्थितेषु[a] आरक्षां सदा कुर्यासि पार्थिव[b] ।
बलचक्रं[c] हि निश्राय धर्मचक्रं प्रवर्तते ॥१०३॥
धर्मस्थितानां[d] तेजेन सर्वा शाम्यन्ति[e] ईतयो ।
समयेन वर्षन्ति[f][g] देवा शस्यं निवर्तते तर्हि ॥१०४॥
दृष्टधर्मे[h][i] हितार्थं च संपराये सुखानि च ।
एवं भोति महाराज गुणवन्तेषु यत्कृतं ॥१०५॥
तस्मात्तं परिरक्षेया राजा[j] धर्मेण पार्थिव ।
तं हि राज[k] हितं तुह्यं राष्ट्रस्यापि च तं हितं ॥१०६॥
समीक्षाकारी[l] अस्या हि सर्वार्थेहि जनाधिप ।
कोष्ठागारे[m] च कोष्ठे च अप्रमत्तश्च संभव ॥१०७॥
एतावती अर्थवती एषा[n] मह्यानुशासनी ।
तं सर्वमोगृहीत्वान एवं कुरुहि[o] पार्थिव ॥१०८॥
एवं ते प्रतिपन्नस्य यशो कीर्तिश्च भेष्यति ।
क्षेमं[p] भविष्यते राष्ट्रं[q] ऋद्धं[r] स्फीतं जनाकुलं ॥१०९॥
कौशिकस्य श्रुत्वा वाक्यं श्रेष्ठं[s] धर्मार्थसंहितं ।
तथा शारिकं[t] पृच्छामि[u] राजधर्मा[v] ब्रवीहि मे ॥११०॥

सारिकपोतो[w] आह ।

चिरस्य वत मां तात राजधर्माणि पृच्छसि ।
हन्त[x] तेऽहं प्रवक्ष्यामि एकाग्रसनसो शृणु ॥१११॥
द्विभिस्तु[y] पादकैस्तात अत्र लोकः[z] प्रतिष्ठितः[a] ।
अलब्धलाभो[b] अर्थस्य लब्धस्य परिरक्षणं[c] ॥११२॥

तस्मादर्थस्य लाभार्थं[a] लब्धस्य परिरक्षणे[b] ।
Sen: 278 दृढं कुर्यासि व्यायामं धर्मेण[c] मनुजाधिप ॥११३॥
यो वै भूमिपतिर्देव अधर्मेणानुशासति ।
राष्ट्रं[d] स्य दुब्बलं[e] भोति च्छिद्रभूतं समन्ततः ॥११४॥
यो च भूमिपतिर्देव[f] धर्मेण[g] अनुशासति ।
राष्ट्रं[h] स्य स्थावरं[i] भवति ऋद्धं[j] स्फीतं जनाकुलं ॥११५॥
निगृह्ले[k] निगृहीतव्यं प्रग्रहार्हां[l] च प्रगृह्ले ।
संगृह्ले[m] संगृहीतव्यां[n] अनुग्रहरुचिर्भव ॥११६॥
यो निग्रहं न जानाति[o] प्रग्रहं वा जनाधिपः ।
संग्रहानुग्रहं चापि सो अर्था परिहायति ॥११७॥
पुत्रांश्च[p] भ्रातरां[q] चापि शूरां[r] साहसिकां[s] छवां ।
मा[t] त्वन्ते ईश्वरां कासि[u] ग्रामे जनपदेषु[v] वा ॥११८॥
अनुग्रहं[w] कुर्या[x] भूपो मातापितार्थं पार्थिव[y] ।
विमानिता[z] हि दायद्या उद्भ्रान्ता[a] भोन्ति[b] शत्रवः ॥११९॥
पंच राष्ट्रा भवे[c] राज्यं कुटिलशत्रुसेवितं[d] ।
मा[e] तां च विश्वसे तत्र मा च प्रतिपद्ये उत्पथे ॥१२०॥
उत्पथे[f] च प्रतिपन्नो क्षत्रियो[g] च वसानुगो ।
अमित्राणां वसमेति पश्चाच्च अनुतप्यति ॥१२१॥
आत्मना[h] बललाभार्थं[i] अमित्राणां पि निग्रहे ।
राष्ट्रस्य[j] अनुकम्पार्थं संतुलेहि जनाधिप[k] ॥१२२॥
समीक्षियान[l] कथय रात्रौ वा यदि वा दिवा ।
उपश्रोता[m] हि तिष्ठन्ति ते श्रुत्वा विकरेन्सु[n] ते ॥१२३॥

शूरो [a]व्यावर्त्यंते [b]क्षि[c]प्रं आढ्यः संगृह्णते बलं । Sen. 279
अर्थवशी [d]मन्त्रबली [e]कुपितो करेऽर्थं न ते ॥१२४॥
[f]तस्मादर्थवसं विप्रं सपुत्रदारं प्रवासयेत् ।
आढ्यं [g]मन्त्रवरं [h]वैश्यं तनुं वापि शठंशठं ॥१२५॥
अमात्यं देव [i]कुर्यासि पण्डितम[j]र्थचिन्तकं ।
[k]अलुब्धमनुरक्तं च राष्ट्रस्य परिणायकं ॥१२६॥
दुष्प्रज्ञानाममात्यानां [l]प्रज्ञाविकल्पकारिणां ।
[m]राष्ट्राणि दुःखमेधन्ति [n]राष्ट्राधिपतिना सह ।१२७॥
[o]पण्डितानाममात्यानां [p]प्रज्ञातेजेन पार्थिव ।
[q]राष्ट्राणि मुखमेघन्ति राष्ट्राधिपतिना सह ॥१२८॥
[r]लु[s]ब्धो च अल्प[t]बुद्धी च अमात्यो मनुजा[u]धिप ।
[v]नव राज्ञो हितो भोति राष्ट्रस्यापि न सो हितः ॥१२९॥
तस्मादलुब्धमे[w]धावि अमात्यं मनुजाधिप ।
[x]मन्त्रस्यानुयुक्तं [y]कुर्या राष्ट्रस्य परिणायकं ॥१३०॥
नास्ति चारसमं चक्षुः [z]नास्ति चारसमो [a]नयो ।
तस्माच्चारं [b]प्रयोजेय्या सर्वार्थेषु जनाधिपः ॥१३१॥
सर्वं परिजनं राष्ट्रं [c]संपरिगृह्ण पार्थिव ।
बलाग्रमुपजीविञ्च कृत्याकृत्येहि पार्थिव ॥१३२॥
[d]तस्माद्धीरं प्रतीहारं [e]प्रतिपद्यासि [f]पार्थिव ।
अप्रमादं स [g]कुर्या च तवमेतत्सुखावहं ॥१३३॥
एतावती अर्थवती एषा [h]मह्यानुशासनी ।
तं [i]सर्वमोग्रहेत्वान एवं कुरुहि पार्थिव ॥१३४॥ Sen. 280

[a]एवन्ते प्रतिपन्नस्य यशो कीर्तिश्च भेष्यति ।
[b]क्षेमं भविष्यति [c]राष्ट्रं ऋद्धं [d]स्फीतं जनाकुलं ॥१३५॥
कौशिको चापि [e]पृच्छितो ते पृष्टा व्याकरेन्सु मे ।
राजधर्मं [f]यथातथा त्वं दानि शुक पृच्छसि ॥१३६॥
बलं कतिविधं राज्ञो [g][h]पण्डित [i]अर्थचिन्तक ।
राजधर्मं यथातथा इच्छितव्यं ब्रवीहि मे ॥१३७॥

शुको आह ।

बलं पंचविधं [j]राज्ञः [k]इच्छितव्यं [l]नराधिप ।
एकाग्रमनसो भूत्वा श्रृणोहि वचनं मम ॥१३८॥
प्रथमं बलं सहजं [m]द्वितीयं पुत्रबलं तथा ।
[n]ज्ञातिमित्रबलं चापि तृतीयं मनुजाधिप ॥१३९॥
चतुरंगबलं चापि [o]चतुर्थं भवति [p]पार्थिव ।
पंचमं च बलं क्रुहि [q]प्रज्ञाबलमनु[r]त्तरं ॥१४०॥
[s]एतं बलं पंचविधं यस्य चापि जनाधिप ।
[t]राष्ट्रोऽस्य स्थावरो भोति [u]ऋद्धं स्फीतं जनाकुलो ॥१४१॥
[v]बलवं पुनरेतेषां प्रज्ञाबलमनुत्तम ।
[w]प्रज्ञाबलेन संग्रहे कृत्याकृत्यं [x]जनाधिप ॥१४२॥
अकृत्यं परिवजति ' कृत्यं च अनुतिष्ठति ।
आत्मनो ज्ञातिमित्राणां [y]राष्ट्रस्य न्र सुखावहं ॥१४३॥
कुलीनोऽपि हि दुष्प्रज्ञो राजार्थे [z]मनुजाधिप ।
नैव [a]राज्ञो हितो भोति राष्ट्रस्यापि न सो प्रियः ॥१४४॥

क्षि[a]प्रं तु नश्यते राज्यं प्रतिराजेहि पार्थि[b]व। Sen. 281

विर[c]क्ता प्रकृतियो च अन्यं मार्ग[d]न्ति स्वामिकं ॥१४५॥

अतीव[e] सत्[f]कृतो भवति पण्डितो अर्थचिन्तकः।

[g]वरान्यो च[h] स्थापयति शूरां वीरां विचक्षणां ॥१४६॥

यशं च इह लोक[i]स्मि संपराये च स्वर्गति।

अ[j]धर्मं परिवर्जेत्वा धर्ममाचरते सदा ॥१४७॥

धर्मं चर महाराज मातापितृषु पार्थि[k]व।

इह धर्मं[l] चरित्वान राजा स्वर्गं गमिष्यति ॥१४८॥

धर्मं चर महाराज पुत्रदारे जनाधिप।

इह धर्मं चरित्वान राजा स्वर्गं गमिष्यति ॥१४९॥

धर्मं चर महाराज मि[m]त्रामात्ये जनाधि[n]प।

इह धर्मं चरित्वान राजा स्वर्गं गमिष्य[o]ति ॥१५०॥

धर्मं चर म[p]हाराज श्रमणे ब्राह्मणे तथा।

इह धर्मं चरित्वान राजा स्वर्गं गमिष्य[q]ति ॥१५१॥

धर्मं चर महाराज पु[r]रे जानपदेषु च।

इह धर्मं चरित्वान रा[s]जा स्वर्गं गमिष्यति ॥१५२॥

[t]धर्मं चर महाराज अस्मिं लोके परत्र च।

इह धर्मं चरित्वान राजा स्वर्गं गमिष्य[u]ति ॥१५३॥

एतावती अर्थवती एषा मह्यानुशासनी।

तं सर्वमोग्रहात्वान एवं कुरुहि पार्थि[v]व ॥१५४॥

[w]एवन्ते प्रतिपन्नस्य यशो कीर्त्ति च भेष्यति।

क्षेमं भविष्यते रा[x]ष्ट्रं[y] ऋद्धं स्फीतं जनाकुलं ॥१५५॥

[a]तानेवमुवाच राजा ब्रह्मदत्तो प्रतापवान्।
Sen. 282 [b]समन्तपण्डिता पुत्रा निपुणा [c]अर्थचिन्तका ॥१५६॥
सर्वेषां वो करिष्यामि वचनम[d]नुशासनीं।
[e]दृष्टो [f]धार्मिककथया वो अर्थो यं सांपरायिकः ॥१५७॥
[g]पूर्वेनिवासं भगवां पूर्वेजातिमनुस्मरन्।
जातकमिदमाख्यासि शास्ता [h]भिक्षूणमन्तिके ॥१५८॥
अनवराग्रस्मिं संसारे यत्र मे उषितं [i]पुरा।
शुकी अहं तदा आसि [j]शारिपुत्रो [k]च सारिको।
[l]आनन्दो कौशिको आसि ब्रह्म[m]दत्तो शुद्धोदनो ॥१५९॥
[n]एव[o]मिदम[p]परिमितं बहुदुःखं
उच्च[q]नीचं चरितं [r]पुराणं।
विग[s]तज्वरो विगत[t]भयो अशोको स्वजातकं
भ[u]गवां भाषति भिक्षुसंघमध्ये ॥१६०॥

इति श्रीमहावस्तुअवदाने त्रिशकुनीयं नाम जातकं समाप्तं॥

अथ बोधि[v]सत्वस्तं शुकभवं जहित्वा कुमारो सं[w]वृत्तः दशकु[x]शलां कर्म[y]पथां देशेति।

दश [z]वशिता आख्याता बुद्धेनादित्यबन्धुना।
बोधिसत्[a]वान शूराणां भाषतो तं श्रृणोथ मे ॥१॥
[b]वशी आयुष्मन्तो धीरो प्रतिभाने तथैव च।
उपपत्तिया च [c]कर्मे च चिन्ते च वशितां गतो ॥२॥
[c]धर्मे च ऋद्धिवशिता [d]अभिप्रायवशि[e]स्तथा।
कालदेशे वशी धीरो इत्येते वशिता दश ॥३॥

[a]वशितादशसु एतासु प्रतिष्ठाय वि[b]शारदाः । Sen. 283
सत्वकोटिसहस्राणि [c]परिपाचेन्ति नरर्षभाः ।।४।।
[d]बुद्धक्षेत्रं विशोधेन्ति बोधिसत्वा च नायका ।
बोधिसत्वा [e]द्यु तिमन्तो [f]महाकारुणलाभिनो ।।५।।
[g]जातकपर्यवसाने तर्हि च [h]परिपाचिता ।
चतु[i]रशीतितिहि प्राणिसहस्रे हि धर्मो [j]अभिसंमतो ।।६।।

बुद्धे न [k]भगवता [l]वैशालीये सीमं आक्रमन्तेन सर्वे अमनुष्यका [m]पलानाः । [n]महन्तो जनकायो प्रीतो भगवन्तं पृच्छति । पश्य भगवन्कथं [o]भगवता [p]वैशालीये सीमामाक्रमन्तेनै[q]व सर्वे अमनुष्यकाः पलानाः । भगवानाह । किमत्र [r]वासिष्ठाहो आश्चर्यं यन्तथागतेन परमसंबोधिप्राप्तेन देवातिदेवेन सीमामाक्रमन्तेनैव सव अमनुष्यका पलानाः । अन्यदापि मया ऋषिभूते[s]न कम्पिल्ले नगरे[t] सीमामाक्रमन्तेनै[u]व सर्वे अमनुष्यका पलानाः । [v]लेच्छविका आहन्सु । अन्यदापि भगवन् । [w]भगवानाह । अन्यदापि वासिष्ठा ।

भूतपूव [x]वासिष्ठा अतीतमध्वाने पांचाल जनपदे कम्पिल्ल नगरे राजा ब्रह्मदत्तो नाम राज्यं [y]कारेसि सुसंगृहीतपरिजनो दानसंविभागशी[z]लो । तस्य तं कम्पिल्लं जनपदं ऋद्धं च स्फीतं च क्षेमं च सुभि[a]क्षं चाकीर्णबहुजनम[b]नुष्यं च सुखितम[c]नुष्यं च प्रशान्त-दण्डडमरं [d]सुनिगृहीततस्[e]करं व्यवहारसम्पन्नं । तस्य दानि [f]राज्ञो ब्रह्मदत्तस्य रक्षितो नाम पुरोहितपुत्रो महेशाख्यो दशकुशलकर्मपथसमा[g]दायवर्ती कामेषु आदीनवदर्शावी निःशरणप्रज्ञो संवेगबहुलो नैष्क्र[h]म्याभिप्रायो । सो कामेषु आदीनवं दृष्ट्वा अनुहिमवन्तं गत्वा ऋषिप्रव्रज्यां प्रव्रजितो । तेन [i]दानि तर्हि हिमवन्ते आ[j]श्रमं मापेत्वा तृण[k]कुटी- Sen. 284
र्णकुटीनि कृत्वा मूलपत्रपुष्पफलभक्षेण बाहिरकेण मार्गेण [l]पर्वरात्रं अ[m]पररात्रं जागरिका-

योगमनुयुक्तेन[a] विहरन्तेन चत्वारि ध्यानानि उत्पादितानि पंच च अभिज्ञा साक्षीकृता। सो दानि चतुर्ध्यानलाभी[b] पंचाभिज्ञो दशकुशलकर्मपथसमादायवर्ती[c] कुमारो[d] ब्रह्मचारी स्वयमाश्रमे[f] पर्यंकेन निषण्णो[g] चन्द्रमण्डलं च सूर्यमण्डलं च पाणिना परामृषति। यावद्ब्रह्मकायिककायान्वशे[h] वर्तेति[i] उग्रतपो ऋषि महाभागो। कदाचित्कम्पिल्ले महानगरे[j] सजनपदे अमनुष्यव्याधि दारुणो[k] उत्पन्नो। तेन अमनुष्यव्याधिना[l] स्पृष्टा बहूनि प्राणिसहस्राणि अनयव्यसनमापद्यन्ते। राज्ञा ब्रह्मदत्तेन तं कम्पिल्ले[m] महान्तमादीनवं दृष्ट्वा अनुहिमवन्ते रक्षितस्य दूतो प्रेषितः। कम्पिल्ले[n] एदृशो अमनुष्यव्याधि उत्पन्नो बहूनि प्राणिसहस्राणि[o] अनयव्यसनमापद्यन्ति। साधु भगवान्कम्पिल्लमागच्छेया[p] अनुकम्पामुपादाय। ऋषिर्दूतवचनं[q] श्रुत्वा अनुहिमवन्तातो कम्पिल्लमागतो। तेन ऋषिणा[r] कम्पिल्लस्य[s] सीमामाक्रमन्तेन सर्वे ते अमनुष्यका पलानाः[t]। ऋषिणा[u] तर्हि कम्पिल्ले स्वस्त्ययनं कृतं दश कुशलाः[v] कर्मपथा देशिता[w] चतुरशीतिनां प्राणिसहस्राणां।

किं सो नरो जल्पमचिन्त्यकालं[x] [y]
कतमास्य विद्या कतमं स्य दानं।
सौख्याध्वगो[z] अस्मि परे च लोके
कथंकरो रक्षितो स्वस्त्ययनं तदाहु[a] ॥७॥
यो[b] सिद्धदेवां[c] च नरांश्च सर्वा
ज्ञाति च भूतानि च नित्यकालं।
अवजानति प्रज्वलनं[d] [e] च तीक्ष्णं[f]
भूतानुकम्पि[g] रक्षितो स्वस्त्ययनं तदाहुः ॥८॥
Sen. 285 यो वा दुरुक्तं वचनं[h] क्षमेया
क्षान्तीबलेन[i] अधिवासयन्तो[j]।

परुषं श्रुत्वा वचनं[a] अनिष्टं
अधिवासनारक्षितो[b] स्वस्त्ययनं तदाहुः ॥९॥
यो वा दुरुक्तं वचनं क्षमेय[c][d]
जाता च ये स्निग्धमित्रा सततं भवन्ति[e]।
विशारदा[f] अविसंवादका[g] च
तां मित्रद्रोहीसमसंविभागी[h][i][j]।
धनेन मित्रां सदामनुकम्पि[k]
सो मित्रमध्ये रक्षितो स्वस्त्ययनं तदाहुः ॥१०॥
यो[l] ज्ञातिमध्ये च सहायमध्ये
शीलेन प्रज्ञाय[m][n] वशीतया च ।
अभिरोचति सर्वं[o] हि नित्यकालं
सो ज्ञातिमध्ये रक्षितो स्वस्त्ययनं तदाहुः ॥११॥
यस्मि[p] राजा भूमिपती प्रसन्ना
जानन्ति सत्ये च पराक्रमे च ।
अभव्य एषो[q] इह[r] च पुरा च
स राजमध्ये रक्षितो[s] स्वस्त्ययनं तदाहुः ॥१२॥
यं[t] स्निग्ध भावा··············
माता[u] प्रजायामनुकम्पिता[v][w] च ।
प्रजायते[x] रूपवती[y] सुशीला
घरवास रक्षितो स्वस्त्ययनं तदाहुः ॥१३॥
ये आर्यधर्मेण स्तुवन्ति बुद्धं Sen. 286
उपस्थिता परिचरियाये सन्तो ।

बहुश्रुता[a] तीर्णकांक्षा[b] विमुक्ता
अर्हन्तमध्ये रक्षितो स्वस्त्ययनं तदाहुः ॥१४॥

अन्नं[c] पानं काशिकचन्दनं च
गन्धं च माल्यं च ददन्ति काले ।
प्रसन्नचित्ता श्रमण[d]ब्रह्मो[e] हि
ग्रामस्य मध्ये रक्षितो स्वस्त्ययनं तदाहुः ॥१५॥

पैशुन्यं[f] मृषावाद परेषु दारं
प्राणातिपातं च तथैव मद्यं ।
एतं प्रहाय स्वर्गतिं[g] गमिष्यथ
ग्रामस्य मध्ये रक्षितो स्वस्त्ययन तदाहुः ॥१६॥

स्यात्खलु पुनर्वो[h] वासिष्ठाहो एवमस्यास्यादन्यो[i] स तेन कालेन तेन समयेन रक्षितो नाम ऋषि अभूषि । न खल्वेवं[j] द्रष्टव्यं । तत्कस्य हेतोः[k] । अहं सो वासिष्ठा तेन कालेन तेन समयेन रक्षितो नाम ऋषि अभूषि । अन्यो सो तेन कालेन तेन समयेन कम्पिल्ले[l] नगरे ब्रह्मदत्तो नाम राजा अभूषि[m] । न खल्वेतदेवं द्रष्टव्यं । एषो राजा श्रेणिको बिम्बिसारो[n] तदा कम्पिल्ले नगरे ब्रह्मदत्तो नाम राजा अभूषि । तदापि मये ऋषिभूतेन[o] कम्पिल्ले[p] सीमामाक्रमन्तेनैव[q] सर्वे अमनुष्यका पलानाः । एतर्हिं पि मये[r] वैशालीये सीमामाक्रमन्तेनैव[s] सर्वे[t] अमनुष्यका पलानाः ।

अपि च न एतर्हि येव मये[u] सीमामाक्रमन्तेनैव[v] सर्वे अमनुष्यका पलानाः । अन्यदापि[w] मये सीमामाक्रमन्तेनैव अमनुष्यका[x] पलानाः ।

भूतपूर्वं[y] वासिष्ठाहो अतीतमध्वानं नगरे वाराणसी[z] काशिजनपदे राजा राज्यं कारयति कृतपुण्यो महेशाख्यो महाबलो महाकोशो महावाहनो सुसंगृहीतपरिजनो

दानसंविभागशीलो[a]। तस्य तं नगरं वाराणसी[b] काशिजनपदो ऋद्धो च स्फीतो च Sen. 287 क्षेमो च सुभिक्षो च आकीर्णजनमनुष्यो च। तस्य दानि राज्ञो हस्तिनागो कृतपुण्यो महेशाख्यो महातेजो[c] महानुभावो यस्य तेजानुभावेन वाराणसी[d][e] काशीजनपदो[f] निरीतिको निरुपद्रवो[g] येनान्येषामपि ग्रामजनपदानां[h] सीमामाक्रमन्तेनैव[i] निरीतिका निरुपद्रवा भोन्ति। कदाचित् मिथिलायां विदेहनगरे अमनुष्यव्याधिरुत्पन्नो बहूनि[j] प्राणि-सहस्राणि अनयव्यसनमापद्यन्ति। ते शृण्वन्ति काशीराज्ञो हस्तिनागो कृतपुण्यो च महेशाख्यो च महातेजो च महानुभावो च यस्य ग्रामस्य वा नगरस्य वा[k] सीमामाक्रमति[l] निरीतिको निरुपद्रवो सो ग्रामो[m] वा नगरो वा भवति। तेन दानि वैदेहकराज्ञा[n] अपरो ब्राह्मणो उक्तो। गच्छ वाराणसीं[o][p] सो काशिराजा सर्वंददो[q] च दानसंविभागशीलो च। तस्य इमां[r] प्रकृतिं आरोचेहि तं च हस्तिनागं याचेहि। तेन नागेन इह आगतेन सर्वो[s] अमनुष्यव्याधि प्रशमिष्यति।

सो ब्राह्मणो राज्ञो वचनं श्रुत्वा अनुपूर्वेण वाराणसिमनुप्राप्तो[t][u]। ब्राह्मणो च वाराणसिं[सीं]प्रविशति। अयं च काशिराजा वाराणसीतो बहिर्नगरं निर्याति[v] महता राजानुभावेन[w] महतीये राजऋद्धीये तं च हस्तिनागं सर्वालंकारविभूषितं हेमजाल-संच्छन्नं शिरीज्वलन्तं पुरतो गच्छति[x]। तेन ब्राह्मणेन सो काशिराजा पुरतः[y] स्थित्वा जयेन[z] वर्धापितो। राजा तं ब्राह्मणं दृष्ट्वा स्थितो[a]। केन तेऽस्ति भो ब्राह्मण अर्थो किन्ते ददामि। ब्राह्मणेन तं मिथिलायाममनुष्यं[c] उपसर्गं सर्वं[d] काशिराज्ञो आरोचितं। एतं महाराज हस्तिनागं देहि मिथिलायामनुकम्पामुपादाय। राजा सकृपो परानुग्रहप्रवृत्तो[e] च। तेन तं हस्तिनागं तस्य ब्रह्मणो[f] यथालंकृतं दिन्नं। ददामि ते ब्राह्मण नागमिम-मलंकृतं हेमजालेन च्छन्नं राजार्हं राजभोग्यं उदारं[g] ससारथिं। गच्छहि[h] येनकामं। Sen. 288 स्यात्खलु[i] पुनर्वो वासिष्ठाहो एवमस्यास्या[j][k][l] अन्यः स तेन कालेन तेन समयेन वाराणस्यां राजा अभूषि[m]। न एतदेवं द्रष्टव्यं। एष[n] राजा[o] श्रेणिको बिम्बिसारो तेन कालेन

तेन समयेन काशिराजा अभूषि। स्यात्खलु पुनर्वो[a] वासिष्ठाहो एवमस्यास्या[b][c] अन्यो सो तेन कालेन तेन समयेन मिथिलायां राजा भवति[d]। न एतदेवं द्रष्टव्यं। तत्कस्य हेतोः[e]। एष[f] सिंहसेनापतिः तेन कालेन तेन समयेन राजा अभूषि। अन्यो सो ब्राह्मणो भवति[g]। एषो तोमरो लेच्छविः। अन्यो सो हस्तिनागो भवति। न खलु पुनरेवं द्रष्टव्यं। अहं सो तेन कालेन तेन समयेन राज्ञो हस्तिनागो अभूषि। तदापि[h] मये हस्तिनागभूतेन मिथिलायां सर्वे अमनुष्यकाः पलानाः। एतरहिं पि मये वैशालीये सीमामाक्रमन्तेनैव सर्वे अमनुष्यका पलानाः।

अपि तु वासिष्ठाहो[i] न एतरहिमेव मये सीमामाक्रमन्तेनैव[j] सर्वे[k] अमनुष्यकाः[l] पलानाः। अन्यदापि[m] ऋषभभूतेन[n] सीमामाक्रमन्तेनैव[o] सर्वे अमनुष्यकाः पलानाः।

भूतपूर्वं[p] वासिष्ठाहो अतीतमध्वानं राजगृहे नगरे राजा राज्यं कारयति कृतपुण्यो महेशाख्यो सुसंगृहीतपरिजनो[q] दानसंविभागशीलो महाबलो महाकोशो महाबलवाहनो[r]। तस्य[s] तं राज्यं ऋद्धं च स्फीतं च क्षेमं च सुभिक्षं[t] च आकीर्णमनुष्यञ्च बहुजनमनुष्यञ्च[u] सुखितजनमनुष्यं च प्रशान्तदण्डडमरं[v] सुनिगृहीततस्करं[w] व्यवहारसम्पन्नं। तर्हिं अमनुष्यव्याधि[x] उत्पन्नो बहूनि प्राणिसहस्राणि अमनुष्यव्याधिना अनयव्यसनमापद्यन्ति। अङ्गराज्ञो च ऋषभो अभूषि प्रासादिको दर्शनीयो कृतपुण्यो महेशाख्यो[y]। तस्य[z] तेजानुभावेन सर्वमङ्गविषयं निरीतिकं निरुपद्रवं। राजगृहका[a] ब्राह्मणगृहपतिका श्रृण्वन्ति। अङ्गराज्ञो[b] ईदृशो ऋषभो प्रासादिको दर्शनीयो कृतपुण्यो[c] महेशाख्यो।
Sen. 289 तस्य तेजानुभावेन सर्वमंगविषयं[d] निरीतिकं निरुपद्रवं भवति। तेहि राज्ञो आरोचितं[e]। महाराज श्रृणोम अंगराज्ञो एदृशो ऋषभो प्रासादिको दर्शनीयो कृतपुण्यो महेशाख्यो महानुभावो[f]। यस्य ग्रामस्य वा नगरस्य वा[g] सीमामाक्रमति तं निरीतिकं निरुपद्रवं भवति। महाराज[h] ऋषभं आनय यथा तेन आनीतेन राजगृहे अमनुष्यव्याधि प्रशमिष्यति[i]।

राजगृहकेन[a] राज्ञा अङ्गराज्ञो ब्राह्मणो प्रेषितो[b]। गच्छ[c] अङ्गराज्ञ इमं राजगृहे[d] आदीनवं वेदयित्वा[e] तं ऋषभं[f] याचाहीति। सो दानि[g] राज्ञो ब्राह्मणो[h] तथेति प्रति-श्रुणित्वा राजगृहातो अनुपूर्वेण अङ्गराजस्य नगरमनुप्राप्तः। तेन[i] अङ्गराज्ञो उपसंक्रमित्वा अङ्गराजानं जयेन[j] वर्धापेत्वा एवं राजगृहकममनुष्यव्याधिं[k] सर्वं विस्तरेण आरोचेत्वा ऋषभं याचितं। सो पि च राजा सकृपो च परानुग्रहप्रवृत्तो[l][m] च। तेन तं राजगृहकानां महन्तमादीनवं[n] श्रुत्वा सो ऋषभो तस्य ब्राह्मणस्य दिन्नः। गच्छ ब्राह्मण सुखी भवन्तु राजगृहका[o] मनुष्या सर्वेसत्वाश्च। ब्राह्मणो[p] तं ऋषभं गृह्य अंगविषयातो मगधविषयमागच्छति। समनन्तरं च वासिष्ठाहो[q] ऋषभेण[r] राजगृहस्य सीमा आक्रान्ता सर्वे च ते अमनुष्यका पलाना[s] निरीतिको[t] च निरुपद्रवो राजगृहस्य जनपदो संवृत्तो। स्याद्वो पुनरेव[u] वासिष्ठाहो एवमस्यास्यादन्यः[v] स तेन कालेन तेन समयेन अंगनगरे[w] अंगराजा अभूषि। न खलु पुनरेवं[x] द्रष्टव्यं। तत्कस्य हेतोः[y]। एष वासिष्ठाहो[z] राजा[a] श्रेणियो बिम्बिसारो तेन कालेन तेन समयेन[b] अङ्गराजा अभूषि। अन्यो स तेन कालेन तेन समयेन[c] राजगृहे राजा अभूषि। न एतदेवं द्रष्टव्यं। तत्कस्य हेतोः। एष सिंहसेनापतिः। अन्यः[d] स तेन कालेन तेन समयेन राजगृहको ब्राह्मणो अभूषि येन तं ऋषभं आनीतं। न एतदेवं द्रष्टव्यं। तत्कस्य हेतोः। एष वासिष्ठाहो Sen. 290
तोमरो लेच्छविस्तेन कालेन तेन समयेन राजगृहे ब्राह्मणो अभूषि येन तं अङ्गराज्ञो सकाशातो ऋषभो राजगृहमानीतो। स्यात्खलु पुनर्वो वासिष्ठाहो एवमस्यास्या अन्यः[e] स तेन कालेन तेन समयेन अङ्गराज्ञो ऋषभो अभूषि[f]। न खल्वेतदेवं द्रष्टव्यं। तत्कस्य हेतोः। अहं सो वासिष्ठाहो[g] तेन कालेन तेन समयेन अङ्गराज्ञो[h] ऋषभो[i] अभूषि। तदापि मये[j] ऋषभभूतेन राजगृहस्य[k] सीमामाक्रमन्तेनैव सर्वे अमनुष्यका पलाना एतर्हिं पि मये परमसम्बोधिप्राप्तेन वैशालीयं[l] सीमामाक्रमन्तेनैव[m][n] सर्वे अमनुष्यका पलानाः।

इति श्रीमहावस्तुअवदाने ऋषभस्य जातकं समाप्तं।

अथ भगवाननुपूर्वेण वैशालीमनुप्राप्तः[a][b]। भगवां दानि वैशालीये[c] साभ्यन्तर-बाहिराये स्वस्त्ययनं करोति। स्वस्त्ययनगाथां भाषति।

नमोऽस्तु[d] बुद्धाय[e] नमोऽस्तु बोधये
नमो विमुक्ताय नमो विमुक्तये।
नमोऽस्तु[f] ज्ञानस्य नमोऽस्तु ज्ञानिनो[g]
लोकाग्रश्रेष्ठाय[h] नमो करोथ ॥१॥
यानीह भूतानि समागतानि
भूम्यानि वा यानि[i] व अन्तरीक्षे[j]।
सर्वाणि[k] वा आत्तमनानि[l] भूत्वा
शृण्वन्तु स्वस्त्ययनं जिनेन भाषितं ॥२॥
इमस्मि[m][n] वा लोके परस्मि[o] वा पुनः
स्वर्गेषु[p] वा यं रतनं प्रणीतं।
न[q] तं समं अस्ति तथागतेन
Sen. 291 देवातिदेवेन नरोत्तमेन।
इमं पि बुद्धे रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति भोतु[r]
मनुष्यतो वा अमनुष्यतो वा ॥३॥
[क्षयं विरागं अमृतं प्रणीतं
यदध्यगात् शाक्यमुनिः समाहितः।
न तेन धर्मेण सममस्ति किञ्चित्।](1)
इदं पि धर्मे रतनं प्रणीतं।
एतेन सत्येन सुस्वस्ति भोतु
मनुष्यतो वा अमनुष्यतो वा ॥४॥

---

(1) Cf. Ratana—Sutta in the Suttanipata.

यं बुद्धश्रेष्ठो[a] परिवर्णये शुचिं
यमाहु[b] आनन्तरियं समाधिं[c]
समाधिनो[d] तस्य समो न विद्यते।
इदं पि धर्मे[e] रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति भोतु[f]
मनुष्यतो वा अमनुष्यतो[g] वा ॥५॥
ये[h] पुद्गला अष्ट सदा प्रशस्ता
चत्वारि एतानि[i] युगानि भोन्ति[j]।
ते दक्षिणीया सुगतेन उक्ताः
एतानि[k] दिन्नानि[l] महत्फलानि[m]।
इदं पि संघे रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति भोतु[n]
मनुष्यतो[o] वा अमनुष्यतो वा ॥६॥
सर्वैव यस्य दर्शनसंपदायो
त्रयोऽस्य[q] धर्मा[r] जहिता भवन्ति। Sen. 292
सत्कायदृष्टी[s] विचिकित्सितं च
शीलव्रतं चापि यदस्ति[t] किंचित्।
इदं पि संघे रतनं[u] प्रणीतं
एतेन सत्येन सुस्वस्ति[v] भोतु[w]
मनुष्यतो वा अमनुष्यतो वा ॥७॥
किंचापि शैक्षो[x] प्रकरोति पापं[y]
कायेन वाचा[z] अथ चेतसापि[a]।

अ[a]भव्यो सो तस्य निगूहनाय
अभव्यता दृष्टपथेषु उ[b]क्ता ।
इ[c]दं पि संघे रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति [d][e]भोतु
मनुष्यतो वा अमनुष्यतो वा ॥८॥
यथेन्द्रकीलो [f]पृथिवीसन्निश्रितो स्या
चतूर्भि वातेहि असंप्रक[g]म्पि ।
तथोपमं [h]सत्पुरुषं वदेमि
यो आर्यसत्यानि सुदेशितानि
गम्भीरअर्थानि अवेत्य पश्यति ।
इदं पि संघे [i]रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति [j]भोतु
मनुष्यतो वा अमनुष्यतो वा ॥९॥
ये आर्यस[k]त्यानि विभावयन्ति
गम्भीरप्रज्ञेन सुदेशितानि ।
किंचापि ते भोन्ति भृशं प्रमत्ता
Sen: 293 न ते [l]भवां [m]अष्ट उपादियन्ति ।
इदं पि संघे रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति [n]भोतु
मनुष्यतो वा अमनुष्यतो वा ॥१०॥
ये युक्तयोगी मनसा सु[o]च्छन्दसा
[p]नैष्क्रम्यिणो गौतमशास[q]नस्मि ।

[a]ते प्राप्तिप्राप्ता अमृतं विगाह्य
विमुक्तचित्ता निर्वृतिं भुंजमाना ।
इदं पि संघे [b]रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति [c]भोतु
मनुष्यतो वा अमनुष्यतो वा ॥११॥
क्षीणं पुराणं नवो [d]नास्ति सं[e]चयो
[f]विमुक्ता आयतिके भवस्मिं ।
ते [g]क्षीणबीजा अविरू[h]ढिधर्मा
निर्वान्ति [i]धीरा यथ तैलदीपा ।
इदं पि संघे रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति [j]भोतु
मनुष्यतो[k] वा अमनुष्यतो वा ॥१२॥
[l]अग्निर्यथा प्रज्वलितो निषीदे
[m]इन्धन[n]क्षया शाम्यति वेगजातो ।
एवंविधं [o]ध्यायिनो बुद्धपुत्राः
[p]प्रज्ञाय रागानुशयं ग्रहेत्वा
अदर्शनं मृत्युराजस्य यान्ति ।
इदं पि संघे [q]रतनं प्रणीतं Sen. 294
मनुष्यतो वा अमनुष्यतो वा ॥१३॥
ग्रीष्माणमासे [r]प्र[s]थमे चैत्रस्मिं
वने प्रगुल्मा यथ पुष्पिताग्रा
वातेरि[t]ता ते सुरभिं प्र[u]वान्ति ।

[a]एवंविधं ध्यायिनो [b]बुद्धपुत्राः
शीलेनुपेता सुरभिं प्रवान्ति ।
इदं पि संघे रतनं प्रणीतं
एतेन सत्येन सुस्वस्ति भोतु
मनुष्यतो वा अमनुष्यतो वा ॥१४॥
यानीह भूतानि समागतानि
[c]भूम्यानि [d]वा यानि व अन्तरीक्षे ।
मैत्रीकरोन्तु [e]सद मनुष्यका प्रजा
दिवं च [f]रात्रिं च हरन्ति वो बलिं ।
तस्माद्धि तं रक्षथ अप्रमत्ता
[g]माता व [h]पुत्रं [i]अनुकम्पमाना ।
एतेन सत्येन सुस्वस्ति [j]भोतु
मनुष्यतो वा अमनुष्यतो वा ॥१५॥
[k]विपश्यिस्मि [l|m]विश्वभुवि क्रकुच्छन्दे
भामकनक[n]मुनिस्मि [o]काश्यपे
[p]महायशे शाक्यमुनिस्मि गौतमे ।
एतेहि बुद्धेहि महर्द्धिकेहि
या [q]देवता सन्ति अभिप्रसन्ना ।
Sen. 295 [r]वाढं पि तं रक्षयन्तु च करोन्तु
[s]स्वस्त्ययनं मानुषिकप्रजाये ।
[t]तस्मा हि तं रक्षथ [u]अप्रमत्ता
माता व पुत्रं अनुकम्प[v]माना ।

[एतं पि संघे रतनं प्रणीतं[a]]
एतेन सत्येन सुस्वस्ति भोतु[b]
मनुष्यतो वा अमनुष्यतो वा ॥१६॥
यो[c] धर्मचक्रं अभिभूय लोकं[d]
प्रवर्तयति सर्वभूतनुकम्पितं ।
एतादृशं[e] देवमनुष्यश्रेष्ठं[f]
बुद्धं[g] नमस्यामि सुस्वस्ति भोतु[h] ।
धर्मं नमस्यामि सुस्वस्ति भोतु[i]
संघं नमस्यामि सुस्वस्ति भोतु
मनुष्यतो वा अमनुष्यतो वा ॥१७॥

गोशृङ्गीये बुद्धप्रमुखे भिक्षुसंघे भक्तं कृत्वा[j] शालवनं निर्यातितं। लेच्छवीनामेतदभूषि। प्रतिबलो अस्माकमेकको[k] भगवन्तं सश्रावकसंघं यावज्जीवमुपस्थिहितुं चीवरपिण्डपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्कारेहि[l] [m] [n] । अपि तु तथा क्रियतु[o] - यथा महाजनो[p] पुण्येन संयुज्येया। मनुष्यतण्डुलो[q] ओहारीयतु[r]। तेहि मनुष्यतण्डुलो ओहारितो[s] [t] पंचविंशमुत्तरं वा[u] तण्डुलजाता। एवं तेहि भगवां सश्रावकसंघो सप्ताहमुपस्थितो ।

शिरिमन्तं[v] महेशाख्यं वर्णवन्तं यशस्विनं[w] ।
संबुद्धं[x] पर्युपासन्ति चन्द्रं तारागणा यथा ॥१८॥ Sen. 296
पीतालंकारवसनाः[y] कर्णिकारा व पुष्पिता ।
संबुद्धं पर्युपासन्ति घनकेयूरधारिणः[z] ॥१९॥
हरिचन्दनलिप्तांगा[a] काशिकोत्तमधारिणः ।
....॥२०॥

[a]तां देवसंघां [b]परिषां समागतां
शुचिं सु[c]जातां शतपुण्यलक्षणां ।
सर्वेण बुद्धो [d]अभिभोति तेजसा
[e]नक्षत्रराजा इव [f]तारकाणां ॥२१॥
चन्द्रो यथा विगतवलाहके [g]नभे
अभिरोचते तारगणां प्रभांकरो ।
एवं हिमां क्षत्रियभू[h]मिपालां
सर्वेण बुद्धो अभिभोति तेजसा ॥२२॥
सूर्यो यथा प्रभवति अन्तरीक्षे
[i]आदित्यमार्गस्मि स्थितो विरोचति ।
एवं [j]हिमां क्षत्रियभूमिपालां
सर्वेण बुद्धो अभिभोति तेजसा ॥२३॥
सूर्यो यथा प्रतपति [k]अन्तरीक्षे
आदित्यमार्गस्मि स्थितो विरोचति ।
एवं हिमां क्षत्रियभूमिपालां
सर्वेण बुद्धो अभिभोति तेजसा ॥२४॥
[l]पद्मं यथा कोकनदं [m]सुजातं
प्रभासितं फुल्लमुपेतगन्[n]धं ।
Sen. 297 एवं पिमां क्षत्रियभूमिपालां
सर्वेण बुद्धो अभिभोति तेजसा ॥२५॥
शक्रो यथा असुरगणप्रमर्[o]दको
सहस्रनेत्रो [p]त्रिदशाभिरोचते ।

[a]एवं [b]इमां क्षत्रियभूमिपालां
सर्वेण बुद्धो अभिभोति तेजसा ॥२६॥
ब्रह्मा यथा [c]भूतनुकम्पि सर्वां
मरुप्रभां [d]अभिरोचति तेजसा ।
[e]एवं इमां क्षत्रियभूमिपालां
सर्वेण बुद्धो [f]अभिभोति तेजसा ॥२७॥
[g]दशांगुपेतं [h][i]प्रमुंचि शिरिं [j]शुचिं
[k]ततश्च बुद्ध्वा अमृतप्रसादं ।
विनेसिमां क्षत्रियभूमिपालां
धर्मं इमं पाणितले व दर्शये ॥२८॥

एवमायुष्मता आनन्देन भगवानभि[l]स्तुतो ।

भगवां वैशालकानां लेच्छवीनां धर्मया कथया संदर्शयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा बहूनि च प्राणिशतसहस्राणि [m]अभिविनेति। वैशालकानां लेच्छवीनां [n]तावद्दानं देयधर्मं इमाये अनुमोदनाये।

यथा[o]पि ते [p]मधुकरका समेत्वा
नानाविधां कुसुमरसां ग्रहेत्वा ।
[q]तुण्डेहि पादेहि च संह[r]रित्वा
.... ॥२९॥
[s]सामग्रिये भवति रसग[t]न्धयोसो Sen. 298
[u]तं संस्तृतं भवति मधु प्रणीतं ।
वर्णेन गन्धेन रसेनु[v][w]पेतं
भैषज्यभक्ते[x]षु च तं उपेति ॥३०॥

[a]ए[व]मेव ग्रामे निगमेषु वा [b]पुनः
महाजनो [c]भवति यहिं स आगतो ।
सपुत्रदारा [d]पुरुषस्[e]त्रियो च
कल्याणकार्येषु समानच्छन्दा ॥३१॥
[f]समोहरित्वान ददन्ति [g]पानं
संघस्य भक्तानि करोन्ति [h]यागुं ।
[i]पाना[j]नि संम्यक्सु[k]खखादनीया
रसां च आर्या[l]नुमतां ददन्ति ॥३२॥
यथाप्रसादं च यथानुभावं
कल्[m]पं बहु[n]ं चापि समोहरित्वा ।
पुनर्पुनः देन्ति प्रसन्[o]नचित्ता
समुच्चयं गच्छति पुण्यरा[p]शिः ॥३३॥
अभिवादनांजलिकर्मण[q]ो च
प्रत्युत्थानमासनतां ततो च ।
वैया[r]वृत्यं धर्मनुमोदनां च
महाजनो प्रीतो करोति पुण्यं ॥३४॥
ते दिन्नदाना कृतपुण्यकर्[s]मका
येनैव वाचाथ समोहरित्व वा ।
Sen. 299 [t]येनैव च कर्मसभागताये
सर्वे पि ते स्वर्गमुपेन्ति [u]स्थानं ॥३५॥
दिव्येहि रूपेहि [v]समं[w]गिभूता
परिचारियन्त्यप्सरसां गणेहि ।

प्रभूतभक्षा प्रवरान्नपाना
विमान[a]श्रेष्ठोपगता रमन्ति ॥३६॥
[b]यदा च ते एन्ति मनुष्यलोकं
[c]सर्वे पि आढ्यकुलेषु जाता ।
[d]ऋद्धेषु स्फीतेषु महाधनेषु
प्रभूतनारीनरसंकुलेषु ॥३७॥
[e]मधुं कृतं सत्पुरुषप्रशस्तं
सर्वेहि पुष्पेहि सुखावहाय ।
यं किंचिदर्थो मनसा[f] च प्रार्थितः
सर्वो स ऋद्ध्[g]येय यथामनो च ॥३८॥
[h]सर्वार्थं संगम्य उपेथ निर्वृ[i]तिं
ससर्वसंस्कार[j]किलेशसूदनां ।
[k]संवर्णये लोकहितो महाप्रभुः
सपुत्रदारा सह[l]ज्ञातिबान्धवा ॥३९॥

[m]ते दानि लेच्छवयो भगवन्त[n]माहन्सुः । अयमस्माकं भ[o]गवनुद्यानानां[p] महाउद्यानं यदिदं महाव[q]नं सकूटागार[r]शालं । तं च भगवतो सश्रावकसंघस्य देम [s]निर्यातिम । भगवां दानि [t]भिक्षूनामन्त्रेसि । तेन हि भिक्षवो अनुजानामि आरा[u]मार्थं विहारार्थं कल्पार्थं । भ[v]गवां दानि महावना[w]तो चापालं चे[x]तियं आगतः । लेच्छवयो Sen. 300 पृच्छन्ति । कहिं भ[y]गवां । [z]भिक्षवो आहन्सुः । एष [a]वासिष्ठाहो [b]भगवां महावनातो [c]येन चापालं चेतियं तेनोपसंक्रान्तो दिवाविहाराय । ते दानि लेच्छवयो आहन्सुः । देम भगवतो[d] चापालं [e]चेतियं सश्रावकसंघस्य निर्यातिम । [f]अपरकाले लेच्छविका [g]महावनमागता भगवतो पादवन्दका भगवां च कृतभक्तकृत्यो

सप्ताम्रचेतियं[a] गतो दिवाविहाराय। लेच्छवयो भिक्षूणां पृच्छन्ति[b]। आर्या[c] कहिं भगवान्। भिक्षू आहन्सुः[d]। एष वासिष्ठाहो[e] भगवां कृतभक्तकृत्यो येन सप्ताम्रचेतियं[f] तेनुपसंक्रान्तो दिवाविहाराय। ते दानि लेच्छवयो येन सप्ताम्रचेतियं[g] तेनुपसंक्रमित्वा[h] भगवतः पादौ शिरसा वन्दित्वा भगवन्तमेतदवोचत्। देम भगवं[i] सप्ताम्रचेतियं[j][k] भगवतो सश्रावकसंघस्य निर्यातिम। एवं बहुपुत्रचेतियं गौतमकं[l] चेतियं[m] कपिनह्यं[n] चेतियं। भूयो[o] चापि भगवान्कृत्यभक्तकृत्यो महावनातो येन मर्कटह्लदतीरं चेतियन्तेनुपसंक्रान्तो[p] दिवाविहाराय। लेच्छवयो आगता महावनं भगवतो पादवन्दकाः[q]। भिक्षूणां पृच्छन्ति। आर्या[r] कहिं भगवान्। भिक्षू आहन्सु[s]। एष वासिष्ठाहो[t] भगवां[u] कृतभक्तकृत्यो येन मर्कटह्लदतीरं[v] तेनुपसंक्रान्तो[w] दिवाविहाराय। ते दानि येन मर्कटह्लदतीरं चेतियन्तेनुपसंक्रमित्वा भगवतः[x] पादौ शिरसा वन्दित्वा भगवन्तमेतदुवाच। देम मर्कटह्लदतीरं चेतियं भगवतः सश्रावकसंघस्य निर्यातिम। आम्रपालीये[y] भगवतः सश्रावकसंघस्य भक्तं कृत्वा आम्रवनं निर्यातितं। बालिकाये[z] भगवतः सश्रावकसंघस्य भक्तं कृत्वा बालिका-छवी निर्यातिता।

इति श्रीमहावस्तुअवदाने छत्रवस्तु समाप्तं।

अथ अपरिमितयशधर्म[a] राज्ञो[b]
नवविधशासन[c]धर्मकोशरक्षो।
Sen. 301 भवतु गणवरो[d] चिरस्थितिको[e]
शिरिप्रवरो', अचलो यथा सुमेरू ॥१॥

बुद्धानामनुत्पादे प्रत्येकबुद्धा लोके उत्पद्यन्ति। तूष्णीकशोभना[f] महानुभावा एकचरा खड्गविषाणकल्पा एकमात्मानं दमेन्ति परिनिर्वायन्ति[g]। अपरो दानि प्रत्येकबुद्धो काशिभूमिषु पूर्वाह्णे[h] ग्रामं पिण्डाय प्रविशति प्रासादिकेन[i] अभिक्रान्तप्रतिक्रान्तेन

आलोकितविलोकितेन संमिञ्जितप्रसारितेन[a] संघाटीपात्रचीवरधारणेन[b] नागो विय कारितकारणो अन्तर्गतेहि इन्द्रियेहि अबहिर्गतेन मानसेन स्थितेन धर्मताप्राप्तेन युगमात्रं प्रेक्षमाणः। ग्रामिको च ग्रामतो अरण्यं निर्धावति कर्मान्तं प्रत्यवेक्षणाये[c] प्रासादिको अभिप्रसन्नदेवमनुष्यो। प्रत्येकबुद्धो[d] तं ग्रामं सावदानं पिण्डाय चरित्वा यथाधौतेन पात्रेण ततः[e] ग्रामातो निर्धावति। प्रायोन्नकालो[f] वर्तति न च केनचिद्भिक्षा दिन्ना। ग्रामिको कर्मान्ता प्रत्यवेक्षयित्वा पुनर्ग्रामं प्रविशति पश्यति च नं प्रत्येकबुद्धं ग्रामतो निर्धावन्तं। तस्य भवति। प्रायोन्नकालो[g] वर्तति। जानामि[h] तावं[i] किं इमेन प्रव्रजितेन भैक्षं लब्धमिति। ग्रामिकः पत्येकबुद्धमुपसंक्रम्य पृच्छति[j]। आर्य लब्धं भैक्षं ति। प्रत्येकबुद्धो[k] तूष्णीकशोभनो तुच्छकं पात्रं ग्रामिकस्य दर्शयति। ग्रामिको प्रत्येकबुद्धस्य[l] तुच्छकं पात्रं दृष्ट्वा नमाह। यावदसंविभागशीलो[m] जनो यत्र नाम एवरूपो दक्षिणीयो[n] एवं महन्तातो ग्रामातो[o] यथाधौतेन पात्रेण निर्धावति। इमे किं उद्दीपयं परिभुंजन्ति। सो आह। भगवं[p] आगच्छ अहं ते आहारं दास्यामि। सो तं प्रत्येकबुद्धं गृहीत्वा तं ग्रामं प्रविष्टो। सो चतुःमहापथे[q] स्थित्वा अविधाविधाति[r] क्रन्दति। अवस्थितग्रामिकस्य[s] अविधाविधन्ति शब्दं श्रुत्वा सस्त्रीमनुष्यो ग्रामो सन्निपतितः। ग्रामिकस्य उपसंक्रमित्वा पृच्छन्ति[t]। किं क्षेमं किं[u] अविधाविधं [Sen. 302] ति क्रन्दसि। ग्रामिक आह। क्रन्दामि[v] येनैते[w] न संविभागरता न संविभागशीलाः यत्र नाम एवं महन्तातो ग्रामातो एको भिक्षु[x] यथाधौतेन पात्रेण निर्धावति। ते दानि ग्रामे[y] महल्लका तस्य ग्रामिकस्य श्रुत्वा तं प्रत्येकबुद्धं सत्कर्त्तव्यं मन्येन्सु। ग्रामिकेन प्रत्येकबुद्धं गृहं प्रवेशेत्वा[z] आहारेण प्रतिमानेत्वा यावज्जीवमुपनिमन्त्रितो। अहमार्यस्य[a] निमन्त्रेमि यावज्जीवं सर्वसुखोपधानेन[b]। स्वयंधीता संवेदिता। एवन्तुवं आर्य तं दिवसमाहारेण उपस्थिहिसि। दारिका प्रीता तुष्टा संवृत्ता[c]। शोभनं मे कल्याणं[d] कर्म सेवितं। सा[e] दानि तं प्रत्येकबुद्धं दिवसमाहारेण उपस्थिहति[f] प्रासादि-[g]

काभिप्रसन्नदेवमनुष्या। प्रत्येकबुद्धो परिज्ञातभोजनो [a]सर्वाशुचिपरिक्षीणो महाभागो। तस्य दानि ग्रामिकस्य [b]धीतुः तां प्रत्येकबुद्धस्य [c]ईर्या पश्यित्वा उदारं पसादं जातं। तथा [d]अन्ये पि जना [e]प्रसन्ना। [f]सो दानि प्रत्येकबुद्धो तस्य ग्रामिकस्य प्रसादेन तत्रैव ग्रामक्षेत्रे अनुपादाय [g]परिनिवृतो। [h]ततो ग्रामिकेन तं प्रत्येकबुद्धं ध्यायेत्वा स्तूपं कृतं न [i]चातिखुड्डाकं न चातिमहन्तं [j]सुधामृत्तिकालेपनं। सा दानि ग्रामिकस्य धीता तं स्तूपं [k]दैवसिकं कांस्यपात्रेण [l]पूजेति [m]गन्धेन माल्येन च धूपेन च। पश्चात्ततो स्तूपातो तं नानाप्रकारं माल्यं वातेन [n]अपक[o]र्षीयिते। ताये दानि तं माल्यं [p]संकड्डित्वा चेटीहि [q]सार्धं [r]दीर्घमालागुडिका निचितोपचिता नानापुष्पाणां। तत्र ताये मालाये तं प्रत्येकबुद्धस्य स्तूपं सर्वं [s]परिवेठितं। [t]तस्या तां मालां तहिं स्तूपे स्थितां च माला च सर्वा रूपेण च तेजेन च अभिभवित्वा तिष्ठन्तीं देवेषु दिव्यमा[u]युःप्र[v]माणं क्षिपेत्वा शोभन्तीं
Sen. 303 दृष्ट्वा अतिरिव चित्तप्रसादमुत्पन्नं। सा दानि प्रसन्नचित्ता प्रणिधानमुत्पादेति। यादृशेषा माला अत्र स्तूपे शोभति एतादृशा मे माला मूर्ध्नि [w]प्रादुर्भवेया यत्रयत्र उपपद्येयं।

सा दानि तं [x]कल्याणं कर्मं कृत्वा तत्र च्यवित्वा देवेषू[y]पपन्ना रतनमालाये [z]आबद्धा तस्या तहिं उपपन्नाये अप्सरसां शतसहस्रं परिवारेसि।

ततो पि च्युता वाराणसीयं कृकिस्य राज्ञो [a]अग्रमहिषीये कुक्षिस्मि उपपन्ना। नवानां वा दशानां वा [b]मासानामत्ययेन देवीये दारिका प्रजाता प्रासादिका दर्शनीया रतनमालाये [c]आबद्धा। [d]तस्या मालिनीति नामं कृतं। राज्ञो कृकिस्य [e]प्रिया [f]मनापा तथा सर्वस्य परिजनस्य सम्मता सर्वस्याधि[g]ष्ठानस्य यावत्कृत[h]पुण्या दारिका।

[i]प्रत्येकबुद्धो ग्रामं पिण्डाय उपसंक्रमे।
यथाधौतेन [j]पात्रेण ततो ग्रामातो निष्क्रमेत्॥२॥

तमेनं ग्रामि[a]को दृष्ट्वा संबुद्धमिदमब्रवीत्।
[b]किञ्चि अरोगो भगवां लभ्यते पिण्डयापनं ॥३॥
ततोऽस्य भगवन्पात्रं ग्रामिकस्य प्रणामये।
न [c]चात्र अदर्शी भिक्षां [d]दौर्म[e]नस्यं ग्रामिकस्यभूत् ॥४॥
अन्धभूतो अयं [f]लोको मिथ्यादृष्टिहतो सदा।
[g]एतादृशं दक्षिणीयं न पूजेन्ति यथारहं ॥५॥
ग्रामान्तं उपसंक्रम्य [h]स्थिहित्वान चतुष्पथे।
[i]अवि[j]धाविधं ति [k]क्रन्दति ततो सन्निपते जनाः ॥६॥
महाजनो समागत्वा इस्त्रियो [l]पुरुषा पि च।
ग्रामिकं उपसंक्रम्य किं करो[m]म अविधावि[n]धं ति ॥७॥

ग्रामिको आह। Sen. 304

यं नूनं कोटि यु[o]ष्माकं न सं[p]विभागरतो जनो।
[q]एषो हि एतस्मिं ग्रामस्मिं एको भिक्षु विहन्यति ॥८॥
ग्रामिकस्य वचनं श्रुत्वा [r]सर्वो ग्रामो सइस्त्रियो।
[s]सारायणीयं करेन्सु संबुद्धस्य [t]पुनःपुनः ॥९॥
तमेनं [u]ग्रामिको वच सभार्याको सपुत्रको।
[v]सर्वसुखविहारेण निमन्त्रेमि तथागतं ॥१०॥
ग्रामिकस्य स्वका धीता शुचिव[w]स्त्रा सुवासना।
[x]आचारगुणसम्पन्ना [y]उपस्थीय तथागतं ॥११॥
ग्रामिकस्य प्रसादेन तस्मिं ग्रा[z]मस्मिं सु[a]व्रतो।
संबुद्धो परिनि[b]र्वायि ऋषि क्षीणपुनर्भवः ॥१२॥

तं निर्वृ[a]तं ध्यायेत्वान[b] स्तूपं कारेसि ग्रामिको।
नृत्यवादितगीतेन[c] पूजां कारेसि मर्हर्षिणो ॥१३॥
समासाद्य सितं पुष्पं[d] वातेन[e] अपकर्षितं।
[f]एकाध्यं संहरित्वान दीर्घ[g]मालां[h] वगूहयेत् ॥१४॥
[i]सा यादृशी तत्रैव मह्यं माला चित्रा उपनिश्रिता।
एतादृशी मे शिरसि भोतु[j] माला[k] यथा अयं ॥
[l]यत्रयत्रोपपद्ये हं तत्रमेतं समृध्यतु ॥१५॥
[m]सा तं कर्मं करित्वान कल्याणं बुद्धवर्णितं।
त्रायस्त्रि[n]शेषु[o] देवेषु उपपद्यिथ[p] अप्सरा[q] ॥१६॥
अप्सराशतसहस्रं च पुरस्कृत्वान तां स्थिता[r]।
तासां सा प्रवरा श्रेष्ठा[s] नारी सर्वाङ्गशोभना ॥१७॥
Sen. 305 [t]ततो तासां च्यवित्वान देवकन्या महर्द्धिका[u]।
राज्ञो कृकिस्य भार्याय कुक्षिस्मि उपपद्यिथ ॥१८॥
निर्गते द्वादशमासे[v] राजभार्या प्रजायत।
मालिनीं नाम नामेन नारीं[w] सर्वाङ्गशोभनां ॥१९॥
.................अतिवर्णा अतिरूपवती अभूत्[x]।
[y]श्रेष्ठा च राजकन्यानां घीता सा काशिराजिनो ॥२०॥
आचारगुणसम्पन्ना[z] शुचिवस्त्रा[a] सुवासना।
राज्ञो कृकिस्य[b] अन्तिके तिष्ठते प्रांजलीकृता ॥२१॥
[c]तमेनमवदद्राजा तिष्ठन्तीं प्रांजलीकृतां[d]।
ब्राह्मणां मे तुवं भद्रे भोजापेहि[e] अतन्द्रिता[f] ॥२२॥

पितुः सा वचनं श्रुत्वा ब्राह्मणानामनूनकां[a] ।
विंशत्सहस्रां[b] भोजेति सवकामेहि मालिनी[c] ॥२३॥
तमेनं ब्राह्मणा[d] दृश्य मालिनीमप्सरोपमां ।
रागग्रसितचित्ताश्च[e] उल्लपन्ति पुनर्पुनः ॥२४॥
उद्धतां[f] उन्नतां दृष्ट्वा चपलां[g] प्राकटेन्द्रियां ।
मालिनी संविचिन्तेति[h] न इमे दक्षिणारहा[i] ॥२५॥
सा आरुहित्वा प्रासादं समन्तेन विलोकये ।
अदर्शी भगवतो सिष्यं संबुद्धस्य शिरीमतो ॥२६॥
सा प्रासादवरगता[j] काशिकवरचन्दनेन[k] आलिप्ता[l] ।
राज्ञो कृकिस्य[m] धीता[n] सर्वा दिशता विलोकेति ॥२७॥
सा अद्दशासि···प्रासादिकेर्[o]निजितेन[p] प्रविशन्तां ।
बुद्धस्य[q] श्रावकान्वाहितपापां[r] अन्तिमशरीरां ॥२८॥
सा[s] दासीं प्रेषेति एतेषां ऋषीणां वन्दनं[t] ब्रूहि । Sen. 306
वन्दित्वा[u] च भणाहि प्रविशथ भदन्त निषीदाथ ॥२९॥
सा[v] दासी उपगम्य पादां वन्दित्वा भावितान्मनां[w] ।
प्राञ्जलिकृता[x] अवोचत्[y]प्रविशथ भदन्त[z] निषीदाथ ॥३०॥
रागा[a] उपातिवृत्ता विशारदा अग्रपण्डिता लोके[b] ।
बुद्धस्य श्रावका वा[बा]हितपापा[c] अन्तिमशरीराः ॥३१॥
तं पाण्डरं[d] च सुकृतं सुतोरणं खड्गअसिगुप्तं ।
प्रविशेन्सुः[e] अन्तःपुरं राज्ञो धीतुर्मनापाये ॥३२॥
काशिकप्रत्यास्तरणं[f] सुविचित्रकलापकं मणिविचित्रं ।
विचित्रपुष्पावकीर्णं[g] प्रज्ञप्तं आसनं[h] आसि[i] ॥३३॥

पद्ममिव[a] शुभाभासं जलेरुहं यथ[b] जले अनुपलिप्तं ।
तथ[c] अनुपलिप्तचित्ता[d] तत्र निषीदे विगतमोहा ॥३४॥
शालीनामोदनविधिमकालकमनेकव्यंजनमुपेतं[e][f] ।
स्वहस्तमुपनामयते[g] यथा भदन्तान अभिरोचे ॥३५॥
ते भिक्षू[h] अवचेन्सुः शास्ता मो अग्रपण्डितो[i][j] लोके ।
तस्या[k] प्रथमं भक्तं[l] सो भुंजये व महावीरो ॥३६॥
बुद्धो ति श्रुणित्व[m] घोषं लोके[n] कुतूहलं अश्रुतपूर्वं[o] ।
अधिकतरं[p][q] सा प्रसीदे इमेहि किल सो विशिष्टतरो ॥३७॥
सा मालिनी[r] अवोच भुञ्जित्वा शास्तुनो हरथ भक्तं ।
Sen. 307 अभिवादनं च[s] ब्रुथ मम वचनातो लोकनाथस्य ॥३८॥
अधिवासे[t] भक्तं भगवां सुवेतना सार्धं भिक्षुसंघेन ।
अन्तःपुरस्य मध्ये राज्ञो धीतुर्मनापाय[u] ॥३९॥

ते दानि भगवतो काश्यपस्य[v] अग्रश्रावका[w] तिष्यो च भारद्वाजो मालिनीये भक्तं परिभुंजित्वा भगवतो काश्यपस्य भक्तमादाय ऋषिवदनं[x] निर्धाविता[y] । भगवतो काश्यपस्य पिण्डपात्रमुपनामेत्वा मालिनीये वचनेन[z] भगवन्तं काश्यपं वन्दनं वदेन्सु[a] । कृकिस्य भगवं काशिराज्ञो धीता भगवतो वन्दनं पृच्छति[b] सश्रावकसंघस्य शुवेदानि च भक्तेन निमन्त्रेति[c] सार्धं भिक्षुसंघेन राज्ञो कृकिस्य अन्तःपुरे तस्या भगवां[d] अधिवासेतु अनुकम्पामुपादाय । भगवता काश्यपेन वैनेयवशेन अधिवासितं[e] । ये[f] तेहि महाश्रावकेहि सार्धं पुरुषा गता भगवतो काश्यपस्य[g] ओवादमादाय[h] तेहि गत्वा मालिनीये निवेदितं । अधिवासितं[i] तेन भगवता काश्यपेन शुवेदानि भक्तं[j] सार्धं भिक्षुसंघेन[k] । मालिनीये तेषां पुरुषाणां[l] श्रुत्वा तामेव रात्रिं प्रभूतं खादनीयं[m] भोजनीयं प्रतिजागरित्वा भगवतो[n] काश्यपस्य कालमारोचापितं[o] । भगवां कालज्ञो[p] वेलाज्ञो[q] समयज्ञो[r][s] पुद्गलज्ञो पुद्गलपरा-

परज्ञो। [a]काल्यमेव निवासयित्वा पात्रचीवरमादाय [b]येन चारिकाविकालो सं[c]प्राप्तो सायं मागधे [d]प्रातराशे वर्तमाने सा[e]र्धं विंशतीहि भिक्षुसहस्रेहि वाराणसिं[सीं] नगरं प्रविशेत्। [f]हंसप्रडीनकमिव [g]बुद्धा भगवन्तो नगरं प्रविशन्ति। दक्षिण-पार्श्वे तिष्यो महाश्रावको। वामे पार्श्वे भारद्वाजो महाश्रावकः। तेषां [h]पृष्ठतो चत्वारो महाश्रावका चतुर्णां[i] अष्ट अष्टानां षोडश षोडशानां[j] द्वात्रिंश द्वात्रिंशतानां[k] चतुषष्टि। एवं भगवां विंशतीहि भिक्षुसहस्रेहि [l]पुरस्कृतो राज्ञो कृकिस्य अन्तःपुरं Sen. 308 [m]प्रविशति। भगवतो नगरं प्रविशन्तस्य[n] ओनता भूमिरुन्नमति [o]स[p]मं भूमितलं जातं संस्थाति। अशुचिपाषा[q]णशर्करकठल्ला भूमिं प्रविशन्ति मुक्तपुष्पावकीर्णा मही संस्थाति। पुष्पोपगा [r]वृक्षा पुष्पन्ति फलोपगा वृक्षा फलन्ति। ये तत्र मार्गे वाम-दक्षिणेन वापीयो वा [s]पुष्करिणीयो वा शीतलस्य वारिस्य भरिता भवन्ति उत्पलपदुम-कुमुदपुण्डरीकनलिनीसौगन्धिकाप्रच्छ[t]न्ना। उदुपानमुखा[u] तोयं प्रस्यन्द[v]ति। अश्वा हीष्यन्ति ऋषभा न[w]र्दन्ति हस्तिकुंजरा[x] नर्दनं मुंचन्ति। समनन्तरं इन्द्रकीलं [y]पादेन चोक्रमति सर्वं च नगरं प्रकम्पति। अन्धा आलोकेन्ति [z]बधिराः शब्दं श्रृणवन्ति उन्मत्तकाः स्मृतिं प्रतिलभन्ते[a] व्याधिता व्याधितो मुंचन्ति गुर्विणीयो अरोगाः प्रसूयन्ति नग्नानां चैलाः पादु[b]र्भवन्ति बन्धनबद्धानां बन्धनानि स्फु[c]टन्ति पेडाकरण्डा[d]वृतानि रतनानि संघट्टन्ति भाजनानि रणन्ति। ये भवन्ति नगरे प[e]रिवादिनीयो [f]वल्लकीयो वेणुवीणामृदंगभेरी[g]पणवा असंखतान्यपि [h]अघट्टितानि संप्रवाद्यन्ति। शुकसारिक-कोकिलहंसमयूराः स्वकस्व[i]कानि रुतानि मुं[j]चन्ति। चतुरङ्गुलेन च भूमिं असंस्पृ-शन्तो गच्छति [k][l]धरणितले च पदचक्राणि प्रादुर्भवन्ति स[m]हस्रारा‍णि सनाभिकानि [n]सर्वाकारपरिपूर्णानि अन्तरीक्षे च दे[o]वा दिव्यानि तूर्यसहस्राणि [p]प्रवादयन्ति [q]दिव्यानि पुष्पवर्षा[r]णि प्रवर्षन्ति। [s]भगवां काश्यपो सश्रावकसंघो [t]एद्दशाये विधीये एद्दशाये विभूषाये एद्दशेन समुदयेन एद्दशाये ऋद्धीये एद्दशेन विभवेन देवमनुष्येहि सत्क्रि-

यन्तो सश्रावकसंघो राज्ञो कृकिस्य अन्तःपुरं प्रविष्टो। [a]भगवां मालिनीये
सश्रावकसंघो[b] तहिं अभ्यन्तरिमे चतुःशाले[c] महासत्कारेण परिविष्टो प्रभूतेन प्रणीतेन
Sen. 309 खादनीयेन भोजनीयेन ऋजुरसेन अग्ररसेन अविगतरसेन प्रत्यग्ररसेन। भगवां
भुक्तावी सश्रावकसंघो धौतहस्तो अपनीतपात्रो मालिनीं[d] धर्म्यया कथया संदर्शयित्वा[e]
समादापयित्वा समुत्तेजयित्वा संप्रहर्षयित्वोत्थायासनातो प्रक्रमे।

[f]यानि तानि कृकिस्य काशिराज्ञो विंशति ब्राह्मणसहस्राणि नित्यभोजिका
ते कुपिता यं मालिनीये भगवां काश्यपो सश्रावकसंघो राजकुले परिविष्टो [g]महता
सत्कारेण महता सन्मानेन। तेहि सर्वा ब्राह्मणपरिषा[h] सन्निपातिता[i] अनेकानि
ब्राह्मणसहस्राणि[j]। तेन कालेन तेन समयेन ब्राह्मणाक्रान्ता पृथिवी [k]भवति।
संनिपतिता[l] मालिनीं[m] घातेतुकामा। [n]एषा येव अत्र राजकुले ब्राह्मणानां [o]कण्टको
उत्पन्नो। [p]कृकिश्च राजा ब्राह्मणेषु अभिप्रसन्नो [q]तस्य [r]विंश ब्राह्मणसहस्रा [s]दैवसिकं
[t]भुंजन्ति एषा च पितृणा ब्राह्मणानां [u]नियोजिता एतानि ब्राह्मणानि [v]दैवसिकं भोजेहीति।
एताये ब्राह्मणानां अवमन्यित्वा[w] श्रमणा राजकुले [x]प्रवेशिता एषां च [y]एदृशो पूजा-
सत्कारो कृतो। [z]सा एषा [a]यत्तं ब्राह्मणानां [b]उपजीव्यं राजकुलातो पूजासत्कारार्थं[c]
श्रमणानां [d]परिणामेति मानयन्तीति। तेहि ब्राह्मणेहि एषो व्यवसायो कृतो मालिनी
मारेतव्या। [e]कृकी च काशिराजा जनपदं [f]प्रत्यवेक्षको व गतो। [g]तेहि ब्राह्मणेहि
कृकिस्य [h]राज्ञो दूतो प्रेषितो। [i]एदृशं मालिनीये ब्राह्मणानां मूले अबहुमानमुत्पन्नं।
काश्यपस्य सश्रावकसंघस्य राजकुलं [j]प्रवेशित्वा एदृशो च पूजासत्कारो कृतो ब्राह्मणानां
दर्शनं पि न देति। यथा महाराजेन [k]संदिष्टं तथा न करोति। [l]यन्तु
ब्राह्मणानां राजकुले नित्यकं विंशतीनां ब्राह्मणसहस्राणां तं पि न वर्तति।
मालिनी ब्राह्मणानां दर्शनं [m]पि न देति। राजा [n]श्रुतमात्रेणैव जनपदातो
Sen. 310 वाराणसिमागतो पश्यति अनेकां ब्राह्मणानां [o]सहस्रियो समागतानि। सो येन ब्राह्मणा-

स्तेनैव [a]गतो । ब्राह्मणा पि राज्ञो प्रत्युद्गता जयेन [b]वर्धापयित्वा [c]एतां प्रकृतिं मालिनीये तं सर्वं कृकिस्य राज्ञो निवेदेन्ति । महाराज एषा मालिनी ब्राह्मणानां [d]कण्टको उत्पन्ना न शक्यं [e]ब्राह्मणेहि राज्ञो नित्यकं [f]प्रतीच्छितुं यावन्न मालिनी घातिता । [g]एष समग्राये ब्राह्मणपर्षाये निश्चयो उत्पन्नो । राजा पि [h]ब्राह्मण्यो । [i]एषा ब्राह्मणपरिषाय [j]क्रिया अनुपरिर्वर्तितव्या । यदि ते ब्राह्मण्यं [k]अपरित्यक्तं मालिनीं परित्यजाहि । अथ ते मालिनी अपरित्यक्ता नास्ति ते ब्राह्मण्यं । ब्राह्मणपरिषाया [l]क्रियामनुपरि[m]वर्तन्तस्य तस्य राज्ञो एतदभूषि । [n]इमा ब्राह्मणाक्रान्ता पृथिवी बहुब्राह्मण्या । यदि [o]मालिनीं न [p]परित्यजिष्यामि डिम्बं भविष्यति । [q]नैवं मालिनी भविष्यति [r]नैवमहं ।

[s]त्यजेदेकं [t]कुलस्यार्थं ग्रामार्थं तु कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थं [u]आत्मार्थं पृथिवीं त्यजे ।।४०।।

ते दानि काशिराज्ञा मालिनी [v]परित्यक्ता । यथा ब्राह्मणपरिषाये [w]अभिप्रायन्तथा भवतु । ते दानि ब्राह्मणा [x]आहन्सु । यदि परित्यक्ता [y]मालिनी आणापियतु राज्ञा । [z]ततो तेन [a]बाहिरे नगरातो [b]ब्राह्मणानां मूले [c]स्थितकेन दूतो [d]प्रेषितो । आगच्छथ [e]मालिनीमानेथत्ति । राजवचनेन [f]दूतो राजकुलमनुप्राप्तः । आगच्छ [g]मालिनी परित्य-[h]क्तासि [i]पितरि ब्राह्मणानां । ब्राह्मणेहि [j]जीविताद्व्य[k]परोप्यसि । मालिनीये [l]मातरं आगत्वा आरावो मुक्तो सर्वेण च अन्तःपुरेण । नगेर [m]सर्वजनो तेन आरावशब्देन उत्कण्ठितो [n]आकुलीभूतो । [o]महं आसि रोदनं ।

मालिनी वाराणसीतो दूतेन [p]निष्कास्यति पितुः सकाशं । [q]सा दानि दूतेहि Sen. 311
[r]निष्कासिता पितुः अल्लीपिता । इयं [s]महाराज मालिनी । राज्ञा अश्रुकण्ठेन रुदन्मुखेन महतो [t]जनकायस्य मालिनी ब्राह्मणानां [u]दत्ता [v]परित्यक्ता [w]पितरे । सा दानि मालिनी यत्र काले [x]पितरि परित्यक्ता ब्राह्मणाना[y]मा[z]ज्ञाकृता । ततः मालिनी [a]प्रांजलीकृता

ब्राह्मणपरिषाये प्रणि[a]पतित्वा । इच्छामि एकां प्रज्ञप्ति ब्राह्मणपरिषा यदि प्र[b]माणन्ति । ते आ[c]हन्सु । [d]जल्प या ते विज्ञप्ति । आह । अहं पितरि ब्राह्मणानां परित्यक्ता युष्माकं[e] अहं [f]वशगता । ब्राह्मणपरिषाये[g] एवमेव[h] निश्चयो[i] मालिनी मारेतव्या । तदिच्छामि ब्राह्मणपरिषायमेव सकाशातो स[j]प्ताहं जीवितुं दानं दास्यामि पुण्यं च करिष्यामि । अहं च ब्राह्मणानां कृतोपस्थाना मयापि ब्राह्मणा उपस्थापिता पि[k]तुर्व[l]चनेन । ततो मे सप्ताहस्यात्ययेन[m] मारेथ यं[n] वा वो क्षमति तं करोथ । तेषां ब्राह्मणानां महत्तरकानामुत्पन्नं । [o]एवमेतं यथा मालिनी जल्पति चिरकालमेताये ब्राह्मणा उपस्थापिता पितुर्वचनेन [p]भोजापिताः । [q]पश्चा एताये पापकं चित्तमुत्पन्नं यं ब्राह्मणां मेल्लित्वा [r]श्रम[s]णानामभि-प्रसन्ना । ततो ना[t]र्हति भू[u]यो श्रमणानां [v]दानं दातुं उत्सृष्टा न तेषां ब्राह्मणानामेव[w] एषा सप्तरात्रं दानं [x]दास्यति । [y]तद्दीयतु एताय [z]विज्ञप्तिः मुच्यतु सप्तरात्रं सप्ताहस्यात्ययेन हनिष्यति । यं कारणं ब्राह्मणपरिषाये[a] एष निश्चय उत्पन्नः तं मालिनीये जीवमानाय कार्यं । [b]तस्या तेहि ब्राह्मणेहि दत्ता विज्ञप्तिः । सप्तरात्रमुत्[c]सृष्टा महतो जनकायस्य [d]ब्राह्मणानां सकाशातो अ[e]प्रमादा [f]भवेया सप्तरात्रं पि न [g]विलुपे त्ति । [h]सा दानि ओसृष्टा समानापि [i]नूनं [j]सार्धं महता जनकायेन परिवृता पुनः राजकुलं प्र[k]विष्टा पि[l]तरं विज्ञापेति । Sen. 312 इच्छामि इमानि सप्त दिवसानि दानं च दातुं पुण्यं च [m]कर्त्तुं यत्र मम अभिप्रायो । राजा आह । एवमस्तु करोहि पुत्रि पुण्यं य[n]त्र ते अभिप्रायो । सा आह । भगवन्तं काश्यपं[o] सम्यक्संबुद्धं सश्रावकसंघं सप्ताहमिह राजकुले परिविषेयं । राजा आह । अ[p]नुमोदाहि त्वं । भ[q]गवां काश्यपो सश्रावकसंघो राजकुले स[r]प्ताहं भक्तेन उपनिमन्त्रितो[s] । [t]अनुकम्पामुपादाय भगवता काश्यपेन वैनेयवशेन महाजनकायं विनयमागमिष्यती[u]ति अधिवासितं । ते ब्राह्मणा परिकु[v]पिता इच्छन्ति हनितुं जीव[w]न्तीं । मालिनी प्रां[x]जली[y]कृता । [z]क्षमथ तावत्सप्ताहं यावद्ददामि दानं । [a]ददन्तो [b]ब्राह्मणा कामकारो वः ।

ताये [a]प्रथमस्मिं दिवसस्मिं शास्ता [b]भोजापितो सह [c]गणेन अन्तःपुरस्य मध्ये
मातुश्च पितुश्च [d]मध्यगताये । [e]शास्ता च प्रसादनीयां राज्ञो कथये कथां । [f]विनीवरणे च
[g]धर्मे अभिसमेति राजा अन्तःपुरेण सह । [h]द्वितीयस्मिं दिवसस्मिं [i]विनेसि [j]पंच पुत्रशता ।
[k]तृतीयस्मिं [l]दिवसस्मिं यो तेषामभूषि परिवारो च । [m]चतुर्थस्मिं दिवसे राजा[n]मात्यां
[o]विनेति संबुद्धः । [p]पंचमे यं च बलाग्रं प्रथमफले निवेशये [q]शास्ता । [r]षष्ठस्मिं [s]दिवसस्मिं
राजाचार्यं [t]विनेति संबुद्धः । [u]निगमां च [v]सप्तमे श्रोतापत्तिफले [w]विनये । [x]राजापि
हृष्टचित्तो [y]संबुद्धं पश्यिय सह गणेन भगवन्तं काश्यपं [z]निमन्त्रयेदग्रभक्तेन । मालि-
नीये सप्तमे दिवसे भगवन्तं काश्यपं [a]भुक्तावि विदित्वा अपनीतपात्रं [b]प्रणिधानमुत्पा-
दितं । [c]अनन्तरेणाहं दुःखस्यान्तं करेयं । [d]एदृशो मे पुत्रो [e]भवे[f]या यथायं [g]भगवन्तो
काश्यपो देवमनुष्याणां [h]अर्थचर्यां चरति । एवं मम पुत्रो [i]अनुत्तरां सम्यक्संबोधिमभि-
संबोधित्वा देवमनुष्याणा[j]मर्थचर्यां चरतु । मालिनीये भ्राता अनियवन्तो नाम Sen. 313
[k]कुमारो । तेनापि [l]प्रणिहितं । एदृशो मे पिता भवेया यथायं [m]भगवां काश्यपो एतरहिं ।
तत्र च अहं [n]दुःखस्यान्तं करेयं । एवं भगवता काश्यपेन कृकी च काशिराजा सान्तः-
[o]पुरो पंच [p]कुमारशता अमात्या च [q]भट्टबलाग्रं योभूयेन च नैगमा सर्वे आर्यधर्मेहि
[r]विनीता । [s]तेषामेतदभूषि । अस्माकं मालिनी कल्याणमित्रा मालिनीमागम्य
अस्माकं सर्वधर्मेषु [t]धर्मचक्षुर्विशुद्धं । तां [u]ब्राह्मणा जीविताद्व्यपरोपयिष्यन्ति । अपि
नाम वयं आत्मानं [v]परित्यजेयाम न [w]मालिनीं । तेहि तेषां ब्राह्मणानां संदिष्टं । एते
वयं मालिनीये सह आगच्छामः मालिनी अस्माकं [x]कल्याणमित्रा न युष्मे शक्ता
अस्मेहि जीवन्तेहि मालिनीं [y]जीविताद्व्यपरोपयितुं । [z]यदा वयं [a]सर्वे न भवाम एवं युष्मे
[b]शक्नोथ तां मालिनीं जीविताद्व्यपरोपयितुं । ते [c]दानि सपरिवाराः [d]सबलवाहनाः
मालिनीमग्रतो कृत्वा वाराणसीतो निर्गम्य येन तानि ब्राह्मणसहस्राणि तेन प्रणता ।
ते ब्राह्मणास्तं अनन्तं बलाग्रं दृष्ट्वा मालिनीये सह [e]आगच्छन्तं भीता त्रस्ता । तेहि

दूतो प्रेषितो राज्ञो[a] च। निर्गम्यतु[b] मुक्ता भवतु मालिनी तं दिवसं[c] या चैषा उद्धृतदण्डा एषा पितरे आलोकं निसृष्टा भवतूद्धृतदण्डा। एषा[d] न अस्माकं मालिनी अपराध्यति। काश्यपो अस्माकं सपरिवारो अपराध्यति तस्य वयं दण्डं करिष्यामः[e]।

तेहि दानि सन्नद्धकवचिताः सहस्रयोगा दश पुरुषा ऋषिवदने[f] प्रेषिताः काश्यपं श्रमणं[g] सश्रावकसघं जीविताद्व्य[h]परो[i]पयथ। ते[j] भगवता काश्यपेन मैत्र्या स्फारित्वा आर्यधर्मेहि[k] प्रतिष्ठापिता। तेहि ब्राह्मणेहि अपरे[l] विंश पुरुषाः सन्नद्धकवचिताः प्रेषिताः काश्यपं[m] श्रमणं जीविताद्व्यपरोपयथ। ते पुरुषा[n] ऋषिवदनं[o] गताः सन्नद्धाः सप्रहरणाः। ते पि भगवता मैत्र्या स्फारित्वा[p] आर्ये धर्मे प्रतिष्ठापिताः। एवं
Sen. 314 त्रिशच्चत्वारिंश पंचाशं यत्तका प्रेषिता तत्तका काश्यपेन भगवता मैत्र्याय स्फारित्वा आर्यधर्मेहि प्रतिष्ठापिताः। आकर्षणा[q] एषा बुद्धानां। भगवता वैनेयसत्वानां[r] आकर्षणतायै[s] यत्तका तहिं बुद्धवैनेया आसि तेहि ब्राह्मणसहस्रेहि तत्तका तेहि विसर्जिताः ते च भगवता सर्वे आर्यधर्मेहि विनीताः। मिथ्याप्रतिपन्ना अवशिष्टा[t] अनेकप्राणसहस्रियो[u]। तेषामार्यधर्मेहि[v] विनीतानां भवति। न[w] एते ब्राह्मणा बुद्धमाहात्म्यं जानन्ति। यदि एते भगवन्तं काश्यपमुपसंक्रमेन्सुः[x] महता अर्थेन संयुज्येन्सु[y]। तेहि[z] तेषां ब्राह्मणानां दूतो प्रेषितो। भगवां काश्यपो सम्यक्संबुद्धो महात्मा महाकारुणिको लोकस्यानुग्रहप्रवृत्तो[a]। मा[b] भवन्तो भगवतो काश्यपस्यान्तिके भिक्षुसंघस्य बाधितुं प्रदूषेथ। एवं मानं च मदं च जहित्वा आगच्छथ[c] सर्वे भगवतो काश्यपस्य पादवन्दनं[d] महता अर्थेन संप्रयुज्यथ।

सत्य अपिशुनवर्णा[e] नं[f] च अर्थवती[g] शुची।
अन्येषां[h] मधुरा व्यक्ता बुद्धस्य सखिला गिरा[i] ॥४१॥
तर्पणीया[j] निर्वंम्हणी सर्वदाहविनाशनी[k]।
नेलवर्णा[l] सुखवर्णा[m] बुद्धस्य सखिला[n] गिरा ॥४२॥

[a]अगद्गदा [b]अविकला [c]अवितथा अनन्यथा।
[d]यथातथा अविकल्पिता [e]बुद्धस्य [f]सखिला गिरा ।।४३।।
ज्ञेयज्ञाना अनुत्पन्ना [g]अनोसाना असादिशा।
[h]नरवशा [i]सुविभक्ता च [j]वाचा [k]अमितबुद्धिनो ।।४४।।

[l]सत्यं चापिशुनं च भाषति
स सर्वतः [m]पुन मैत्रचित्तो।
[n]उपकारे [o]परमार्थसंहितं Sen. 315
एतं वा [p]परमं सुभाषितं ।।४५।।
आविष्टं [q]गदितं स भाषति
उच्चनीचमथापि मध्यमं।
अनुपदं अन्वक्षरं विशुद्धं
[r]एतं वा परमं सुभाषितं ।।४६।।
[s]परमकरुणमुदित[t]युक्तां
गिरां [u]भाषति दशफलयुक्तां।
[v]अष्टांगुपेत[w]चतुष्प्रकारां
[x]एतं वा परमं [y]सुभाषितं ।।४७।।
वाचां भाषति [z]पंचपुण्यां
सुनिश्चितां वा पुन छिन्नसंशयां।
न [a]च [b]कर्म किंचि करोति पापं
तथाविधं उत्तमपौरु[c]षत्वं ।।४८।।
एवं उपेतं वरलक्षणेहि
[d]महाद्यु तिगणमनुशासते[e]।

[a]वरं ज्ञातीरतनं प्रहाय
रतिं च स्फीतां अभिनिष्क्रमे[b] ॥४९॥
अमृतपदं[c] जिगीषु नन्दजाता
द्रुमसारं वरगन्धमुत्तमं ।
[d]लोचेत्वान कृतविकृतं[e] तं
अथ तेनैव पचेसि[f] ओदनं ॥५०॥
Sen. 316 [g]एवमिह काश्यपं महर्षि[h]
परिभाषन्ति जना परीत्तप्रज्ञाः[i] ।
स्वाख्यातपदं[j] अनिन्दितं
[k]पुरुषाजानियमनतिक्रमं ॥५१॥
[l]शमिताविं प्रहाय पुण्यपापं[m]
भवसंयोजनसंक्षये[n] रतं ।
शान्तं सुविभक्तमानसं[o]
तं जनो[p] गरहति अनंगनं ॥५२॥
[q]भिक्षू च उपासका[r] इमे
बहु काश्यपशासने रता ।
[s]ज्वलितं व हुताशनं शिखिं
एथ वन्दाम समेत्य काश्यपं ॥५३॥
एषो द्विपदानमुत्तमो[t]
सो चक्षुददो विनायको ।
मानं च मदं च विप्रहा
एथ वन्दाम समेत्य काश्यपं ॥५४॥

ते ब्राह्मणा [a][b]सर्वे [c]नित्यत्वनियतराशी [d]बुद्धसहस्रमपि यदि [e]धर्मं देशेय अभव्या ते धर्ममाजानितुं बुद्धे च धर्मे च संघे च प्रसादयितुं। ते दानि [f]दण्डलगुडहस्ता येन भगवान्काश्यपो तेन [g]प्रधाविता। भगवता [h]पृथिवीदेवता आभाष्टा। सा दानि तालमात्रेण आत्मभावेन भगवतो पुरतो [i]स्थिता। भगवां तां पृथिवीदेवतामाह। के च ते तत्र ब्राह्मणा भवन्ति। सा दानि आह। ऐते मम पृथिवीनिसृता दासा। भगवानाह। तेन हि यथा दासा [j]पराक्रम्यन्ते तथा पराक्रम। सा दानि [k]महान्तं [l]तालस्कन्धमुन्मूलेत्वा येन ते ब्राह्मणा [m]तेन प्रत्युद्गता। [n]तं तालस्कन्धं पृथिवीये छटा- Sen. 317 छटाये उपरिपतितं। ते ब्राह्मणा भीता [o]नाशनष्टाः।

इति श्रीमहावस्तुअवदाने मालिनीये वस्तु समाप्तं ॥

एवं मया श्रुतं एकस्मिं समये [p]भगवां कोशलेषु चारिकां [q]चरमाणो महता भिक्षुसंघेन [r]सार्धं पञ्चहि भिक्षुशतेहि येन कोशलानां मारकरण्डो निगमो [s]तदवसारि [t]तदनुप्राप्तो तत्रैव [u]विहरति अन्यतरस्मिं वनषण्डे। अथ खलु भगवान् [v]सायाह्नकालसमये प्रतिसंलयनाद्व्युत्थाय विहारातो निर्गम्य [w][x]ऊर्ध्वं च उल्लोकेत्वा [y]दिशाभागां च [z]अभिविलोकेत्वा अधो च ओलोकेत्वा समं च भूमिभागं समवेक्षित्वा स्मितं प्रादुष्करित्वा [a]दीर्घं चंक्रमं चंक्रमे। [b]अद्राक्षीत् अथ खल्वायुष्मानानन्दो भगवन्तं सायाह्नकालसमये प्रतिसंलयनाद्व्युत्थाय ऊर्ध्वं च उल्लोकेत्वा [c]दिशाभागां च अभिविलोकेत्वा अधो च ओलोकेत्वा समं च भूमिभागं [d]समवेक्षित्वा स्मितं प्रादुष्करित्वा [e]दीर्घं [f]चंक्रमं चक्रमन्तं। दृष्ट्वा पुनर्येन संबहुला [g]भिक्षवस्तेनोप[h]संक्रमित्वा भिक्षूनेतदवोचत्। एषो बुद्धो भगवान्सायाह्नसमये प्रति[i]संलयनाद्व्युत्थाय ऊर्ध्वं च उल्लोकेत्वा दिशाभागां च [j]अभिविलोकेत्वा अधो च अवलोकेत्वा समं भूमिभागं समवेक्षित्वा [k]स्मितं च प्रादुष्करित्वा दीर्घं चंक्रमं चंक्रमति। न च पुनरावुसावो [l]तथागता [m]अर्हन्तः सम्यक्सम्बुद्धाः अहेतु [n]अप्रत्ययं स्मितं प्रादुष्कुर्वन्ति। किं पुनर्[o]वयं आवुसावो येन [p]भगवांस्तेनोपसंक्रमित्वा

भगवन्तमेतमर्थं पृच्छेम। यथा तं भगवां व्याकरिष्यति[a] तथा तं धारयिष्याम। साध्वायुष्मन्निति[b][c] ते भिक्षू[d] आयुष्मतो आनन्दस्य प्रत्यश्रोषि।

अथ खलु[e] आयुष्मानानन्दो तेहि भिक्षुहि[f] सार्धं येन भगवांस्तेनोपसंक्रमित्वा
Sen. 318 भगवतः पादो शिरसा वन्दित्वा एकान्ते[g] अस्थासि। एकान्ते स्थितः आयुष्मानानन्दो भगवन्तमेतदवोचत्। इहाहं भगवन्तं अद्दशामि[h] सायाह्नसमये प्रतिसंलयनाद्व्युत्थाय विहारान्निष्क्रम्य ऊर्ध्वं[i] च उल्लोकेत्वा अधो च अवलोकेत्वा दिशाभागां च अभिविलोकेत्वा समं च भूमिभागं समवेक्षित्वा[j] स्मितं च प्रादुष्कुर्वन्तं[k] दीर्धं चंक्रमं चंक्रमन्तं। न च पुनस्तथागता[l] अर्हन्तः सम्यक्सम्बुद्धा अहेतु अप्रत्ययं स्मितं प्रादुष्करोन्ति। को भगवन् हेतुः कः प्रत्ययः स्मितस्य प्रादुष्करणाय। एवमुक्ते भगवानायुष्मन्तमानन्द[m]मेतदुवाच। पश्यसि त्वं च आनन्द एतं पृथिवीप्रदेशं। एवं ह्येतं[n] भगवन्[o]। एतस्मि[p] आनन्द पृथिवीप्रदेशे भगवतो काश्यपस्य आगमवस्तुं अभूषि। पश्यसि त्वमानन्द[q] एतं पृथिवीप्रदेशं। एवं[r] ह्येतं भगवन्। एतस्मिन्नानन्द[s] पृथिवीप्रदेशे भगवतो[t] काश्यपस्य कुटीवस्तु[u] अभूषि। पश्यसि त्वमानन्द[v] एतं पृथिवीप्रदेशं। एवं[w] ह्येतद्भगवं। एतस्मिन्नानन्द[x] पृथिवीप्रदेशे भगवतो काश्यपस्य[y] चंक्रमषष्टिः[z] अभूषि। पश्यसि त्वमानन्द[a] एतं पृथिवीप्रदेशं। एवं[b] ह्येतं भगवं। एतस्मिन्नानन्द[c] पृथिवीप्रदेशे त्रयाणां तथागतानामर्हतां सम्यक्सम्बुद्धानां[d] निषद्या[e] अभूषि भगवतो क्रकुच्छन्दस्य भगवतो[f] च कनकमुनिस्य भगवतो च कास्यपस्य।

अथ खल्वायुष्मानानन्दो अ[आ]श्चार्याद्भुतसंविग्नरोमहृष्टजातो[g] शीघ्रं शीघ्रं त्वरमाणरूपो[h] येन सो पृथिवीप्रदेशो[i][j] तेनोपसंक्रमित्वा तस्मि पृथिवीप्रदेशे[k] चतुर्गुणसंघाटिं प्रज्ञपेत्वा येन भगवां[l] तेनाञ्जलिं प्रणामेत्वा भगवन्तमेतदवोचत्। इह भगवां निषीदतु प्रज्ञप्त एव[m] आसने। अयं पृथिवीप्रदेशो[n] चतुर्हि तथागतेहि अर्हन्तेहि सम्यक्सम्बुद्धेहि

परिभुक्तो भविष्यति[a] भगवता क्रकुच्छन्देन भगवता[b] च कनकमुनिना भगवता च काश्यपेन भगवता[c] चैतर्हि[d]। निषीदतु[e] खलु भगवां प्रज्ञप्त[f] एव आसने। आयुष्मां[g] पि आनन्दो भगवतः पादौ शिरसा वन्दित्वा एकान्ते निषीदि। ते पि भिक्षू[h] भगवतः[i] Sen. 319 पादौ शिरसा वन्दित्वा एकान्ते निषीदेन्सुः[j]। एकान्ते निषण्णमायुष्मन्तमानन्दं[k] भगवानेतदवोचत्। इच्छसि[l] पुनस्त्वमानन्द तथागतस्य पूर्वनिवाससंयुक्तां धर्मीकथां भाषतो श्रोतुं[m] इममेव मारकरण्डं निगममारभ्य। एवमुक्ते आयुष्मानानन्दो भगवन्तमेतदवोचत्। एतस्य दानि भगवं[n] कालो एतस्य दानि सुगत समयो[o] यं भगवां[p] भिक्षूणामेतमर्थं भाषे। भिक्षू[q] भगवतो संमुखा श्रुत्वा संमुखा प्रगृहीत्वा[r] तथत्वाये धारयिष्यन्ति। एवमुक्ते[s] भगवानायुष्मन्तमानन्दमेतदवोचत्।

भूतपूर्वमानन्द भगवति[t] काश्यपे[u] अयं मारकरण्डो निगमो[v] वेरुडिङ्गो नाम ब्राह्मणग्रामो अभूषि। वेरुडिङ्गे[w][x] खलु आनन्द ब्राह्मणग्रामे घटिकारो नाम कुम्भकारो अभूषि भगवतो काश्यपस्य उपस्थायको। घटिकारस्य खलु पुनरानन्द कुम्भकारस्य ज्योतिपालो नाम[y] माणवको अभूषि[z] दारकवयस्यको सहपांशुक्रीडनको प्रियो मनापो अजन्यस्य ब्राह्मणस्य पुत्रो। अथ खल्वानन्द[a] भगवां[b] काश्यपो कोशलेषु चारिकां चरमाणो[c] महता भिक्षुसंघेन सार्धं सप्तहि भिक्षुसहस्रेहि येन कोशलानां वेरुडिङ्गो ब्राह्मणग्रामो तदवसारि तदनुप्राप्तः तत्रैव विहरति[d] इमस्मिं एव[e] वनखण्डे। अश्रोषि[f][g] खल्वानन्द घटिकारो कुम्भकारो भगवां किल काश्यपो कोशलेषु चारिकां चरमाणो येन कोशलानां वेरुडिङ्गो ब्राह्मणग्रामं तदवसारि तदनुप्राप्तो[h] तत्रैव विहरति अन्यतरस्मिं[i] वनखण्डे। अथ खल्वानन्द घटिकारो कुम्भकारो[j] येन ज्योतिपालो माणवो तेनुपसंक्रमित्वा[k] ज्योतिपालं[l] माणवमेतदवोचत्[m]। श्रुतमिदं[n] सम्यग्ज्योतिष्पाल[o]। भगवां किल काश्यपो कोशलेषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं सप्तहि भिक्षुसहस्रेहि येन[p] कोशलानां[q] वेरुडिङ्गो ब्राह्मणग्रामो तदवसारि तदनुप्राप्तः तत्रैव विहरति अन्यतरस्मिं Sen. 320

वनखण्डे[a]। किं पुनर्वयं[b] सम्यग्ज्योतिपाल येन भगवां काश्यपो तेनोपसंक्रमेम[c] भगवन्तं काश्यपं दर्शनाये[d] वन्दनाये पर्युपासनाये। एवमुक्ते ज्योतिपालो माणवो घटिकारं कुम्भकारमेतदवोचत्। किं मे भणे घटिकार[e] तेहि मुण्डिकेहि श्रमणेहि[f] दर्शनाये उपसंक्रान्तेहि पर्युपासनाये। द्वितीयं तृतीयं[g] पि आनन्द घटिकारो कुम्भकारो ज्योतिस्पालं माणवमेतदुवाच। ......किं मे भणे घटिकार[h] तेहि मुण्डेहि श्रमणेहि[i] दर्शनाये[j] उपसंक्रान्तेहि पर्युपासनाये।

अथ खल्वानन्द घटिकारस्य कुम्भकारस्य[k] एतदभूषि। को नु खलु स्यादुपायो[l][m] यं ज्योतिपालो माणवो भगवन्तं काश्यपं दर्शनाय उपसंक्रमेय पर्युपासनाय। अथ खल्वानन्द घटिकारस्य कुम्भकारस्य एतदभूषि। अस्ति खलु तस्यैव[n] वनखण्डस्य अविदूरे सुमुका नाम पुष्करिणी[o] यं नूनाहं ज्योतिपालेन माणवेन सार्धं येन सुमुका नाम पुष्करिणी गच्छेयं शीर्षस्नापनाय। अथ खल्वानन्द घटिकारो कुम्भकारो येन ज्योतिपालो माणवो तेनुपसंक्रमित्वा[p] ज्योतिपालं माणवमेतदुवाच। किं पुनर्वयं[q] सम्यग्ज्योतिपाल येन सुमुका नाम पुष्करिणी[r] तेनोपसंक्रमेम[s] शीर्षस्नापनाय[t]। एवमुक्ते आनन्द ज्योतिपालो माणवो घटिकारं कुम्भकारमेतदुवाच[u]। तेन हि भणे घटिकार सुखी भंत्र[v] यस्येदानि कालं मन्यसे। अथ खल्वानन्द घटिकारो कुम्भकारो शीर्षस्नानीयशाटिमादाय[w] ज्योतिपालेन माणवेन सार्धं येन सा पुष्करिणी तेनोपसंक्रमेन्सु स्नानाय। अथ खल्वानन्द ज्योतिपालो माणवो शीर्षस्नातो[x] उदकतीरे अस्थासि[y] केशां[z] सन्थापयमानो[a]। अथ खल्वानन्द घटिकारो कुम्भकारो[b] ज्योतिपालं माणवमेतदवोचत्। अयं सम्यग्ज्योतिपाल भगवां[c] काश्यपो इमस्मिं[d] येव वनखण्डे किं पुनर्वयं सम्यग्ज्योतिपाल येन भगवां[e] काश्यपो तेनुपसंक्रमेम भगवन्तं काश्यपं दर्शनाय
Sen. 321 पर्युपासनाय। एवमुक्ते ज्योतिपालो माणवो घटिकारं कुम्भकारमेतदवोचत्। किं[f] मे भणे घटिकार तेहि श्रमणकेहि दर्शनाये[g] उपसंक्रमन्तेहि पर्युपासनाये। अथ खल्वानन्द

[a]घटिकारो कुम्भकारो ज्योतिपालं [b]माणवं कृकाटिकायां गृह्य एतदवोचत्। अयं सम्यग्ज्योतिपाल भगवां काश्यपो [c]इमस्मिं एव वनखण्डे किं पुनर्वयं सम्यग्ज्योतिपाल येन भगवां काश्यपो [d]तेनुपसंक्रमेम भगवन्तं काश्यपं दर्शनायोपसंक्रमन्तं पर्युपासनाय। अथ खल्वानन्द ज्योतिपालो माणवो घटिकारं कुम्भकारं अपधुनित्वा प्रयाति। [e]तमेनं [f]घटिकारो कुम्भकारो अनुजवित्वा [g]प्रवेणिकेशेहि गृहीत्वा एतदवोचत्। अयं सम्यग्ज्योतिपाल भगवां काश्यपो इमस्मिं [h]एव वनखण्डे विहरति किं पुनर्वयं सम्यग्ज्योतिपाल येन भगवां [i]काश्यपस्[j]तेनोपसंक्रमेम भगवन्तं काश्यपं दर्शनाय पर्युपासनाय। अथ [k]खल्वायुष्मनानन्द ज्योतिपालमाणवस्य [l]एतदभूषि। न [m]खल्वप्रत्ययं वा तं यं मे घटिकारो कुम्भकारो [n]शीर्षस्नातं मूर्ध्नि केशेषु परामृषति नुदन्त[o]कं हीनाय जात्या समानो। तेन हि भणे घटिकार सुखी [p]भव यस्य दानि [q]कालं मन्यसे।

अथ खल्वानन्द घटिकारो कुम्भकारो ज्योतिपालेन माणवेन सार्धं येन भगवां [r]काश्यपो तेनुपसंक्रमित्वा भगवतः काश्यपस्य पादौ वन्दित्वा एकान्ते [s]अस्थासि। [t]एकान्तस्थितः आनन्द घटिकारो कुम्भकारो [u]भगवन्तं काश्यपमेतदवोचत्। अयं मे भगवन् [v]ज्योतिपालमाणवो [w]दारकवयस्यो [x]सहपांशुक्रीडनको प्रियो मनापो अजन्यस्य ब्राह्मणस्य पुत्रो तं भगवां ओवदतु अनुशासतु। अथ खल्वानन्द भगवां काश्यपो ज्योतिपालं माणवं [y]त्रीहि च शरणगमनेहि पंचहि च [z]शिक्षापदेहि समादापये। अथ खल्वानन्द ज्योतिपालो माणवो भगवन्तं काश्यपमेतदवोचत्। न तावदहं भगवन् सर्वाणि पंच शिक्षापदानि समादापयिष्यं। अस्ति [a]ताव मे एको पुरुषो विहेठको रोषको जीविताद्व्यपरोपयितव्यो। [b]एवमुक्ते भगवां ज्योतिपालं माणवमेतदवोचत्। [c]कतमो पुनर्ज्योतिपाल एको पुरुषो विहेठको रोषको जीविताद्व्यपरोपयितव्यो। Sen. 322 एवमुक्ते [d]आनन्द ज्योतिपालो माणवो भगवन्तं काश्यपमेतदवोचत्। अयं भगवं घटिकारो कुम्भकारो यो मे तदा एवं शीर्षस्नातं मूर्ध्नि केशेहि परामृषति। तदाहं

एवमाह[a]। उपसंक्रमेम भगवन्तं[b] काश्यपं दर्शनायोपसंक्रमन्तं[c] पर्युपासनाये। .... अपि च भवां[d] सुखी भवतु[e] घटिकारो कुम्भकारो एषोऽहं सर्वाणि एवं पंच शिक्षापदानि समादियामि। अथ खल्वानन्द भगवां काश्यपो घटिकारं कुम्भकारं ज्योतिपालं[f] च माणवं धार्म्याया कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा उद्योजयि। अथ खल्वानन्द घटिकारो ज्योतिपालो[g] च माणवो भगवतो काश्यपस्य पादौ शिरसा वन्दित्वा प्रक्रामि।

अथ खल्वानन्द ज्योतिपालमाणवो अचिरप्रक्रान्तो घटिकारं कुम्भकारमेतदवोचत्। त्वं[h] पि[i] भणे घटिकार भगवतो काश्यपस्य[j] सम्यग्धर्मं[k] देशितमाजानासि[l] यथैव[m] अहं[n]। एवमुक्ते आनन्द[o] घटिकारो कुम्भकारो ज्योतिपालं माणवमेतदवोचत्। एवमेतं[p] सम्यग्ज्योतिपाल। अहं पि भगवतो काश्यपस्य[q] एवं[r] सम्यग्धर्मं देशितमाजानामि यथैव त्वं। एवमुक्ते आनन्द ज्योतिपालो माणवो घटिकारं कुम्भकारमेतदुवाच[s]। कस्मात्पुनः[t] त्वं घटिकार भगवतो काश्यपस्य सन्तिके न अगारस्यानगारियं प्रव्रजसि। एवमुक्ते[u] आनन्द घटिकारो कुम्भकारो ज्योतिपालं माणवमेतदवोचत्। अस्ति मे[v] सम्यग्ज्योतिपाल मातापितरौ जीर्णवृद्धौ दुर्बलचक्षू तेषां नास्त्यन्यो[w] उपस्थायको[x]। तेनाहं भगवतो काश्यपस्य अन्तिके न अगारस्यानगारियं प्रव्रजामि। अथ खल्वानन्द ज्योतिपालस्य माणवस्य[y] नचिरस्यैव गृहवासे[z] अरति[a]रुत्पद्येत्[b] प्रव्रज्यायै चित्तं नमे। अथ खल्वानन्द ज्योतिपालो माणवो येन घटिकारो तेनुपसंक्रमित्वा[c] घटिकारं कुम्भकार-
Sen. 323 मेतदवोचत्। एहि[d] सम्यग्घटिकार[e] भगवतो काश्यपस्य सन्तिके अनुप्रणिधेमि प्रव्रज्यायै[f] प्रव्रजिष्यामि[g] अगारस्यानगारियं। अथ खल्वानन्द घटिकारो कुम्भकारो ज्योतिपालं माणवमुपादाय येन भगवान्काश्यपो[h] तेनुपसंक्रमित्वा[i] भगवतः काश्यपस्य पादौ शिरसा वन्दित्वा एकान्ते अस्थासि।

[a]एकमन्ते स्थितो आनन्द [b]घटिकारो कुम्भकारो भगवन्तं काश्यपमेतदवोचत् । [c]अयं मे भगवं ज्योतिपालो माणवो दारकवयस्यको सहपांशुक्रीडनको प्रियो मनापो अजन्यस्य ब्राह्मणस्य [d]पुत्रो । तं भगवां [e]प्रव्राजेतु उपसंपादेतु च । अथ खल्वानन्द [f]भगवां काश्यपो भिक्षू [g]आमन्त्रेसि । [h]प्रव्राजेथ भिक्षवो ज्योतिपालं माणवं उपसंपादेथ । अथ खल्वानन्द भिक्षवो ज्योतिपालं माणवं प्रव्राजेन्सुः । अथ खल्वानन्द [i]भगवां काश्यपो [j]ज्योतिपालस्मि भिक्षुस्मि अचिरोपसम्पन्ने कोशलेहि[षु] काशीषु [k]चारिकां प्रक्रामि ।

अथ खल्वानन्द भगवान्काश्यपो [l]काशीषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं सप्तहि भिक्षुसहस्रेहि येन काशीनां [m]वाराणसी नगरं तदवसारि तदनुप्राप्तः तत्रैव विहरति [n]ऋषिवदने मृगदावे । अश्रोषीत्खल्वानन्द [o]कृकी राजा भगवां किल काश्यपो काशीषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं सप्तहि भिक्षुसहस्रेहि येन काशीनां [p]वाराणसी [q]नगरं तदवसारि तदनुप्राप्तः तत्रैव विहरति [r]ऋषिवदने मृगदावे । अथ खल्वानन्द कृकी [s]काशिराजा अन्यतरं [t]पुरुषमामन्त्रेसि । एहि त्वं भो पुरुष येन भगवां काश्यपो तेनोपसंक्रमित्वा मम वचनेन [u]भगवन्तं [v]काश्यपं वन्दनं [w]वदेसि । कृकी [x]काशिराजा भगवतो काश्यपस्य पादौ शिरसा वन्दित्वा अल्पाबाधतां च अल्पातंकतां च बलं [y]सुखतां स्पर्शविहारतां च पृच्छति [z]सुवेतनानि च निवेशनं भक्तेन निमन्त्रेति सार्धं भिक्षुसंघेन सचास्य भगवां [a]काश्यपः अधिवासयति । एवमुक्ते आनन्द भगवां [b]काश्यपो तं [c]पुरुषमेतदुवाच । सुखी भवतु [d]कृकी काशिराजा [e]सकुमारो सपरिजनो । Sen. 324
[f]यस्य दानि कालं मन्यसे ।

अथ खलु स पुरुषो भगवतो अधिवासनां विदित्वा येन [g]वाराणसी नगरं तेन [h]प्रकामि । अथ खल्वानन्द सो पुरुषो येन कृकी काशिराजा तेनुपसंक्रामि । [i]कृकिं काशिराजमिदमवोचत् । [j]उक्त मे महाराज तव वचनेन भगवतो काश्यपस्य [k]वन्दनं । अल्पाबाधतां च अल्पातंकतां च सुखं च बलं च स्पर्शविहारतां च पृच्छितो सुवेतनानि

च भक्तेन निमन्त्रितो सार्धं[a] भिक्षुसंघेन । अधिवासेति च भगवां[b] काश्यपो यस्येदानि कालं मन्यसे । अथ खल्वानन्द क्रुकी काशिराजा[c] इमामेव रात्रिं प्रभूतं प्रणीतं खादनीयं भोजनीयं प्रतिजागरयित्वा[d] तस्या[e] एव रात्रिये अत्ययेनान्यतरं पुरुषमामन्त्रेसि । एहि त्वं भो पुरुष येन भगवां काश्यपो तेनोपसंक्रमित्वा भगवन्तं काश्यपमेवं वदेहि[f] । समयो[g] भगवं[h] क्रुकिस्य काशिराज्ञो निवेशने भक्ताये यस्य भगवं[i] कालं मन्यसे । साधु महाराज[j] त्ति सो पुरुषो क्रुकिस्य[k] काशिराज्ञो प्रतिश्रुत्वा वाराणसीतो नगरातो निर्गम्य[l] येन ऋषिवदनो मृगदावो[m] तेन प्रकामि[n] । अथ खल्वानन्द स पुरुषो येन भगवां काश्यपो तेनुपसंक्रमित्वा[o] भगवतो काश्यपस्य पादौ शिरसा वन्दित्वा भगवन्तं काश्यपमेतदुवाच । समयो भगवं क्रुकिस्य राज्ञो निवेशने भक्ताय यस्य दानि भगवं[p] कालं मन्यसे । अथ खल्वानन्द भगवां काश्यपो तस्य पुरुषस्य प्रतिश्रुत्वा[q] काल्यस्यैव निवासयित्वा[r] पात्रचीवरमादाय भिक्षुसंघपरिवृतो भिक्षुसंघपुरस्कृतः येन[s] वाराणसीनगरं तेन प्रक्रमते । तेन खलु पुनरानन्द समयेन क्रुकी[t] काशिराजा कुमारामात्य[u]परिवृतः स्वकस्य निवेशनस्य प्रतिद्वारे अस्थासि भगवन्तं काश्यपं सश्रावकसंघं प्रतिपालयमानो । अद्राक्षीत्खल्वानन्द क्रुकी काशिराजा भगवन्तं काश्यपं सश्रावकसंघं दूरतो एव[v] आगच्छन्तं[w] । दृष्ट्वा पुनर्येन भगवां काश्यपो सश्रावकसंघो तेनोपसंक्रमित्वा भगवतो काश्यपस्य सश्रावकसंघस्य पादौ शिरसा वन्दित्वा भगवन्तं काश्यपं सश्रावक-
Sen. 325 संघं पुरस्कृत्वा स्वकं निवेशनं प्रवेशेति ।

तेन खलु पुनः समयेन क्रुकिस्य[x] काशिराज्ञो निवेशने कोकनदो नाम प्रासादो नवो अचिरनिष्ठितो अपरिभुक्तपूर्वो[y] केनचित् श्रमणकेन[z] वा ब्राह्मणेन वा । अथ खल्वानन्द क्रुकी काशिराजा भगवन्तं काश्यपमेतदवोचत् । अयं मे भगवन्निवेशने[a] कोकनदो नाम प्रासादो नवो अचिरनिष्ठितो[b] अपरिभुक्तपूर्वो केनचिच्छ्रमणेन वा ब्राह्मणेन वा तं भगवां प्रथमं परिभुञ्जतु[c] । भगवता परिभुक्तं पश्चाद्वयं परिभुञ्जिष्यामः । एवमुक्ते

भगवां[a] काश्यपो क्रकिं काशिराजं एतदुवाच। तेन[b] हि महाराज सुखी भव यस्ये-[c]
दानीं कालं मन्यसे। अथ खलु[d] क्रकी काशिराजा कोकनदे[e] प्रासादे आसनानि
प्रज्ञापयेत्[f]खाद्यभोज्यम[g]भिनामयेत्। अथ खलु भगवां[h] कोकनदं प्रासादं अभिरुहित्वा[i]
निषीदे प्रज्ञप्त एव आसने यथासने च भिक्षुसंघः। अथ खलु आनन्द क्रकी काशिराजा
भगवन्तं काश्यपं स्वहस्तेनैव[j] खादनीयभोजनीयेन सन्तर्पयेत्संप्रवारयेत्[k]। एकमेकं
च सप्तसप्त पुरुषा सप्तसप्तेहि निष्ठानेहि[l] पर्णकुलकेन[m] च शालिना।

अथ खलु क्रकी काशिराजा भगवन्तं काश्यपं भुक्ताविं[n] धौतपाणिं अपनीतपात्रं
विदित्वा अन्यतरं नीचकमासनमादाय येन भगवां काश्यपो[o] तेनुपसंक्रमित्वा भगवतो
काश्यपस्य पादौ शिरसा वन्दित्वा एकान्ते निषीदि। एकान्ते निषण्णो[p] आनन्द[q]
क्रकी काशिराजा भगवन्तं काश्यपमेतदवोचत्। अधिवासेतु[r] भगवां वाराणसीये
नगरे वर्षावासं[s]। अहं[t] भगवं आरामं कारापयिष्यं इमस्मिं[u] च सप्त कूटागारसह-
स्राणि सप्त च पीठसहस्राणि सप्त च[v] वीथिसहस्राणि सप्त च तुरगसहस्राणि सप्त च
आरामिकसहस्राणि उपस्थापयिष्यन्ति यानि[w] भिक्षुसंघं[x] प्रत्येकंप्रत्येकं उपस्थिहि-
ष्यन्ति। एवंरूपेण उपस्थानेन भगवन्तं च उपस्थिहिष्यन्ति भिक्षुसंघं च। एवमुक्ते
आनन्द भगवां[y] काश्यपो क्रकिं काशिराजानमेतदवोचत्। न हि महाराज[z] शक्यं Sen. 326
वज्जिषु मे वर्षावासो भविष्यति। द्वितीयं पि तृतीयं पि एवमेव[a] कर्तव्यं। अथ
खल्वानन्द क्रकी काशिराजा[b] नैवं भगवां काश्यपो अधिवासेति वाराणसीयं नगरे
वर्षावासं ति प्रारोदीदश्रुकानि[c] च[d] प्रवर्तयि। अथ खल्वानन्द क्रकी काशिराजा
भगवन्तं काश्यपमेतदवोचत्[e]। अस्ति पुनर्भगवतो अन्यो पि एवंरूपो उपस्थायको
यथैवाहं। एवमुक्ते आनन्द भगवां काश्यपो क्रकिं राजानमेतदवोचत्। अपरिपूर्णो
खलु मे त्वं महाराज उपस्थायको। एवमुक्ते आनन्द क्रकी[g] काशिराजा भगवन्तं
काश्यपमेतदुवाच। कतमो पुनर्भगवतो मम पूर्णतरो[h] परिपूर्णतरो उपस्थायको। एव-

मुक्ते आनन्द भगवां[a] काश्यपो कृकिं काशिराजानमेतदवोचत् । अस्ति महाराज तुह्यं[b] एवं[c] विजिते वेरुडिङ्गं[d] नाम ब्राह्मणग्रामो[e]। तत्र घटिकारो[f] सो मे उपस्थायको। एवमुक्ते आनन्द कृकी काशिराजा भगवन्तं[g] काश्यपमेतदवोचत् । केवरूपा पुनर्भगवं[h] घटिकारस्य भोगा येहि भगवन्तमुपस्थिहति संघं च । एवमुक्ते[i] आनन्द[j] भगवां काश्यपो कृकिं काशिराजानमेतदवोचत् । घटिकारो महाराज कुम्भकारो यावज्जीवं प्राणाति-[k]पातातो प्रतिविरतो[l] यावज्जीवमदत्तादानातो[m] प्रतिविरतो यावज्जीवं अब्रह्मचर्यातो प्रतिविरतो यावज्जीवं मृषावादात्प्रतिविरतो यावज्जीवं सुरामैरेयमद्यप्रमदस्थानातो प्रतिविरतो यावज्जीवं नृत्यगीतवादिता प्रतिविरतो यावज्जीवं गन्धमाल्यवर्णकधारणात्प्रतिविरतो यावज्जीवं उच्चशयना[n]महाशयनात्प्रतिविरतो यावज्जीवं विकारभोजनात्प्रतिविरतो यावज्जीवं जातरूपरजतप्रतिग्रहणात्प्रतिविरतो । न खलु महाराज घटिकारो कुम्भकारो सामं पृथिवीं खनति इति । अथ खलु ये ते भवन्ति[o] Sen. 327 मूषोत्किरा वा वारिप्ररोपिता वा वारुच्छिन्ना वा मृत्तिका ततो मृत्तिकामादाय भाजनकानि कृत्वा चतुर्महापथे निक्षिपति । ये तेहि[p] भाजनेहि अर्थिका[q] भवन्ति ते तानि भाजनानि मुद्गप्रभिन्नं वा माषप्रभिन्नं[r] वा तण्डुलप्रभिन्नं[s] वा पूरेत्वा उत्किरित्वा भाजनकान्यादाय अनपेक्षा येव प्रक्रमन्ति[t]। एवंरूपा महाराज घटिकारस्य कुम्भकारस्य[u] भोगाः[v] येहि[w] तथागतश्च उपस्थितो संघश्च । मातापितरौ च जीर्णौ वृद्धौ दुर्बलचक्षू ।

एकमिदमहं[x][y] महाराज समयं[z] वेरुडिङ्गे[a] ब्राह्मणग्रामे विहरामि । सोऽहं महाराज काल्यमेव निवासयित्वा पात्रचीवरमादाय वेरुडिङ्गं ब्राह्मणग्रामं पिण्डाय प्रक्रामि । सोऽहं महाराज वेरुडिङ्गे ब्राह्मणग्रामे सावदानं पिण्डाय चरन्तो येन घटिकारस्य कुम्भकारस्य निवेशनं तेनोपसंक्रमित्वा उद्देशे अस्थासि । तेन खलु पुनः समयेन घटिकारो कुम्भकारो[b] स्वकान्निवेशनान्निष्क्रान्तो अभूषि । अथ खलु महाराज

घटिकारस्य कुम्भकारस्य मातापितरौ तथागतमेतदवोचत्। निष्क्रान्तो[a] ते भगवं उपस्थायको। एषो उपरिकोष्ठके सूपश्च[b] ओदनश्च अतो भगवां परिभुंजतु[c]। सोऽहं महाराज उपरिकोष्ठकात्सूपं[d] ओदनं च देवताहि प्रतिग्राहेत्वा[e] परिभुंजित्वा प्रक्रामि। अथ खलु महाराज घटिकारो कुम्भकारो येन स्वकं निवेशनं तेनोपसंक्रमि। अद्राक्षीत्खलु महाराज घटिकारो कुम्भकारो उपरिकोष्ठका सूपं च ओदनं च परिभक्तं[f] दृष्टान[g] पुनर्मातापितरौ[g] एतदवोचत्। केनिमा[h] तात घटिकारस्य उपरिकोष्ठका सूपो च ओदनं[i] च परिभुक्ता। एवमुक्ते[j] महाराज घटिकारस्य[k] कुम्भकारस्य मातापितरौ घटिकारं कुम्भकारमेतदवोचत्। भगवता पुत्र[l] काश्यपेन। अथ खलु महाराज घटिकारस्य[m] कुम्भकारस्य एतदभवत्। लब्धा[n] पुनर्मे सुलब्धा लाभा यस्य मे भगवां[o] काश्यपो[p] यावदेको पि अतिविश्वस्तो। तस्य चैवमर्धमासं प्रीतिसुखं कायं न विजहति[q] सप्ताहं च मातापितॄणां जीर्ण[r]वृद्धानां[s] दुर्बलचक्षूणां।

एकमिदं महाराज समयं तथागतस्य अरण्यकुटिकाये[t] छाद्यमानाये[u] तृणानि[v] न Sen. 328 संभुणन्ति। सोऽहं[w] महाराज भिक्षूणामामन्त्रयेसि। गच्छथ[x] भिक्षवो घटिकारस्य कुम्भकारस्य निवेशनं तृणानि आनेथ। अथ खलु महाराज ते भिक्षूः येन घटिकारस्य कुम्भकारस्य निवेशनं तेनोपसंक्रमेन्सुः[y]। तेन खलु पुनर्महाराज समयेन घटिकारो कुम्भकारः[z] स्वकातो निवेशनातो निष्क्रान्तो अभूषि। ते तत्र नाद्दशेन्सु[a] तृणानि अद्दशेन्सु नवच्छदनां आवेशनशालां। अथ खलु महाराज ते भिक्षूः येन[b] तथागतो तेनोपसंक्रमित्वा तथागतस्य पादौ शिरसा वन्दित्वा तथागतं[c] च एतदवोचत्। निष्क्रान्तो[d] ते भगवं[e] उपस्थायको नास्ति चात्र कानिचि तृणानि अस्ति चात्र नवच्छदना आवेशनशाला[f]। एवमुक्ते महाराज तां भिक्षुं एतदवोचत्। गच्छथ भिक्षवो घटिकारस्य कुम्भकारस्य नवच्छदनां[g] आवेशनशालां[h] उत्तृणीकृत्वा[i] तृणानि आनेथ। अथ खलु महाराज ते भिक्षू[j] येन घटिकारस्य कुम्भकारस्य निवेशनं

तेनोपसंक्रमित्वा घटिकारस्य कुम्भकारस्य नवच्छदनामावेशनशालामुत्तृणीकरेन्सु[a][b][c]। अथ खलु महाराज घटिकारस्य कुम्भकारस्य मातापितरौ[d] तां भिक्षूनेतदवोचत्। को एष घटिकारस्य कुम्भकारस्य नवच्छदनामावेशनशालामुत्तृणीकृत्वा[e] तृणानि हरति। एवमुक्ते महाराज ते भिक्षू घटिकारस्य कुम्भकारस्य मातापितरौ एतदुवाच। यत्र[f] आयुष्मं भिक्षूणां भगवतो काश्यपस्य च अरण्यकुटिकाये[g] छाद्यमानाये तृणा[h] न संभुणन्ति[i] तत्र एतानि तृणानि नीयन्ति। एवमुक्ते महाराज घटिकारस्य[j] कुम्भकारस्य मातापितरौ तां भिक्षूनेतदवोचत्। हरथ[k] हरथ स्वकानि व। अथ खलु महाराज घटिकारो कुम्भकारो येन स्वकं निवेशनं तेनोपसंक्रमेसि[l]। अद्राक्षीत्खलु महाराज घटिकारो कुम्भकारो नवच्छदनामावेशनशालामुत्तृणीकृतां[m][n] तृणानि हृतानि दृष्ट्वा च पुनर्मातापितरौ Sen. 329 एतदवोचत्। केनिमा[o] तात घटिकारस्य कुम्भकारस्य नवच्छदना[p] आवेशनशाला उत्तृणी-[q]कृता तृणानि[r] हृतानि। एवमुक्ते घटिकारस्य कुम्भकारस्य मातापितरौ घटिकारं कुम्भकारमेतदवोचत्। भगवतो पुत्र काश्यपस्य अरण्यकुटिकाये[r] तृणानि न प्रभवन्ति तत्र[s] एतानि भिक्षुभिस्तृणानि[t] नीतानि। अथ खलु महाराज घटिकारस्य कुम्भकारस्य[u] एतदभवत्[v]। लब्धा[w] मे सुलब्धा लाभा यत्पुनरस्य मे भगवां काश्यपो[x] यावदेको[y] पि अतिविश्वस्तो। तस्य[z] चैकमासं प्रीतिसुखं कायं न विजहे अर्धमासं च अन्धानां मातापितृणां[a]। न खलु पुनरहं महाराज अभिजानामि घटिकारस्य कुम्भकारस्य इदमेवरूपं दौर्मनस्यप्रतिलाभं[b] यथैव महाराजे न मे भगवां काश्यपो अधिवासेसि[c] वाराणसीये नगरे वर्षावासन्ति।

अथ खल्वानन्द[d] कृकिस्य[e] काशिराज्ञो एतदभवत्। लाभा[f] पुनर्मे सुलब्धा यस्य मे एवंरूपो ब्रह्मचारी विजिते प्रतिवसति द्विपादकानि पुण्यक्षेत्राणि। अथ खल्वानन्द कृकी काशिराजा घटिकारस्य कुम्भकारस्य पर्णकुलशालिस्य[g] शत वाहां

प्रेषयेत् नवोदकं च तैललवणक्वथनं[a]। अथ खल्वानन्द काश्यपो कृकिं काशिराजानं धर्म्यया कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा उत्थायासनातो प्रक्रामि।

अथ खल्वानन्द भगवां[b] काश्यपो पश्चाद्भक्तं[c] पिण्डपात्रप्रतिक्रान्तो भिक्षुणामामन्त्रेसि[d]। निषीदथ[e] भिक्षवो सन्निपतिथ भिक्षवो बन्धथ पर्यंकं[f] एषो हि पयङ्कं बन्धामि तावद्[g] न भिन्दामि यावन्न इमेषां सप्तानां भिक्षुसहस्राणामेतेहि एवं आसनेहि निषण्णानां[h] अनुपादायाश्रवेभ्यश्चित्तानि विमुक्तानि[i]। साधु भगवन्निति[j] ते भिक्षु भगवतो काश्यपस्य[k] प्रतिश्रुत्वा सन्निषीदेन्सुः[l] संनिपतेन्सुः[m] बन्धेन्सुः पर्यङ्कं। अथ खल्वानन्द ज्योतिपालस्य भिक्षुस्य[n] एकरहोगतस्य प्रतिसंलीनस्य अयमेवरूपश्चेतसो परिवितर्को[o] उत्पद्ये। अहो पुनरहं भवेयमनागतमध्वानं तथागतो[p] अर्हं सम्यक्सम्बुद्धो Sen. 330 विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च। सो इमं च लोकमभिज्ञाय[q] संदेवकं लोकं समारकं सब्रह्मकं सश्रमणं प्रजां सदेवमनुष्यां इहैव वाराणस्यां ऋषिवदने मृगदावे धर्मचक्रं प्रवर्तेयं द्वादशाकारं अप्रवर्तियं[r] श्रमणेन[s] वा ब्राह्मणेन वा देवेन वा मारेण वा केनचिद्वा पुनर्लोके सह धमण। एवं च सर्वाकारसंपन्नं[t] सर्वाकारपरिपूर्णं च धर्मं देशयेयं[u] यथापि भगवां काश्यपो एतरहिं[v]। एवं च देवमनुष्या[w] श्रोतव्यं श्रद्धातव्यं मन्येन्सु तथा भगवतो काश्यपस्य एतरहिं[x]। तं भवेयं[y] बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनकायस्यार्थाय[z] हिताय सुखाय देवानां च मनुष्याणां[a] च। हायेन्सु[b] आसुरा काया दिव्या काया अभिवर्धेन्सु[c]। अथ खल्वानन्द भगवां काश्यपो[d] ज्योतिपालस्य भिक्षुस्य इदमेवरूपं चेतसा[e] एव चेतोपरिवितर्कमाज्ञाय अन्यतरं[f] भिक्षुमामन्त्रयसि। एहि त्वं भिक्षु येन ज्योतिपालो[g] भिक्षुस्तेनोपसंक्रमित्वा ज्योतिपालं भिक्षुमेवं[h] वदेहि[i]। शास्ता ते आयुष्मं[j] आमन्त्रेति[k]। उपसंक्रमे[l] येन तथागतो[m]। भगवतो काश्यपस्य प्रतिश्रुत्वा[n] येन ज्योतिपालो भिक्षुस्ते-

नोपसंक्रमित्वा ज्योतिपालं भिक्षुमेतदवोचत्। शास्ता[a] आयुष्मं ज्योतिपाल आमन्त्रयति उपसंक्रमे येन भगवां। साध्वायुष्मन्निति आयुष्मां ज्योतिपालस्तस्य भिक्षुस्य प्रतिश्रुत्वा येन[b] भगवान्काश्यपस्तेनोपसंक्रमित्वा भगवतः काश्यपस्य पादौ शिरसा वन्दित्वा एकान्ते निषीदि[c]। एकान्ते निषण्णं[d] आयुष्मन्तं ज्योतिपालं भिक्षुं भगवां काश्यप एतदवोचत्[e]। ननु[f] ज्योतिपाल एकस्य ज्योतिपालस्य[g] रहोगतस्य प्रतिसंलीनस्य अयमेवंरूपश्चेतसो[h] परिवितर्क[i] उत्पद्ये। अहो पुनरहं[j] भवेयं अनागतमध्वानं तथागतोऽर्हं सम्यक्सम्बुद्धो Sen. 331 विद्याचरणसम्पन्नो सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां[k] च। सो इमं च लोकमभिज्ञाय परं च लोकमभिज्ञाय[l] सदेवकं च लोकं समारकं सश्रमणब्राह्मणं प्रजां सदेवमनुष्यां इहैहैव वाराणसीये[m] ऋषिवदने[n] मृगदावे धर्मचक्रं प्रवर्तेयं त्रिपरिवर्तं द्वादशाकारं अप्रवर्तियं श्रमणेन वा ब्राह्मगेन[o] वा मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सह धर्मेण। एवं च सर्वाकारसंपन्नं[p] सर्वाकारपरिपूर्णं धर्मं देशयेयं[q] यथापि भगवां काश्यपो एतरहिं। एवं[r] च समग्रं[s] भिक्षुसंघं परिहरेयं यथा भगवां काश्यपो एतर्हिं। एवं[t] च मे देवा त्र मनुष्या च श्रोतव्यं श्रद्धातव्यं मन्येन्सु यथापि भगवतो काश्यपस्य एतरहि[u]। तं भवेय्या[v] बहुजनहिताय बहुजनसुखाय लोकानुकंपायै[w] महतो जनकायस्यार्थाय[x] हिताय सुखाय देवानां च मनुष्याणां च। हायेन्सु[y] आसुरा काया दिव्या काया अभिवर्द्धेन्सु[z]।

एवमुक्तो[a] आनन्द ज्योतिपालो भिक्षुर्भगवन्तं काश्यपमेतदवोचत्। एवमेतं भगवन्[b]। एवमुक्ते आनन्द भगवां ज्योतिपालं भिक्षुमेतदवोचत्। तस्माद्धि ज्योतिपाल[c] इदं सुवर्णपीठकं[d] दुष्ययुगं बुद्धप्रमुखे भिक्षुसंघे[e] देहि कृतपुण्यास्ते देवा च मनुष्याश्च 02 Sen. 332 श्रोतव्यं श्रद्धातव्यं[f] मनिष्यन्ति। अदासि[g] खल्वानन्द ज्योतिपालो भिक्षुः सुवर्णपीठकं दुष्ययुगं बुद्धप्रमुखे[h][i] भिक्षुसंघे। अथ खल्वानन्द भगवां[j] काश्यपो स्मितं प्रादुष्करित्वा ज्योतिपालं भिक्षुं व्याकार्षीत्। भविष्यसि त्वं ज्योतिपाल अनागतमध्वानन्तथागतो-[k]

ऽर्हन् सम्यक्सम्बुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां[a] च। सो इमं च लोकं अभिज्ञाय परं च लोकमभिज्ञाय सदेवकं च लोकं समारकं सब्रह्मकं सश्रमणब्राह्मणीं[b] प्रजां सदेवमनुष्यां[c] इहैव वाराणसीये ऋषिवदने मृगदावे धर्मचक्रं[d] प्रवर्तयिष्यसि त्रिपरिवर्तं[e] द्वादशाकारं अप्रवर्तितं केनचिच्छ्रमणेन[f] वा ब्राह्मणेन वा देवेन वा मारेण वा केनचिद्वा[g] पुनर्लोके सह धर्मेण[h]। एवं च[i] सर्वाकारसम्पन्नं सवाकारपरिपूर्णं धर्मं देशयिष्यसि[j] यथापि भगवां[k] काश्यपा एतरहिं[l]। एवं च समग्रं[m] श्रावकसंघं परिहरिष्यसि[n] यथापि भगवां काश्यपो एतरहिं। एवं च[o] ते देवा च मनुष्या च श्रोतव्यं श्रद्धातव्यं मन्येन्सु[p] यथापि भगवतो[q] काश्यपस्य व एतरहि। तं भविष्यसि[r] बहुजनहिताय बहुजनसुखाय[s] लोकानुकंपायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां[t] च। हायिष्यन्ति[u] आसुरा काया दिव्या काया अभिवर्द्धिष्यन्ति।

अथ खल्वानन्द भगवता काश्यपेन ज्योतिपालस्मि[v] व्याकृते भूम्या देवा घोषमुदीरयेन्सु[w]। एषो मारिषा[x] भगवता काश्यपेन ज्योतिपालो नाम भिक्षुर्व्याकृतो सो भविष्यति अनागतमध्वानं तथागतोऽर्हं सम्यक्संबुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः[y] शास्ता[z] देवानां च मनुष्याणां च। सो इमं लोकमभिज्ञाय परं च लोकमभिज्ञाय सदेवकं[a] च लोकं समारकं सब्रह्मकं सश्रमणब्राह्मणीं प्रजां सदेवमनुष्यां अभिज्ञाय इह एव वाराणसीये ऋषिवदने मृगदावे धमचक्रं प्रवर्तयिष्यति त्रिपरिवर्तं द्वादशाकारं अपरिवर्तितं श्रमणेन[वा]ब्राह्मणेन वा देवेन वा [b]मारेण वा ब्रह्मणा वा केनचिद्वा पुनर्लोके सह धर्मेण। एवं सर्वाकारसम्पन्नं[c] सर्वाकार- Sen. 333
परिपूर्णं धर्मं देशयिष्यति यथापि भगवां[d] काश्यपो एतरहिं[e]। तद्भविष्यति बहुजनहियाय बहुजनसुखाय लोकानुकम्पायै[f] महतो जनकायस्यार्थाय[g] हिताय सुखाय देवानां च मनुष्याणां च। हायिष्यन्ति आसुरा[h] काया दिव्या काया अभिवर्द्धिष्यन्ति[i]। भूम्यानां[j]

देवानां घोषं श्रुत्वा चातुर्महाराजकायिका देवाः त्रायस्त्रिंशा यामाः तुषिता निर्माणरतयः परनिर्मित[a]वशवर्तिन इति। तत्मुहूर्तं यावद् ब्रह्मकायिका देव[b]निकाया घोषमभ्युद्गच्छेत्। एषो मारिष भगव[c]ता काश्यपेन ज्योतिपालो नाम भिक्षु[d] व्याकृतो सो भविष्यति अनागतमध्वानं तथागतोऽर्हं सम्यक्संबुद्धो विद्याचरणसम्पन्नो सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां[e] च। सो इमं च लोकमभिज्ञाय परं च लोकं अभिज्ञाय सदेवकं[f] च लोकं च सब्रह्मकं सश्रमणब्राह्मणीं प्रजां सदेवमनुष्याम्[g]भिज्ञाय इह[h] एव वाराणसायं ऋषिवदने मृगदावे धर्मचक्रं[i] प्रवर्तयिष्यति त्रिपरिवर्तं[j] द्वादशाकारं अप्रवर्तियं श्रमणेन[k] वा ब्राह्मणेन वा देवेन वा मारेण वा ब्रह्मणा वा केनचिद्वा पु[l]नर्लोके सह धर्मेण[m]। एवं च सर्वाका[n]रसम्पन्नं च सर्वाकारपरि[o]पूर्णं धम देशयिष्यति यथापि भगवां काश्यपो ए[p]तर्हि। एवं च देवा च मनुष्या च श्रोतव्यं श्रद्धातव्यं म[q]निष्यन्ति यथापि भग[r]वतो का[s]श्यपस्य एत[t]र्हि। तद्भविष्यति बहुजनहिताय वहुजनसुखाय लोकानुकंपा[u]यै महतो जनका[v]यस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां[w] च। हायिष्यन्ति आसुरा काया दिव्या काया अभिवर्द्धिष्यन्ति।

अथान[x]न्द भगवां काश्य[y]पस्तस्मिं घोषेऽन्तर्हिते तां भि[z]क्षून्धर्मया कथया संदर्शये Sen. 334 समादापये समुत्तजये संप्रह[a]र्षये। एवं भिक्षवो वितर्के[b]थ एवं[c] मा वितर्केथ एवं मनसिकरोथ[d] एवं मा मनसिकरोथ। आ[e]त्मद्वीपा भिक्षवो विहरथ अनन्यद्वीपाः आ[f]त्मशरणाः अनन्यशरणाः धर्मद्वीपा अन[g]न्यद्वीपाः धर्मशरणा अनन्यशरणाः। अथ खलु भग[h]वां आदीप्तेन कायेन संप्रज्वलितेन सज्योतिभूतेन एकं[i] तालं वैहायसम[j]भ्युद्गतो भि[k]क्षूं धर्मया कथया संदर्[l]येत्समादा[m]पयेत्समुत्तेजयेत्संप्र[n]हर्षयेत्। एवं भो भिक्षवो वितर्के[o]थ एवं मा वितर्केथ एवं मनसिकरोथ एवं मा मनसिकरोथ आत्म[p]द्वीपा भिक्षवो विहरथ अनन्यद्वीपा आत्म[q]शरणा अनन्यशरणाः धर्मद्वीपा अन[r]न्यद्वीपा धर्मशरणा अनन्यशरणाः। अथ खल्वान[s]न्द भगवां काश्यपो एकतालाद् द्वितालं वैहायसमभ्युद्गम्य द्वितालात्[t] त्रितालं त्रितालातो

चतुत्तालं चतुतालातो पंचतालं[a] पंचतालातो षट्तालं षट्तालातो सप्ततालं सप्तताल-[b]संस्थितो तां भिक्षू धर्मया कथया संदर्शयति समादापयति समुत्तेजयति संप्रहर्षयति । एवं भिक्षवः[c] वितर्केथ एवं मा वितर्केथ एवं मनसिकरोथ एवं मा मनसिकरोथ । आत्मद्वीपा भिक्षवो विहरथ[d] अनन्यद्वीपा आत्मशरणा[e] अनन्यशरणा धर्मशरणा अनन्यशरणाः । अथ खल्वानन्द भगवां[f] काश्यपो सप्ततालातो[g] षट्तालसंस्थितो षट्तालात्पंचतालं पंचतालातो[h] चतुतालं[i] चतुतालातो[j] त्रितालं त्रितालातो द्वितालं द्वितालातो एकतालं एकतालातो स्वके आसने निषण्णो तां भिक्षू[k] धर्मया[l] कथया संदर्शयेत्समादापयेत्समुत्तेजयेत्संप्रहर्षयेत्[m] । एवं भिक्षवो[n] वितर्केथ एवं मा वितर्केथ एवं मनसिकरोथ[o] एवं मा मनसिकरोथ । आत्मद्वीपा भिक्षवो विहरथ अनन्यद्वीपा आत्मशरणा अनन्यशरणा[p] धर्मद्वीपा अनन्यद्वीपा धर्मशरणा अनन्यशरणाः । अथ खल्वानन्द भगवां काश्यपः पर्यङ्कं[q] भिन्दन्तो तां भिक्षू[r] आमन्त्रयसि । अहं भिक्षवो पर्यङ्कं Sen. 335
भिन्दामि सर्वेषामिमेषां सप्तानां भिक्षुसहस्राणां एतेहि[s] एवं आसनेहि[t] निषण्णानामनुपादायाश्रवेभ्यश्चित्तानि[u] विमुक्तानि स्थापयित्वा ज्योतिपालस्य भिक्षुस्य[v] । सो[w] पि मह्यं व्याकृतो व अनुत्तरायै[x] सम्यक्संबोधये । स्यात्[y] खलु पुनरानन्द एवमस्यास्यात्[z] अन्यो सो तेन कालेन[a] तेन समयेन ज्योतिपालो नाम भिक्षुः[b] अभूषि[c] । नैतदेवं द्रष्टव्यं । अहं सो तेन कालेन तेन समयेन ज्योतिपालो नाम भिक्षु[d] अभूषि । इदमवोचद्भगवानात्तमना[e] आयुष्मानानन्दो तानि[f] सप्त च भिक्षुसहस्राणि भगवतो भाषितमभिनन्देन्सुः[g][h] ।

इति[i] श्रीमहावस्तुअवदाने ज्योतिपालसूत्रं[j] समाप्तं ॥

ज्योतिपालेन भिक्षुणा भगवतो काश्यपस्य सश्रावकसंघस्य[k] य्वागूपानं कृत्वा शतसहस्रेण[l] केशरं क्रीणित्वा भगवन्तं काश्यपं सश्रावकसंघं अभ्योकिरेसि सुवर्ण-°पीठकं च दुष्ययोगं[m] भगवतो काश्यपस्य अदासि । एवं च अनुप्रणिधेसि[n] । यथायं

भगवां[a] काश्यपो सम्यक्संबुद्धो द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतो अशीतिहि अनुव्यंजनेहि उपशोभितशरीरो अष्टदशेहि आवेणिकेहि[b] बुद्धधर्मेहि[c] समन्वागतो दशहि तथागतबलेहि बलवां चतुर्हि वैशारद्येहि विशारदो अहो पुन अहं[d] पि अनागतमध्वानं भवेयं तथागतोऽहं सम्यक्संबुद्धो विद्याचरणसंपन्नो सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च यथायं भगवां काश्यपो एतरहि[e]। एवं च त्रिपरिवर्तं[f] द्वादशाकारं अनुत्तरं धर्मचक्रं प्रवर्तेयं[g] यथापि भगवान्काश्यपो एतरहिं[h]। एवं च श्रावकसंघं[i] परिहरेयं[j] यथायं भगवां[k] काश्यपो एतरहि[l]। एवं च मे ते देवा च मनुष्या च श्रोतव्यं श्रद्धातव्यं मन्येन्सुः[m] यथापि भगवतो काश्यपस्य एतरहि[n]। एवं तीर्णो
Sen. 336 तारयेयं मुक्तो मोचयेयं आश्वस्तो आश्वासयेयं परिनिर्वृतो[o] परिनिर्वापयेयं यथायं भगवां[p] काश्यपो एतरहिं[q]। तं भवेयं[r] बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च। ज्योतिपालः[s] काश्यपेन अनुत्तराये सम्यक्सम्बोधये व्याकृतो[t]। भविष्यसि[u] त्वं ज्योतिपाल[v] अनागतमध्वानं[w][x] तथागतोऽहं[y] सम्यक्सम्बुद्धो विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च इमस्मिं एव भद्रकल्पे समनन्तरं[z] द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतो[a] अशीतिहि अनुव्यंजनेहि उपशोभितशरीरो अष्टादशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतो दशहि तथागतबलेहि बलवां चतुर्हि वैशारद्येहि विशारदो। एवं तीर्णो[b] तारयिष्यसि मुक्तो मोचयिष्यसि आश्वस्तो आश्वासयिष्यसि परिनिर्वृतो परिनिर्वापयिष्यसि यथापि अहं एतरहिं[c]। तं[d] भविष्यसि बहुजनहिताय बहुजनसुखाय महतो जनकायस्यार्थाय[e] हिताय सुखाय लोकानुकंपायै देवानां च मनुष्याणां[f] च। समनन्तरव्याकृतो[g] पुनर्ज्योतिपालो भिक्षुर्भगवता[h] काश्यपेन[i] सम्यक्संबुद्धेन इयं महापृथिवी अतीव षड्विकारं कम्पे प्रकम्पे संप्रकम्पे भूम्या च देवा घोषमुदीरयेन्सुः[j] शब्दमनुश्रावयेन्सु[k]। यथान्येषु व्याकरणेषु विस्तरेण कर्तव्यं[l] यथापि[m] अयं भगवतो

अनुप्रणिधिः[a]। काश्यपमनुप्रव्रजित्वा शोधये[b] चारामं पानीयं चोप[c]स्थाये ज्योतिपालो बोधिसत्वो संबुद्धेन अनुशिष्टो।

[d]य्वागूपानं अदासि सुवर्णपी[e]ठकं च वस्त्रयुगं च।
बोधिसत्वो ज्योतिपालो[f] प्रार्थयमानो भ[g]वनिरोधं ॥१॥
सो तं दानं[h] दत्त्वा प्रणिधेसि लोकनाय[i]को अस्यां।
[j]देव[k]मनुष्याचर्यो[l] आर्यं धर्मं प्रकाशे[m]य्या ॥२॥

एवं च म[n]ह्यं अस्यात्प्रकाशना ध[o]र्मस्य एवं च ब[p]हूसत्वा आर्यधर्मेहि[q] निवेशेय्या। Sen. 337
एवं च मे श्रु[r]णेन्सु देवमनुष्या वाक्यं एवं च धर्मचक्रं प्रवर्ते[s]यं बहुजनहिताय धर्मोल्कां प्रज्वालेयं प[t]राहणेयं धर्मभेरीं सप[u]ताकां उच्छ्रपयेयं धर्मकेतुं धर्मशंखं प्रपूरयेयं [v]कृच्छ्रापन्नैः जातिजरापीडि[w]तैर्मरणधर्मैः भवचक्षुकैः अपायेहि[x] प्रज्ञाचक्षु[y] निवेशेय्यं। संजीवे कालसूत्रे सं[z]घाते रौरवे अवी[a]चिस्मिं षट्सु गतिषु विकीर्णा भवसंसारात्परिमोचयेयं नरके प[b]क्वविपक्वां अपा[c]यनिपी[d]डितां मरणधर्मां अल्पसुखदुःखबहुलां भवसंसारात्परिमोचयेयं। [e]अर्थं चरेयं लोकस्य देवमनुष्याणां दे[f]शेयं[g] धर्मं। एवं वि[h]नयं सत्वा यथायं लोकप्रद्योतो ॥१॥

बुद्धो तुवं हो[i]हिसि लोकना[j]यको।
अनागते इमस्मिं भद्रकल्पे।
कपिलाह्वये [k]ऋषिवदनस्मिं शाकियो।
[l]तदा तव प्रणिधिविपाको भेष्यति ॥३॥

[m]अखण्डं अच्छिद्रमशबलकल्माषं परिपूर्णं परिशुद्धं ब्रह्मचर्यं चरित्वा कालगतो [n]तुषिते नाम देवनिकाये श्वेत[o]केतुर्नाम देवपुत्रो मर्हद्धिको महानुभावो सोऽन्यां देवां

दिव्येहि दशहि स्थानेहि अभिभवति[a] दिव्येनायुषा दिव्येन वर्णेन दिव्येन सुखेन दिव्येन[b] ऐश्वर्येण दिव्येन परिवारेण दिव्येन रूपेण दिव्येहि शब्देहि दिव्येहि गन्धेहि दिव्येहि रसेहि दिव्येहि[c] प्रष्टव्येहि[d]। [अन्ये[e] पि देवपुत्रा[f] नं आपृच्छे यं परिपृच्छनीयं इति ।] अयं श्वेतकेतुर्नाम देवपुत्रो पण्डितो व्यक्तो विशारदो कुशलो मेधावी चत्वारिंशतीहि बुद्धसहस्रेहि अनुप्रव्राजितो। पंचाशीतीनां[g] बुद्धसहस्राणामधिकारकर्माणि[h] कृतानि षण्णवतीहि प्रत्येकबुद्धकोटीहि[i] को पुनर्वादो श्रावकमहेशाख्येहि[j]।

Sen. 338 चत्वारिंशं[k] बुद्धसहस्राणि निर्वृता[l] लोकनायका बुद्धा ।
येषु जिनो अचरि ब्रह्मचर्यं प्रार्थयमानो भवनिरोधं[m] ॥४॥
पंचाश बुद्धसहस्राणि निर्वृता लोकनायका[n] बुद्धा[o] ।
येहि जिनो[p] अकासि कालं प्रार्थयमानो भवनिरोधं ॥५॥
षण्णवति[q] प्रत्येकबुद्धकोटीनि[r] निर्वृत्तानि[s] स्वयंभुनो[t] ।
येषु[u] जिन अकासि कालं[v] प्रार्थयमानो भवनिराधं ॥६॥
अपरिमिता[w] अर्हन्तकोटी निर्वृता येषु महाध्यायीषु ।
जिनो अकासि कालं[x] प्रार्थयमानो भवनिरोधं ॥७॥
एतेषु पूर्वयोगा[y] प्रकीर्तिता शास्तुनो[z] दशबलस्य ।
अल्पा[a] भणिता बहू[b] अभणिता येषु[c] जिनो अकासि[d] ।
कालं प्रार्थयमानो भवनिरोधं ॥८॥

इति श्रीमहावस्तुअवदाने[e] ज्योतिपालस्य व्याकरणं समाप्तं ॥

राजवंशे[f] आदि । भवति भिक्षवः[g] स कालो भवति स समयो यदयं लोको[h] दीर्घस्याध्वनोऽत्ययेन संवर्तति । संवर्तमाने[i] च पुनर्भिक्षवो लोके[j] योभूयेन सत्वा आभास्वरे देवनिकाये उपपद्यन्ति । भवति भिक्षवः[k] स कालो भवति स समयो

यदयं लोको दीर्घस्याध्वनो अत्ययेन विवर्तति[a]। विवर्तमाने[b] खलु पुनर्भिक्षवा लोके संस्थिते[c] लोकसन्निवेशे अन्यतरा सत्वा[d] आयुःक्षयाय[e] च कर्मक्षयाय च आभास्वरातो देवनिकायातो च्यवित्वा इच्छत्वमागच्छन्ति। ते भवन्ति सत्वा स्वयंप्रभाः अन्तरीक्ष[f]-चरा मनोमया प्रीतिभक्षाः सुखस्थायिनो येनकामंगताः।

धर्मता खलु पुनर्भिक्षवो यं तेषां सत्वानां स्वयंप्रभाणां[g] अन्तरीक्षचराणां[h] मनो-मयानां प्रीतिभक्षाणां[i] सुखस्थायिनां[j] येनकामंगतानां[k]। Sen 339

इमे चन्द्रमसूर्या[l] लोके न[m] प्रज्ञायेन्सुः। चन्द्रमसूर्येहि लोके अप्रज्ञायन्तेहि[n] तारकरूपा लोके न प्रज्ञायेन्सुः[o]। तारकरूवेहि लोके अप्रज्ञायन्तेहि नक्षत्रपथा[p] लोके न प्रज्ञायेन्सुः। नक्षत्रपथेहि लाके न प्रज्ञायन्तेहि रात्रिदिवा[q] लोके न प्रज्ञायेन्सुः[r]। रात्रिदिवेहि[s] लाके न प्रज्ञायन्तेहि[t] मासार्धमासा लोके न प्रज्ञायेन्सुः। मासार्धमासेषु लोके अप्रज्ञायमानेषु ऋतुसंवत्सरा[u] लोके न प्रज्ञायन्ते[v]। धर्मता खलु भिक्षवो[w] यं[x] तेषां सत्वानां स्वयंप्रभाणामन्तरीक्षचराणां यावद्य[y] नकामंगतानां। अयमपि[z] महापृथिवी उदकह्लदं विय समुदागच्छेत्[a]। सा चाभूद्वर्णसम्पन्ना[b] रससम्पन्ना सय्यथापि[c] नाम[d] क्षुद्रं[e] मध्वनेडकं एवमास्वादो[f] सय्यथापि नाम[g] क्षारसन्तानं[h] वा सर्पिसन्तानं वा एवं वर्णप्रतिभासो।

अथ खलु भिक्षवो अन्यतरः[i] सत्वः चपलो लोलुपजातीयो तं पृथिवीरसं अङ्गु-लीये आस्वादेसि। तस्य तं स्वादयति[j] वर्णेनापि गन्धेनापि रसेनापि। अन्ये[k] पि सत्त्वा[l] तस्य सत्वस्य दृष्ट्वानुकृतिमापद्यन्ते। ते पि पृथिवीरसमं[m]गुल्यास्वादयेन्सुः। तेषामपि तं स्वादयति[o] यावत्[p] रसेनापि। अथ खलु भिक्षवः[q] सो सत्वो अपरकालेन तं पृथिवी-रसं आलोपकारमाहारं आहारेसि। अन्ये पि सत्वा तस्य सत्वस्य दृष्ट्वानुकृतिमाप-द्यन्ते[r]। ते पि तं पृथिवीरसं आलोपकारक[s]माहारमाहारे[t]न्सुः। यतो[u] च भिक्षवस्ते सत्वा तं पृथिवीरसं[v]मालोपकारकमाहारमाहरेन्सुः[w]। अथ तेषां काये गुरुत्वं च खरत्वं[x] च

कक्खटत्वं च उपनिपते । [a]यापि चा[b]भूत्पूव[c] सानं स्वयं[d]प्रभता अन्तरीक्षचरता मनोमयकायता प्रीतिभक्षता सुखस्थायिता येनकामंगमता सा अन्तर[e]हाये ।

स्वयंप्रभताये [f]अन्तरीक्षचरताये मनोमयताये प्रीतिभ[g]क्षताये येन कामंगमताये Sen. 340 [h]अन्तर्हिताये चन्द्रसूर्या लोके प्रज्ञायेन्सु । चन्द्र[i]मसूर्येहि लोके प्रज्ञायन्तेहि तारकरूपा लोके [j]प्रज्ञायेन्सु । तारकरूवेहि लोके प्र[k]ज्ञायन्तेहि नक्षत्रपथा लोके प्रज्ञायेन्सु । नक्षत्रपथेहि लोके प्रज्ञा[l]यन्तेहि रात्रिदिवा लोके प्रज्ञायन्ते । रात्रिदिवसेहि लोके प्रज्ञायन्तेहि मासार्धमा[m]सा लोके प्रज्ञा[n]यन्ते । मासाधमासेहि प्रज्ञायन्तेहि [o]ऋतुसंवत्सरा लोके [p]प्रज्ञायेन्सु ।

अथ खलु भिक्षवस्ते सत्वा तं पृथिवीरसमाहा[r]रमाहरन्ता तंवर्णा तंभक्षा तदाहारा चिरं दीर्घमध्वानं [s]तिष्ठेन्सुः । [t]ये सानं बहु आहारमाहा[u]रेन्सु ते अभून्सु दुर्वर्णाः ये अल्प[v]माहारमाहा[w]रेन्सुः वर्णवन्ता । ये अ[x]भून्सुः वर्ण[y]वन्ताते दुर्वर्णा सत्वा अवजानेन्सुः । [z]वयमस्म वर्णवन्तो सत्वा इमे भवन्ति दुर्वर्णा । तेषां [a]वर्णाभिवर्णप्रत्ययानां मानाभिमानजातायानां [b]विहरतां पृथिवारसा अन्तरहाये । [c][d]भूमिपर्पटकं प्रा[e]दुर्भवेय सय्यथापि [f]नाम च्छात्रकं एवं वर्णप्रतिभासो । सो [g]च अभूद्वर्णसम्पन्नो च गन्धसंपन्नो च सय्यथापि नाम क्षुद्रो मधु अनेडको एवमास्वादो ।

अथ खलु भिक्षवो ते सत्वा अस्मिं पृथिवीरसे अन्तरहिते इमं उदानमुदान[h]येन्सु । अहो रसो अहो रसेति । सय्यथापि नाम [i]भिक्षव एतरहि मनुष्या सुभोजनखादिता सुखिता भु[k]क्ताविनो इमं उदान[l]मुदानेन्तीति । अहो रसो अहो र[m]सो ति । [n]तमेव पौराणमक्षरमग्रिन्यं उपनिपते अर्थं चास्य न वि[o]भावयेन्सु ।

अथ खलु भिक्षवस्ते सत्वास्तं [p]भूमिपपटकं आहारं आहरन्ता तद्वर्णा तद्भक्षास्[q]तदाहा[r]रा Sen. 341 चिरं दीर्घमध्वानं [s]तिष्ठेन्सु । [t]ये सानं बहुं आहारं [u]आहारेन्सु अभून्सु [v]दुर्वर्णा ये अल्पं आहारं आहा[w]रेन्सु ते अभून्सु वर्णवन्तो[x] । ये सुवर्ण[y]वन्तो ते दुर्वर्णा सत्वां अवजानेन्सुः ।

[a]वयमस्म [b]वर्णवन्ता [c]इमे भवन्ति सत्वा दुर्वर्णा। तेषां [d]वर्णाभिवर्ण[e]प्रत्ययानां [f]मानाभि[g]मानजातीयानां विहरतां [h]भूमिपर्पटकमन्तरहाये बनलताप्रादुर्भूता[i]। [j]सय्यथापि नाम [k]कलम्बुका एवं वर्णप्रतिभासापि [l]अभूवर्णसम्पन्नापि गन्धसम्पन्नापि रससम्पन्नापि तद्यथापि नाम क्षुद्रं [m]मधुमनेडकं [n]एवमास्वादा। अथ खलु भिक्षवो ते सत्वा [o]भूमिपर्पटके अन्तर्हिते अनुस्तनयेन्सु। अहो वदि अहो वदीति। तद्यथापि नाम भिक्षव एतरहिं सत्वा केनचिदेवं दुःखधर्मेण [p]स्पृष्टा [q]अनुस्तनयेन्सु [r]अहो वदि अहो [s]वदीति तमेव पौराणमक्षरमग्निन्यां उपनिपते [t]अर्थं च न विभावयेन्सुः। [u]एवमेव भिक्षवस्ते सत्वास्तस्मि [v]भूमिपर्पटके अन्तर्हिते [w]अनुस्तनयेन्सुः। अहो वदि अहो वदीति।

अथ खलु भिक्षवस्ते सत्वास्तस्मि[x] भूमिपर्पटके अन्तर्हिते वनलता[y] आहार[z]माहरन्ता [a]तंवर्णा [b]तंभक्षा तदाहारा चिरं दीर्घमध्वानं [c]तिष्ठेन्सु। [d]ये सानं [e]बहुं आहारं [f]आहारेन्सुः ते [g]अभून्सुः दुर्वर्णा ये [h]अल्पा[i]हारं [j]आहारेन्सु [k]अभून्सु [l]वर्णवन्तो। ते तां [m]दुर्वर्णां सत्वा [n]अवजानेन्सु। [o]वयमस्म वर्णवन्तो इमे भवन्ति सत्वा दुर्वर्णा। तेषां [p]वर्णाभिवर्णप्रत्ययानां मानाभिमानजातीयानां वनलता अन्तरहाये। शालि [q]अकणो Sen. 342 अतुषः [r]सुरभितण्डुलः [s]प्रादुर्भवेया सायं लूनो सो काल्यं भवति जातो पक्को विरूढो अवदानं पि से न प्रज्ञायति। सो पि काल्यं [u]लूनो [v]सायं भवति जातो पक्वो विरूढो अवदानं चास्य न प्रज्ञायति। अथ खलु भिक्षवो ते सत्वा[w] तस्मि वनलते अन्तर्हिते अनु[x]स्तनयेन्सुः। अहो वदे अहो वदे ति। तद्यथापि नाम भिक्षवो एतरहिं सत्वा केनचिदेवं दुःखधर्मेण स्पृष्टा अनुस्तनयेन्सु। [y]तमेव पौराणमक्षरमग्निन्यां [z]उपनिपते[a] अर्थं चास्य न विभावयेन्सु। अथ खलु भिक्षवस्ते [b]सत्वा तस्मि वनलते अन्तर्हिते तं [c]शालि [d]अकणं अतुषं [e]सुरभितण्डुलफलं [f]आहारमाहरन्ता चिरं दीर्घमध्वानं तिष्ठेन्सु। यतो च भिक्षवस्ते सत्वास्तं शालि अकणं [g]अतुषं सुरभितण्डुलफलं [h][i][j]आहारमाहारेन्सु। अथ

सानं स्त्रीणां स्त्रीव्यंजनानि प्रादुर्भवन्सु[a]: पुरुषाणां पुरुषव्यंजनानि प्रादुर्भवेन्सुः। अतिवेलं रक्तचित्ता अन्योन्यं उपनिध्यायेन्सु[b]। अन्योन्यं रक्तचित्ता अन्योन्यं उपनिध्याय ते अन्यमन्यं संरज्जेन्सु[c] अन्यमन्यं संरक्ता अन्यमन्यं दूषयेन्सुः[d]। ये खलु पुनर्भिक्षवः[e] सत्वान्पश्येन्सु[f] दूष्यमाणां[g] ते तत्र दण्डं पि क्षिपेन्सु[h] लेष्टुं[i] पि क्षिपेन्सु[j] पांशु पि क्षिपेन्सु[k]। अधर्मो भवन्तो लोके प्रादुर्भूतो असद्धर्मो[l] भवन्तो लोके प्रादुर्भूतः यत्र हि नाम सत्वो सत्वं दूषयति। तद्यथापि नाम भिक्षवः एतर्हिं दारिकाये[m] वुह्यन्तीये[n] दण्डं निक्षिपन्ति लेष्टुं पि निक्षिपन्ति तं एव पौराणमक्षरमग्रिन्यं उपनिपते अर्थं चास्य न विभावयेन्सु। तदा खलु पुनस्तं भिक्षवः[o] अधर्मसंमतं अयज्ञसंमतं[p] च अविनयसंमतं च। एतर्हिं खलु पुनस्तं[q] भिक्षवः, धर्मसंमतं च यज्ञसंमतं विनयसंमतं च। अथ खलु भिक्षवस्ते सत्वा तेन[r]
Son.343 अधर्मेण[s] अर्तीयन्ता विजिगुप्सिता[t] एकाहं पि विप्रवसेन्सु द्व्यहं पि विप्रवसेन्सु त्र्यहं पि विप्रवसेन्सु[u] चतुरहं पि विप्रवसेन्सु[v] पंचाहं पि पक्षं पि मासं पि विप्रवसेन्सु[w] गृहकर्मान्ता पि कारयेन्सु[x] यावदेव तस्यैव अधर्मस्य प्रतिच्छदनार्थं[y]।

अथ खलु भिक्षव, अन्यतरस्य[z] सत्वस्य शालिहारकं गतस्य एतदभवत्। किमस्य नाम अहं[a] किलमामि? कथं पुराहं किलमामि, सायं सायमासाय प्रातं प्रातरासाय[b]? यं नूनाहं सकृदेव[c] दैवसं सायंप्रातिकं शालिं हरेयं। आहरे खलु भिक्षवो सो सत्वो सकृदेव दैवसं सायंप्रातिकं शालिं। अथ खलु भिक्षवः अन्यतरो सत्वो तं सत्वमेतदुवाच। एहि भो सत्व शालिहारं[d][e] गमिष्यामः। एवमुक्त भिक्षवः सो सत्वो तं सत्वमेतदुवाच। गच्छ तुवं सत्व आनीतो मया सकृदेव सायंप्रातिको शालिः। अथ खलु भिक्षवस्तस्यापि[f] सत्वस्य एतदभवत्। एवं पि क्रियमाणं शोभनं भवति। यं नूनाहं पि सकृदेव द्व्यहिकं त्रीहिकं तं शालिं[g] हरेयं। आहरे खलु, भिक्षवः सो पि सत्वो सकृदेव द्वीहिकं त्रीहिकं शालिं। अथ खलु भिक्षवः अन्यतरो सत्वो तं सत्वमेतदुवाच। एहि भो सत्व शालिहारं[h][i] गमिष्यामः[j]। एवमुक्त सो[k] सत्वो तं सत्वमेतदुवाच। गच्छ त्वं भो सत्व[l] आनीतो मया[m] सकृदेव द्वीहिको त्रीहिको शालिः।

अथ खलु भिक्षवस्तस्यापि सत्वस्य एतदभवत्। एवं पि दानि [a]क्रियमाणं [b]शोभनं भवति। यं नूनाहं पि चतुरहिकं पंचाहिकं [c]शालिमाहरेयं। आहरे खलु [d]भिक्षवो सो पि सत्वो सकृदेव [e]चतुरहिकं पंचाहिकं शालिं। यतो च [f]भिक्षवः ते [g]सत्वा तं शालिं अकणं अतुषं [h]सु[i]रभितण्डुलफलं संनिधिकारं परिभुंजेन्सु अथ खलु तस्य शालिस्य कणो च तुषो च प्रादुर्भवति। सो पि [j]सायं लूनो काल्यं न जातो भवति [k]न पक्को न विरूढो अवदानं चास्य प्रज्ञायति।

